॥ श्रीः ॥

हरिदास–संस्कृत–ग्रन्थमाला

६

* श्रीः *

धर्मराजाध्वरीन्द्रकृता

वेदान्तपरिभाषा

श्रीशिवदत्तकृतार्थदीपिकाटीकासहिता

दान्ताचार्यपण्डितश्रीत्र्यम्बकरामशास्त्रिकृतटिप्पणीसंवलिता



चौखम्बा-संस्कृत-सीरिज, बनारस-१

२०११] [ई० १९५४

सन्ति। पुनरनेके सूरयो व्याख्यातवन्तः। यथा मूलकर्तृसूनू रामकृष्णाध्वरिः वेदान्तशिखामण्याख्यटीकया विभूषितवान्। तां टीकां चामरदासः स्वामी मणिप्रभयाऽलञ्चकार। पण्डितः शिवदत्तोऽर्थदीपिकया, पण्डितकुलपतिर्जीवानन्द आशुबोधिन्या, शान्त्यानन्दसरस्वती भूतपूर्वशारदापीठाधीशः पदार्थमञ्जूषया चापूपुजत्। अधुनैव पण्डितप्रवरैर्महामहोपाध्यायैरनन्तकृष्णशास्त्रिभिश्चापि स्वनिर्मितटीकया मुद्रापितम्। तथैवास्य ग्रन्थस्य मुद्रणमप्यनेकवारं शिलाऽक्षरैरायसाक्षरैश्च जातमित्येतत्सर्वं ग्रन्थवैशिष्ट्यसूचनायालमेव।

सन्ति बहवो ग्रन्था वेदान्तदर्शने परमस्य ग्रन्थस्य प्रमाणप्रमेयप्रतिपादनप्रकारः सर्वानतिशेते। तत्र चानेकविषया उक्ताः सर्वेऽप्यावश्यका एव, तथाऽपि विशिष्टविषयास्त्वेते—

मनस इन्द्रियत्वखण्डनम्—वह्निमान् पर्वत इत्यत्र पर्वतांशे प्रत्यक्षत्वव्यवस्था—ज्ञानगतविषयगतप्रत्यक्षत्वप्रयोजकभेदः—शब्दादपि प्रत्यक्षज्ञानोत्पत्तिप्रकारः—जातिशक्तिवादः—अर्थापत्त्यनुपलब्ध्योः पृथक्प्रमाणत्वम्—स्वतः प्रामाण्यवादश्चेति।

अस्य ग्रन्थस्य काशीस्थराजकीयपाठशालात्रिपरीक्षापरीक्ष्यग्रन्थेषु प्रथमवर्षे नियोजनतो वेदान्तमध्यमादिपरीक्षायां समागताय व्याकरणादिमध्यमोत्तीर्णानामिमं त्रिपटीपूर्णां दुर्बोधत्वं स्फुटमेवानधिगतदर्शनशास्त्राणां छात्राणामिति चिन्तयन् छात्राणां पाठनकाले यस्मिन्यस्मिन्स्थले ते क्लिष्टतामन्वभवंस्तत्र तत्र स्वल्पां टिप्पणीं कृतवानासम्।

अन्यच्च मोहमयी (बंबई) मुद्रितपुस्तकेऽनेकस्थले मूले टीकायां च पाठः खण्डितो वर्तते, यत्र विरामानपेक्षा तत्र विरामः, यत्र विरामापेक्षा तत्र तदभावः। पूर्वटीकाग्रन्थस्य यत्र योजनादिकं बहुलमुपलभ्यते, तैस्तैर्दोषैः पाठनावसरे विद्यार्थिभिरस्य शुद्धमुद्रणार्थं सम्प्रार्थितश्चौखम्बासंस्कृतग्रन्थमालाऽध्यक्षैः परागस्य संशुद्धतमं मुद्रणमकारयम्।

मया ह्ययं स्वकृतटिप्पण्या पुस्तकान्तरस्थपाठभेदैर्मूलटीकयोरागतत्रुट्यादिपदानेन च परिष्कृत्य संशोधितः। तथैव तत्र तत्राशुद्धपाठस्य शोधनं च कृतम्। यथा प्रथमपरिच्छेदान्ते टीकायां 'प्रदेशे प्रदेशान्तरस्थार्थम्' अत्र पुस्तकद्वयेऽपि पाठस्याशुद्धत्वं दृष्ट्वाऽस्मद्गुरुवर्यैर्महामहोपाध्यायपदवीविभूषितैर्नासिद्धधीलक्ष्मणशास्त्रिभिस्तथा शोधे इत्युपादि

पण्डितप्रवरश्रीसीतारामशास्त्रिभिश्चैतच्छोधितमिति तेषामुपकारं सधन्यवादं प्रकटीकरोमि। अन्येऽप्यस्मिन्संशोधनकार्ये बहूपकारकाः सन्ति तेषान्नामानि कृतज्ञतया सधन्यवादं प्रकटीकरवाणि।

काशीस्थराजकीयपाठशालाप्रधानाध्यक्षैः कविराजश्रीगोपीनाथशर्मभिरर्थदीपिकाटीकाया हस्तलिखितमेकं पुस्तकं पण्डितश्रीनारायणशास्त्रिणः सरस्वतीभवनहस्तलिखितपुस्तकालयाध्यक्षेभ्यः सकाशात् प्रदापितमिति ताभ्यां बहूपकृतोऽस्मि।

महामहोपाध्यायपदव्यलङ्कारभूतेभ्यो गुरुवर्येभ्यः श्रीनित्यानन्दपन्तपर्वतीयेभ्योऽपि बहुवारं परिश्रमो दत्तः। टीकास्थान्तिमश्लोकव्याख्यानन्तु गुरुवर्यगोस्वामिश्रीदामोदरलालपण्डितैः कृतमस्ति। राजकीयपाठशालाध्यापकानां गुरुवर्यश्रीपण्डितबालबोधमिश्राणां तथा गुरुवर्यपण्डितश्रीगणपतिशास्त्रिणामपि तत्तत्काले सविशेषसूचनातो बहूपकृतोऽस्मि। सर्वापेक्षया च पठनार्थं वटपुरं (वलसाड) गतस्यापि कौमारतस्याद्यस्य मम दर्शनशास्त्रास्वाददातॄणां पथिमापकानां पुत्र इव जनकानां प्रेमैकमूर्तीनां गुरुवर्याणां मोतीरामशास्त्रिणामधिकतरमुपकारमाजीवनं न विस्मरिष्ये। जन्मप्रदात्रोर्जनकजनन्योरीश्वरस्य चोपकृतयः केन शक्यन्ते वाचयितुमपि। प्राथमिकेऽस्मिन्शोधनकार्ये पण्डितश्रीढुण्ढिराजशास्त्रिभिरन्यैश्च मित्रवर्यैर्बहूपकृतोऽस्मि।

आवश्यकीयम्।

निपुणं निरीक्ष्यमाणेऽप्यस्मिन्ग्रन्थे सीसकाक्षरयोजकदोषादक्षरदोषाद्वा अक्षरागामतिसूक्ष्मत्वाच्च याः पुरुपमतिसुलभाः काश्चनाशुद्धयो जातास्ताः क्षन्तव्याः।

पाठभेदार्थं पुस्तकानां स्वरूपतमाः 'क ख ग घ च छ' इत्यादयः संज्ञाः कृतास्तस्याः सूचकं पत्रमन्यत्र निवेशितं तदप्यवश्यं द्रष्टव्यम्।

अन्ते च श्रीकाशीपुराधीश्वरयोः पार्वतीत्र्यम्बकयोर्ययोः प्रसादादिदं पूर्तिमगात्तयोरुपकारान्संस्मरन् सर्वेभ्यः परिश्रमसाफल्याय प्रार्थयते—

सं० १९८४, काशी

विदुषामनुचरः—
त्र्यम्बकरामशास्त्री

ॐ तत्सत्

वेदान्तपरिभाषाविषयसूची

* श्रीः *

वेदान्तपरिभाषा

'अर्थदीपिका' टीका सहिता

प्रत्यक्षपरिच्छेदः १

॥ श्रीगणेशाय नमः ॥

(१) यदविद्याविलासेन भूतभौतिकसृष्टयः ॥

---

(२) पशुं चक्रुं देवं हरमचलमाराध्यममरैः,
सहोराप्यं वीभ्रं खलजनदुरापं शुभकरम् ॥

नत्वा साम्ब सतनय त्र्यम्बकं त्र्यम्बकः प्रभुम् ।
वेदान्तपरिभाषायाष्टिप्पणीमहमारभे ॥ १ ॥

(१) यस्य परमात्मन अविद्या जीवाश्रिता ब्रह्मविषया तस्या विलासेन एताः भूतभौतिकसृष्टयः भवन्तीति शेषः । तं जीवब्रह्मभेदरहितम् आत्मानं नौमीति । ननु तस्यैव तत्त्वनि उत्कर्षापकर्षाभावात् कुतो नमस्कार्यतेति चेन्न । कल्पितभेदमादाय व्यवस्थोपपत्तेः । अविद्याप्रतिबिम्ब कर्तृत्वादिविशिष्टमपकृष्टं नमस्कर्तृ, तद्भिन्नं सर्वज्ञत्वादिविशिष्टं नमस्कार्यमिति संसूचनायोक्त-परमेति ।

(२) चक्रुं पशु हरमिति विशेषणत्रयेन सृष्टि-स्थिति-लय-कर्ता परमात्मा भजनकर्मत्वेन विवक्षितः । तेष्वपि पशुमिति प्रथमप्रयोगेण सत्त्वप्रधाने पालनकर्तृत्वादतिशयो दर्शितः । होराभिः सदवर्तन्ते ये सहोराः शास्त्रज्ञाः 'होरालग्नेऽपि राश्यर्द्धे शास्त्ररेखाभिदोरपो' ति हैमकोशात्, तैराप्यः तं सहोराप्यम् । वीभ्रं विमलं। खलजनाः कामिनस्तैर्दुरापम् । अनतीत्यतम आत्मा तम् । विष्णुमहं भज इत्यन्वयः

परेशं सर्वेषामतसमभृतं सर्वमतुलं,
भजेऽहं तं विष्णुं शिवमखिलवेदान्तविदितम् ॥ १ ॥
नुम श्रीबालगोपालतीर्थान् व्याससुतान् मुनीन् ॥
विघ्नहर्तॄन् गणेशादीन् पण्डितांश्च विमत्सरान् ॥ २ ॥
पितरं मातरं नत्वा स्वीयनिर्बन्धयन्त्रित ॥
करोमि सुखबोधाय परिभाषाऽर्थदीपिकाम् ॥ ३ ॥

श्रीमद्वेदान्तार्थनिर्णयात्मकं प्रकरणमारभमाणो धर्मराजाध्वरीन्द्रो ग्रन्थस्य निर्विघ्नपरिसमाप्त्यादिप्रयोजनमविगीतशिष्टाचारानुमितश्रुतिप्रमितकर्तव्यताकं मङ्गलमाचरन् प्रेक्षावत् प्रवृत्त्यङ्गभूते विषयप्रयोजने दर्शयति—यदिति । ननु शिष्टाचार किमाचारत्वाद्वेदमूलतां कल्पयति उत धर्मत्वात् ? नाद्यो निष्ठीवनादेरपि (१)तत्कल्पकत्वप्रसङ्गात् । न द्वितीय धर्मत्वसिद्धौ वेदमूलकत्व वेदमूलत्वे च धर्मत्वमित्यन्योन्याश्रयादिति चेन्न । शिष्टैर्धर्मबुद्ध्याऽनुष्ठीयमानस्याचारस्य (२)तत्कल्पकत्वात् । न च शिष्टासिद्धिः, वैदिकार्थानुष्ठातृणां (३)तत्त्वात् । तं परं परमेश्वरं तत्पदवाच्यं नौमि । परम् एव लक्षयितु तटस्थलक्षणमाह—यदिति । यस्याविद्यायदविद्या यदधिष्ठिता यदधीना मायेत्यर्थः ॥ 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' [श्वे० ४-१०] 'दैवी ह्येषा गुणमयी मम माया दुरत्यया' (भ० गी० ७-१४) इति श्रुतिस्मृतिभ्याम् । तस्या विलास कार्याकारेण परिणामस्तेन भूतानां वियदादीनां सूक्ष्माऽसूक्ष्माणां भौतिकानां चराचराणां भूतकार्याणां च सृष्टय । सृष्टिग्रहणं स्थितिप्रलययोरप्युपलक्षणम् । सृष्टिस्थितिप्रलया भवन्तीत्यध्याहार 'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः' (श्वे० ४-५) 'मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् (भ० गी० ९-१०) इति श्रुतिस्मृतिभ्याम् । एवं तटस्थलक्षणमुक्त्वा स्वरूप

---

(१) वेदमूलकत्वप्रसङ्गात् । (२) वेदमूलत्वानुमापकत्वात् । (३) शिष्टत्वात् ।

तं नौमि परमात्मानं सच्चिदानन्दविग्रहम् ॥ १ ॥

लक्षणमाह—**यदिति**। एतेन शून्यवादिनः साङ्ख्यवैशेषिकादेश्च मतं निराकृतं वेदितव्यम्। न तावत् शून्यं जगत्कारणं भवति 'कथमसतः सज्जायेत' इति सर्कानुगृहीतया श्रुत्याऽसतस्तत्कारणत्वप्रतिषेधात्। निरधिष्ठानभ्रमानुपपत्तेः। 'सदेव सोम्येदमग्र आसीत्' (छा० ६-२-१) 'सन्मूलाः सोम्येमाः प्रजाः' इत्यादि श्रुत्या सत एव जगत्कारणत्वावगमाच्च। 'असद् वा इदमग्र आसीत्' (तै० २-७) इति श्रुतिस्थासत्पदं तु अनभिव्यक्तनामरूपत्वेन गौण्या वृत्त्या सत्येव योजनीयम् 'समाकर्षात्' (ब्र० सू० १-४-१५) इति न्यायात्। प्रकृतस्यैव सत्यज्ञानादिलक्षणस्य सम्यङ्नामरूपादिराहित्येन प्रतिपादनादिति सूत्रार्थः। नापि प्रधानपरमाण्वादेर्जगत्कारणत्वं सङ्गच्छते 'सोऽकामयत बहुस्यां प्रजायेय' (तै० २-६) आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते आनन्देन जातानि जीवन्ति आनन्दं प्रयन्त्यभिसंविशन्ति (तै० ३-६) इत्यादिश्रुत्या चिदानन्दात्मकस्यैव तत्कारणत्वप्रतिपादनात्। परमेश्वरस्य तादृस्थ्यं वारयति—**आत्मानमिति**। अन्तर्यामिणमित्यर्थः। 'एषत आत्माऽन्तर्याम्यमृतः' (बृ० ३-७-२-१) इति श्रुतेः। लक्ष्यपक्षे तु तं परं मायादिपरं तदसंस्पृष्टं शुद्धं तत्पदार्थं नौमि। तमेव लक्षयति—**यदिति**। यत् यस्मिन्। अविद्याया अविलासो यस्मिन् (१)तथा च यस्मिन्नविद्याविलासाभाववति भूतभौतिकसृष्टयो नैव सन्ति 'नेह नानाऽस्ति किञ्चन' इत्यादि श्रुतेः। तत्स्वरूपं दर्शयति। **सच्चिदानन्दविग्रहमिति**। सदादिपदलक्ष्यत्वात् तदात्मकमित्यर्थः। तस्यानात्मत्वं वारयति। **आत्मानमिति**। त्वं पदवाच्यलक्ष्यार्थावप्यनेन श्लोकेन दर्शितौ। तथा हि तमात्मानं नौमि। देहात्मवादिनां मतं निराचष्टे—**परमिति**। तत्र न तावत् लोकायति-

(१) सः अविद्याविलासः यस्मिन्नविद्याविलासे इति शेषः।

वेषु स्थूलोऽहं कृशोहमित्याद्यनुभवात् पृथिव्यादिभूतचतुष्टययोगजचैतन्यवान् स्थूलदेह एवात्मेति केषाञ्चिदभिमत आत्मा, देहस्य स्वप्नसुषुप्तयोरभोक्तृत्वात्। योऽहं बाल्ये पितरौ अन्वभूवं सोऽहं स्थविरे नप्तृन् अनुभवामीति प्रत्यभिज्ञाऽनुपपत्तेः कृतहानाकृताभ्यागमापत्तेश्च। नापि पश्याम्यहं शृणोम्यहमित्यनुभवादिन्द्रियाण्यात्मा इत्यपरेषामभिमतं तेषां संहतानामात्मत्वे एकविनाशेऽप्यात्मनाशप्रसङ्गात्। प्रत्येकमात्मत्वे विरुद्धदिक्क्रियतया शरीरोन्मथनतापातात्। अस्थिरत्वापाताच्च। नाप्यशितपीतादिभोक्ता प्राण आत्मेत्यन्येषामभिमतं, सत्यपि प्राणे सुषुप्तौ तस्य भोक्तृत्वादर्शनात्। नापि सुख्यहं दुःख्यहमित्यनुभवात्सुखादिधर्मकं मन आत्मेत्यपरेषामभिप्रेतं, सर्वेन्द्रियानुग्राहकतया तस्य करणत्वानुभवात्। तथा बौद्धेष्वपि कर्तृरूपं विज्ञानमात्मा तच्च क्षणिकं प्रदीपकलिकावदिति योगाचाराभिमतोऽप्यात्मा न सम्भवति, उक्तप्रत्यभिज्ञाविरोधात्। तदेतत्सर्वमभिप्रेत्योक्तं—परमिति। देहादिभ्योऽन्नमयादिकोशेभ्यः परं व्यतिरिक्तमित्यर्थः। एवं परमिति विशेषणेनैव चन्दनबिन्दुवदेकदेशस्थत्वेऽपि सर्वाङ्गीणशैत्याद्युपलम्भोपपत्तेरणुरनागन्तुस्सुखदुःखादिमानित्येकदेशिमतं, देहादिलक्षणो देहपरिमित इत्यार्हतमतं च निराकृतं वेदितव्यम्, परं प्रकृष्टं विभुमित्यर्थावगमात्। आत्मनोऽणुत्वे चन्दनबिन्दुरेखवत् स्वावयवप्रसर्पणद्वारा निरवयवात्मोपलभ्ये सर्वाङ्गव्यापित्वासम्भवेन गङ्गाऽवगाहनिमग्नस्य युगपत्सर्वाङ्गीणशैत्योपलम्भाभावप्रसङ्गात्। 'बालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते' (श्वे० ५–९) 'अणोरणीयान्' (श्वे० ३–२०) इत्याद्या श्रुतिस्तु 'महतो महीयान्' (श्वे० ३–२०) इति वाक्यशेषात् 'महानज' (बृ० ४–४–२२) इति श्रुत्यन्तराच्चात्मनो दुर्लक्ष्यत्वमात्रपरा। नापि देहपरिमितं, एकस्मान्मनुष्यशरीरात् गजमशकशरीरप्राप्तावपचयोपचयाभ्यामवयवच्छेदेनानि

त्यत्वापातात्। एवं देहाद्यात्मवादिनो निराकृत्य शून्यमात्मेति वादिनो माध्यमिकान्, विभुत्वेऽपि तत्तदात्ममनसा स्वस्वामिभावसम्बन्धवशेन तत्तदात्मनि तत्तन्मनःसंयोगजसुखदुःखादिव्यवस्थोपपत्तेरनेको नित्योऽजोऽजडोऽपि बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नसंस्कारधर्म्माधर्म्मादिगुणानामाश्रयः कर्ता भोक्ता चेति वादिनः तार्किकवैशेषिकप्राभाकरान्, अहमनुभवस्योभयात्मत्वदर्शनात् जडबोधरूप इति वादिनो भाट्टाँश्च निराचष्टे—**सच्चिदानन्दविग्रहमिति**। 'अस्तीत्येवोपलब्धव्य' इत्यादिश्रुतेः निरधिष्ठानकभ्रमाऽसम्भवात् स्तनपानादिप्रवर्तकजन्मान्तरीयसंस्कारानुवृत्तिदर्शनाच्च सदात्मकमित्यर्थः। एतेन शून्यवादिमतं निरस्तम् 'अत्रायं पुरुषः स्वयं ज्योतिः' (बृ. ४-३-९) 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै० २-१-१) 'अयमात्मा ब्रह्मसर्वानुभूः' (बृ० २-५-१९) इत्यादिश्रुत्या स्वयंप्रकाशत्वेन स्वयंप्रकाशज्ञानात्मत्वेन च प्रतिपादनात् चिदात्मकमित्यर्थः। ननु विज्ञानस्य कथं स्वप्रकाशतेति चेन्न। विषयात्मविज्ञानानां त्रयाणामपि जडत्वे जगदान्ध्यप्रसङ्गात् विज्ञानस्य विज्ञानान्तरसापेक्षत्वे तस्याऽपि जडत्वेनाऽनवस्थापाताच्च। (१) अत्रायं प्रयोगः। विमतं विज्ञानं स्वसमानाश्रयस्वसमानकालस्वगोचरसंवेदनविरहप्रयुक्तव्यवहाररहितं न भवति विज्ञानत्वाद् अनन्तरव्यवह्रियमाणविज्ञानवदिति। 'विज्ञानमानन्दं ब्रह्म' इत्यादिश्रुतौ मत्वर्थीयाच्प्रत्ययं प्रकल्प्य विज्ञानमस्यास्तीति विज्ञानमिति व्याख्यानं तु नादरणीयम्, स्वरित(२)स्वरोच्चारणसम्प्रदायविरोधात्। आत्मनो

(१) विज्ञानस्य विज्ञानान्तरसापेक्षत्वाभावे इदमनुमानम्। पक्षीभूतविज्ञानशब्देनार्थान्तरवारणाय विमतमिति पक्षविशेषणम्। नैयायिकादीनां मते व्यवसायज्ञानं स्वगोचरानुव्यवसायज्ञानप्रयुक्तव्यवहारयुक्तं भवतीति बाधः स्यात्तदर्थं स्वसमानकालेति। पुरुषान्तरीयज्ञानाभावमादाय सिद्धसाधनवारणाय स्वसमानाश्रयेति।

(२) विज्ञानमानन्दं ब्रह्म इत्यादिश्रुतिस्थविज्ञानशब्दे 'अर्शआदिभ्योऽच्'

विज्ञानात्मत्वे स्वयं प्रयोग, विज्ञाता न स्वातिरिक्तविज्ञानाधीनप्रकाशः विज्ञानकर्मतामन्तरेण अपरोक्षत्वात् संवेदनवत्। यद्वा विज्ञाता स्वप्रकाशः(१)त्वात्तद्वदिति। अत्मा परमानन्दस्वभावः परप्रेमास्पदत्वात् व्यतिरेके घटवदित्यादियुक्त्या 'आनन्दो ब्रह्म' (तै० ३—६) इत्यादिश्रुत्या चानन्दात्मकमित्यर्थः। जडाजडात्मकत्वं तु विरोधादेव न सम्भवति। एतेन तार्किकादिमतं परास्तम्। सत्यज्ञाननिवर्त्यत्वं बोधयितुं प्रपञ्चस्य जीवाश्रिताज्ञानकल्पितत्वं दर्शयति—यदिति। यदाश्रिताऽविद्याऽनाद्यज्ञानं तस्या विलासेन भूतभौतिकसृष्टयो भवन्तीत्यर्थः। लक्ष्यपक्षे तु तं परमज्ञानादिसमस्तोपाधिविलक्षणमात्मानं नौमि। परमिति विशेषणेनाऽऽत्मानमित्येकवचनेन च तस्य भोक्तृत्वमनेकत्वं च वदन्तः साङ्ख्याः पातञ्जलाश्च पराकृता वेदितव्याः। शिष्टं तत्पदलक्ष्यवद्योजनीयम्। अखण्डार्थोऽप्यनेन श्लोकेन दर्शितः। तथा हि तं परमात्मानं प्रत्यगभिन्नं परमात्मानं नौमि। तज्ज्ञाननिवर्त्यत्वबोधनाय तद्विषयकाऽज्ञानकल्पितत्वं नामरूपात्मकप्रपञ्चस्य दर्शयति-यदिति। यदविद्या मद्विषयकमनाद्यनिर्वचनीयमज्ञानं तस्या विलासेन भूतभौतिकसृष्टयो भवन्तीत्यर्थः। समानमन्यत्। तथा चाऽनेन श्लोकेन ग्रन्थस्याऽविद्यानिवर्त्यस्य तत्त्वं पदाखण्डार्थस्य प्रदर्शयता जीवब्रह्मणोरैक्यमेवाऽज्ञातं तद्विषयो ज्ञातं सत्प्रयोजनमिति प्रवृत्त्यङ्गभूतौ विषयप्रयोजने प्रकाशिते ॥ १ ॥

इत्यनेन मत्स्वर्थीयमत्प्रत्ययमाश्रित्य विज्ञानाश्रयमात्मानं मन्यन्ते तार्किकाः। विज्ञायते यत्तद् विज्ञानं विज्ञप्तिर्वा विज्ञानं इति कर्मणि भावे वा ल्युटि विज्ञानस्वरूप एवात्मेति वेदान्तिनः। तत्र तार्किकमते 'नित्य' इति शब्देनान्तरोदात्तत्वं स्यात् तच्च विज्ञानशब्दस्य स्वरितान्तत्वसम्प्रदायविरुद्धम् ॥

(१) विज्ञाता स्वयंप्रकाशः विज्ञानकर्मतामन्तरेणापरोक्षत्वात् संवेदनवत् ॥

यदन्तेवासिपञ्चास्यैर्निरस्ता भेदिवारणाः ॥
तं प्रणौमि नृसिंहाख्य यतीन्द्रं परमं गुरुम् ॥ २ ॥
श्रीमद्वेङ्कटनाथाख्यान् वेलाङ्गुडिनिवासिनः ॥
जगद्गुरूनह वन्दे सर्वतन्त्रप्रवर्त्तकान् ॥ ३ ॥
येन चिन्तामणौ टीका दशटीकाविभञ्जिनी ॥
तर्कचूडामणिर्नाम कृता विद्वन्मनोरमा ॥ ४ ॥
तेन बोधाय मन्दानां वेदान्तार्थावलम्बिनी ॥

एवमिष्टदेवता नमस्कृत्य गुरुप्रसादात् परमात्मलाभ इत्यादिना गुरुप्रसादस्य विद्याप्राप्ति प्रत्यन्तरङ्गत्वप्रतीतेर्गुरवोऽवश्य पूज्या इत्यभिप्रायेण परमगुरून् प्रथम प्रणमति-**यदिति**। अन्ते समीपे वस्तुं शीलमेषा तेऽन्तेवासिन शिष्यास्ते एव पञ्चास्याः सिंहास्तै यदन्तेवासिपञ्चास्यैर्भेदवादिलक्षणा वारणा' गजा निरस्तास्तं यतीना यत्नशीलाना परमहंसपरिव्राजकानामिन्द्र नृसिंहसंज्ञक परमं गुरुं प्रणौमि प्रकर्षेण मन'कायवाक्प्रणिधानेन नौमीत्यर्थ' ॥ २ ॥

एवं परमगुरु प्रणिपत्य साक्षाद्विद्यागुरुमभिवन्दते-**श्रीमद्वेङ्कटनाथाख्यानिति** ॥ ३ ॥

चिकीर्षितग्रन्थस्योपादेयतासिद्धये स्वकीर्त्यनुवृत्तये च स्वस्य नानाविधग्रन्थकर्तृत्वप्रदर्शनपुरस्सरं चिकीर्षितं प्रतिजानीते **येनेति द्वाभ्याम्**। येन दशटीकाविभञ्जिनी विद्वन्मनोरमा तर्कचूडामणिसंज्ञिका प्रसिद्धा चिन्तामणौ टीका कृता तेन धर्मराजाध्वरीन्द्रसंज्ञकेन परिभाषा वितन्यते इति योजना ॥ ४ ॥

प्रयोजन निर्दिशति-**बोधायेति**। मन्दाना मन्दबुद्धीनामलसानामिति वा **बोधाय** तत्त्वज्ञानाय। यद्यपि बुद्धिमतामनलसाना सूत्रभाष्यादिकं बोधे साधनमस्त्येव तथापि मन्दानुग्राहकोऽयं ग्रन्थ इति बोधनाय मन्दानामित्युक्तम्। बोधयोग्यता दर्शयितुं विशिनष्टि-**वेदा-**

धर्मराजाध्वरीन्द्रेण परिभाषा वितन्यते ॥ ४ ॥

इह खलु धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः 'न स पुनरावर्त्तते' छा० ८-१५-१ इति श्रुत्या तस्य नित्यत्वावगमात्। इतरेषां त्रयाणां प्रत्यक्षेण,

---

न्तेति। वेदान्तानां श्रुतिमस्तकानामर्थानवलम्बितुं शीलमस्या अस्तीति तथा। एवं चास्य समस्तवेदान्ततात्पर्यार्थप्रतिपादकस्येतरसंक्षिप्तग्रन्थैरगतार्थता इति बोध्यम् ॥

एवं देवतागुरुप्रणतिपुरस्सरं ग्रन्थकरणं प्रतिज्ञाय इदानीं वक्ष्यमाणग्रन्थस्य शारीरकमीमांसया सङ्गतिं द्योतयितुं ग्रन्थप्रतिपाद्यं दर्शयति-इहेत्यादि निरूप्यते इत्यन्तेन। इहास्यां परिभाषायाम्। खल्विति वाक्यालङ्कारे, ब्रह्म तज्ज्ञानं तत्प्रमाणं च सप्रपञ्चं निरूप्यते इति संबन्धः ॥

कुत इत्यत आह-धर्मेत्यादिना(१) ॥ अत्र इह लोके वेदे च। खलु प्रसिद्धं धर्मार्थकाममोक्षसंज्ञकेषु चतुर्विधपुरुषार्थेषु-पुरुषैरर्थ्यमानेषु-मोक्ष एव परम-उत्कृष्टः पुरुषार्थः। परमत्वं च-निरतिशयत्वे सति क्षयशून्यत्वं तच्च मोक्षस्यैवास्तीत्यत उक्तम्-'एवेति'। मोक्षस्य परमपुरुषार्थत्वं श्रुतिबोधितम्। नित्यत्वे हेतुमाह-नेति। 'स ब्रह्मज्ञानेन मुक्तः पुनर्भूयो नाऽऽवर्तते पुनः पुनर्जन्ममरणलक्षणां संसृतिं न भजते' इति श्रुत्या मोक्षस्यैव(२) नित्यत्वमुक्तम्। एवं मोक्षस्य परमपुरुषार्थत्वे हेतुमुक्त्वा धर्मादित्रयाणां(३) तदभावे प्रत्यक्षेण, यत्कृतकं तदनित्यमिति सामान्यतो दृष्टानुमानाऽऽगमादितश्रुत्या चावगतं तेषामनित्यत्वं हेतुमाह—इतरेषामिति। इतरेषां धर्मादित्रयाणाम्।

---

(१) धर्मार्थेत्यादिना अनेन वाक्येन।

(२) गपुस्तके 'नित्यत्व'पदस्य मध्यमो भागः प्रमादतो भ्रष्ट इति निश्चीयते। कपुस्तके वर्तते ॥

(३) तदभावे-परमपुरुषार्थत्वाभावे-प्रत्यक्षेण श्रुत्या चावगतमनित्यत्वं हेतुमाहेत्यन्वयः।

'तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते' छा० ८-१-६ इत्यादिश्रुत्या चानित्यत्वाव-गमात्। स च ब्रह्मज्ञानात् इति ब्रह्म तज्ज्ञानं तत्प्रमाणं च सप्रपञ्चं निरूप्यते॥

तत्र प्रमाकरणं प्रमाणम् (१)। तत्र(२)स्मृतिव्यावृत्त

तद्यथा इहास्मिन् लोके कृष्यादिकर्मणा चितः सञ्चितः सस्यादिलोकः कृतकत्वात् क्षीयते तद्वदेव अमुत्र परलोके पुण्यादृष्टेन सञ्चितः स्वर्गादि-लोकः क्षीयते इति श्रुत्या चानित्यत्वावगमात्। तत्रार्थकामयोः प्रत्य-क्षेण श्रुत्या च, धर्मस्य तु श्रुत्या इति विभागः। यद्वा प्रत्यक्षस्य कृत-कत्वबोधनद्वारा धर्मानित्यत्वबोधनसामर्थ्यमित्यविरोधः। तथा च तेषा-मपि पुरुषार्थत्वादिना नित्यत्वानुमानं पदार्थत्वादिना बहुधीष्ण्यानुमा-नवद्बाधितविषयम्, 'अपामसोमममृता अभूम' 'अक्षय्यं ह वै चातुर्मा-स्ययाजिनः सुकृतं भवति' इत्याद्या श्रुतिश्चानुमानानुगृहीतोदाहृतश्रुति-विरोधेन प्रलयपर्यन्तस्थायिफलाभिप्राया इति भावः। एवं मोक्षस्य परमपुरुषार्थत्वं प्रसाध्य 'तरति शोकमात्मवित्' 'तमेव विदित्वाति-मृत्युमेति नान्यः पन्था विद्यतेऽयनाय' (श्वे० ६-१५) इत्यादि श्रुत्या तस्य साधनं ब्रह्मज्ञानमित्याह-स चेति। स च मोक्षः ब्रह्मज्ञानादेव इत्ये-वकारोऽनुपपद्यते। यतो मोक्ष एव परमपुरुषार्थः स च ब्रह्मज्ञानादेव यतश्च भवतीति हेतोर्मन्दानां मुमुक्षूणामुपकाराय ब्रह्म तज्ज्ञानं तत्प्र-माणं चेति त्रितयं सपरिकरं निरूप्यते इत्यर्थः॥

एवं ग्रन्थाभिधेयं प्रदर्श्य ब्रह्मणस्तज्ज्ञानाधीननिरूपणत्वात् तस्य च तत्प्रमाणायत्तनिरूपणत्वात् प्रथमं प्रमाणनिरूपणमारभते-तत्रेत्या-

(१) करणं प्रमाणमित्युक्तं दण्डादावतिव्याप्तिरिति प्रमापदम्। तथा चेदं प्रमाणसामान्यलक्षणम्, प्रमाणविशेषलक्षणन्तु प्रत्यक्षप्रमाकरणं प्रत्यक्षप्रमाण-मित्यादिकमूह्यम्।

(२) तत्रेति प्रमाणसामान्यलक्षणघटकप्रमापदार्थजिज्ञासायाम्। अत्रेदं

प्रमात्वं, अनधिगताबाधितविषयज्ञानत्वम् । स्मृतिसाधारणं त्वबाधितविषयज्ञानत्वम् । (१)नीरूपस्यापि काल-

---

दिना । तत्र तेषु मध्ये तज्ज्ञानतत्प्रमाणेषु । प्रमायाः करणं प्रमाणं करणत्वं चाऽसाधारणकारणत्वे सति व्यापारवत्त्वं तेन परामर्शादौ सव्यापारे मनसि च नातिप्रसङ्गः । प्रमाया लक्षणं किमित्याकाङ्क्षायां तल्लक्षणमाह—तत्रेति । तत्र प्रमा करणमित्यत्र । स्मृतिव्यावृत्तं प्रमात्वमिति । तथा च तस्या अलक्ष्यत्वान्न तत्राव्याप्तिरिति भावः । स्मृतावतिव्याप्तिवारणायानधिगतेति विषयविशेषणम् । शुक्तिरूप्यज्ञानादौ तन्निरासाय अबाधितेति । ज्ञानपदं तु स्वरूपकथनाय, इच्छादीनाम् आद्यविशेषणेनैव निरासात् । यद्वा चक्षुरादिष्वतिव्याप्तिवारणार्थं ज्ञानेति, तेषामपि फलद्वारा घटादिविषयत्वाभ्युपगमात् । (२)स्मृतिज्ञानं तेन न तत्करणे ज्ञानेऽतिव्याप्तिः । स्मृतावपि प्रामाण्यव्यवहारदर्शनादाह स्मृतीति । इच्छादि(३)व्यावृत्त्यर्थं ज्ञानपदम् । नन्वयं घटः अयं घटः इत्येवमादिरूपधारावाहिकबुद्धिस्थले द्वितीयादिज्ञानानामधिगतविषयत्वात् प्रथमलक्षणस्याव्याप्तिरिति चेत्तत्राह—नीरूपस्येति ।

बोध्यम् । ज्ञानं द्विविधं यथार्थमयथार्थं च । आद्यं द्वेधा स्मृतिरनुभवश्च । तत्रानुभव एव प्रमा या हि प्रत्यक्षादिमार्गैर्जन्यते स्मृतिस्तु यथार्थाऽपि संस्कारजन्यत्वात् संस्कारस्य प्रमाणत्वाभावाच्च प्रमेति केचित् । तन्मतेन अनधिगतेत्यादि प्रथमं प्रमालक्षणम् । तदपि तत्संस्कारत्वं रागरूपशुक्तिजनकत्वं वा प्रमात्वमिति मतेन स्मृतेरपि तथात्वात् प्रमात्वमिति मतेन द्वितीयमिति ।

(१) नीरूपस्येति । कालस्य रूपरहितत्वाच्चक्षुरिन्द्रियवेद्यत्वेऽपीति वादिनः । तन्मते नीरूपस्यापि रूपस्य चाक्षुषत्वं यथा तथा कालस्यापि कुतो नेति सिद्धान्तिनः । तथा च अयं घटः अयं घटः अयं घट इत्यादौ द्वितीयादिज्ञानानां विषयो घटः पूर्वक्षणविशिष्टोऽधिगतोऽपि द्वितीयक्षणविशिष्टस्य अनधिगतत्वरूपेणेति ।

(२) ज्ञायतेऽनेन तज्ज्ञानमिति करणव्युत्पत्त्या ज्ञानशब्दवाच्यं चक्षुरादि तच्च चक्षुरादिविषयमित्यनधिगतप्रमाविषयमपि इति प्रथमव्युत्पत्त्या चक्षुरादावतिव्याप्तिनिरासाभ्युपगमः । (३) आदिपदेन कृत्यादीनां ग्रहणम् ।

स्येन्द्रियवेद्यत्वाभ्युपगमेन धारावाहिकबुद्धेरपि पूर्वपूर्वज्ञानाविषयतत्तत्क्षणविशेषविषयकत्वेन न तत्राव्याप्तिः ॥

(१)किञ्च सिद्धान्ते धारावाहिकबुद्धिस्थले न ज्ञानभेदः, किन्तु यावद्घटस्फुरणं तावत् घटाकारान्तःकरणवृत्तिरेकैव, न

इदानीं घटो वर्तते इत्येवरूपानन्यथासिद्धप्रतीतिबलेन महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वस्य कालातिरिक्तद्रव्यचाक्षुषताप्रयोजकत्वकल्पनात्, प्रयोजकानुसारेण प्रतीतिकल्पने तु नीरूपस्य रूपस्याऽचाक्षुषत्वापत्तेः, नीरूपस्यापि कालस्य प्रत्यक्षप्रमाणजन्यानुभवविषयत्वस्वीकारेण धारावाहिकबुद्धेरपि पूर्वपूर्वज्ञानाविषयतत्तदुत्तरक्षणविशेषविषयकत्वेनाऽधिगतविषयत्वाभावात्र तत्र धारावाहिकबुद्धिस्थलेऽव्याप्तिरित्यर्थः। न चैवं शाब्दधारावाहिकद्वितीयादिज्ञानेष्वव्याप्तिरिति शङ्क्यम्, आकाङ्क्षायाः पदार्थज्ञानस्य चाभावेन तत्र धारावाहिकबुद्धेरसिद्धेः। अत एव न धारावाहिकद्वितीयाद्यनुमितावव्याप्तिर्द्वितीयानुमितिक्षणे प्रथमानुमितेर्विनष्टत्वेन तस्या अनधिगतविषयत्वात् ॥

नन्वेवं तथाकाशे बलाकेतिप्रतीतिबलादाकाशस्यापि प्रत्यक्षत्वं स्यात्, न चेष्टापत्तिस्तन्मते शब्दलिङ्गकानुमानप्रमाणानुसरणाऽनुपपत्तेः। 'अप्रत्यक्षे ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति' इति भाष्यकृद्वचनविरोधाच्च। नीरूपस्य रूपस्य चाक्षुषत्वं त्वदृष्टत्वादविरुद्धम्, तस्मात्सुरभिचन्दनमित्यत्र यथा सौरभ्यांशे परोक्षत्वं तद्वत्कालांशे परोक्षत्वमेवाभ्युपेयं न चाक्षुषत्वम्। तथा च नीरूपस्य तत्तत्क्षणस्याऽचाक्षुषत्वात् धारावाहिकबुद्धावव्याप्तिस्तदवस्थैवेत्यरुचेराह— **किञ्चेति**। ननु कुतस्तत्र ज्ञानभेदो नास्तीति पृच्छति— **किन्त्विति**।

---

(१) इदानीमयं घट इति प्रतीतौ कालस्यापि प्रत्यक्षत्वे आकाशे पततीति प्रतीत्या आकाशस्यापि प्रत्यक्षत्वं सिद्धान्ताननुमतमापद्येत प्रतीतिसाम्यादिति हेतोः युक्त्यन्तरेणाप्यव्याप्तिनिराकरणं किञ्चेत्यादिना।

तु नाना, वृत्तेः स्वविरोधिवृत्त्युत्पत्तिपर्यन्तं स्थायित्वाभ्युपगमात्। तथा च तत्प्रतिफलितचैतन्यरूपं घटादिज्ञानमपि तत्र तावत्कालीनमेकमेवेति नाव्याप्तिशङ्काऽपि ॥

ननु सिद्धान्ते घटादेर्मिथ्यात्वेन बाधितत्वात् तज्ज्ञानं कथं प्रमाणम्। उच्यते। ब्रह्मसाक्षात्कारानन्तरं हि घटा-

---

यावत्कालम् अस्ति प्रकाशत इति घटस्य स्फुरणं तावत्कालं तावदेव घटाकारान्तःकरणवृत्तेरेकत्वादित्युत्तरमाह—यावदिति। एवकारव्यावर्त्यमाह—नत्विति। गौरवादिति भावः। नन्वतिलाघवात् सुषुप्तिपर्यन्तमेवैव वृत्तिः कुतो नाङ्गीक्रियते? इत्याशङ्क्य स्वविरोधिवृत्त्युत्पत्तिकाले तत्स्थितेरसम्भवेन न तस्यास्तत्पर्यन्तं स्थायित्वाभ्युपगम इत्याह—वृत्तेरिति। प्रकृतवृत्तेरित्यर्थः।

ननु ज्ञानभेदनिरासार्थं वृत्तेरेकत्ववर्णनमयुक्तं सिद्धान्ते चैतन्यस्य ज्ञानत्वादित्याशङ्क्य वृत्तिप्रतिफलितस्यैतस्य घटादिज्ञानत्वेन तदेकत्वसिद्ध्या तत्प्रतिफलितचैतन्यरूपघटादिज्ञानस्याप्येकत्वं सिद्ध्यतीत्याशयेनाह—तथा चेति। वृत्तिभेदाभावे सिद्धे सति तत्र धारावाहिकस्थले यावत्कालीनं घटस्फुरणं तावत्कालीनमेकमेवेति हेतोरव्याप्तिशङ्काऽपि नास्ति। नन्वेवमपि विरोधिवृत्त्युत्तरं पुनर्जायमानस्य घटादिज्ञानस्याधिगतविषयत्वेन तत्राव्याप्तिरिति चेत् न, अनधिगतविषयत्वेन स्वाऽन्यूनविषयकोभयाऽन्यत्वस्य विवक्षितत्वात् ॥

ननु सिद्धान्ते घटादेः शुक्तिरूप्यवन्मिथ्यात्वेन बाधितत्वात् तज्ज्ञानस्याऽप्रमात्वेन लक्ष्यत्वाभावात्तत्राव्याप्तिशङ्का तन्निरासावनुपपन्नावित्याशयेन शङ्कते—नन्विति। कथं प्रमाणम्? प्रमात्वेन लक्ष्यं न भवतीत्यर्थः ॥ समाधानं प्रतिजानीते उच्यते इति। किं ब्रह्मसाक्षात्कारानन्तरं घटादीनां बाधः? उत शुक्तिरूप्यवत् संसारदशायाम्? इति विकल्प्याद्यमङ्गीकरोति—ब्रह्मेति। तत्र श्रुतिं प्रमाणयति—यत्रेति। यत्र

दीना बाधः (१)। 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्' (बृ० ४-५-१५) इति श्रुतेः, न तु संसारदशायां बाधः, 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' (बृ० ४-५-१५) इति श्रुतेः। तथा चाबाधितपदेन संसारदशायामबाधितत्वं विवक्षितमिति न घटादिप्रमायामव्याप्तिः। तदुक्तम्—

देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः।
लौकिकं तद्वदेवेदं प्रमाणं त्वाऽऽत्मनिश्चयात् ॥ १ ॥

ब्रह्मसाक्षात्कारपर्यन्तमित्यर्थः। लौकिकमिति घटादिज्ञानमित्यर्थः ॥

यस्यां तत्त्वसाक्षात्कारदशायाम्। अज्ञानावस्थावैलक्षण्यद्योतकस्तु-शब्दः। अस्य ब्रह्मसाक्षात्कारवतः सर्वमात्मैवाभूत् तत्तस्यां दशायां केन करणेन कं विषयं पश्येत्सर्वस्यापि तत्त्वज्ञानेन बाधितत्वादित्यर्थः। द्वितीयं निरस्यति—**नन्विति**। अत्रापि श्रुतिं प्रमाणयति—**यत्रेति**। यत्र यस्यां संसारदशायां द्वैतमिव तत् तस्यामितरः सन्नितरं पश्यतीत्यर्थः। तथा च संसारदशायां घटादेरबाधितत्वेन तज्ज्ञानस्य लक्ष्यत्वात्तत्राव्याप्तिशङ्का तन्निरासावपेक्षितावेवेति भावः। नन्वेवं सति घटादेः कालत्रयेऽबाधितत्वाभावादुक्तलक्षणं तत्राऽव्याप्तमिति चेत्तत्राह—**तथा चेति**। संसारदशायामबाधितत्वेन घटादिप्रमाया लक्ष्यत्वे सति तत्राव्याप्तिनिरासायाबाधितपदेन संसारदशायामेवाऽबाधितत्वं विवक्षितमिति न तत्प्रमायामव्याप्तिरित्यर्थः। श्लोकं घटादिज्ञानप्रामाण्यमभियुक्तवचनेन द्रढयितुमाह—**तदुक्तमिति**। आत्मनिश्चयस्य संसारदशायामपि सत्त्वादाह—**ब्रह्मेति**। लौकिकं प्रत्यक्षजन्यज्ञानमात्रमिति भ्रमव्यवच्छेदायाह—**घटादिति**। आ आत्मनिश्चयात् इत्युक्त्वेन ब्रह्मातिरिक्तवस्तुज्ञानं

---

(१) स्वोपादानेन सह स्वनिवृत्तिर्बाधः यथा शुक्तिरजतस्थले शुक्तिरियमित्याकारकज्ञानेन रजतस्य तदुपादानस्य शुक्तिस्वाज्ञानस्य च निवृत्तिरिति।

तानि च प्रमाणानि षट्, प्रत्यक्षानुमानोपमानागमार्थापत्त्यनुपलब्धिभेदात्। तत्र प्रत्यक्ष(१)प्रमायाः करणं प्रत्यक्ष-

सर्वं तेन प्राप्यमित्यर्थः। तेन स्वर्गोद्देशसाधनताविज्ञानस्यालौकिकत्वेऽपि न क्षतिः॥

एवं लक्षणलक्षितप्रमाकरणं प्रमाणं कतिविधमित्यपेक्षायामाह—तानीति। प्रत्यक्षमेकमिति चार्वाकाः, प्रत्यक्षानुमाने इति कणादसुगतमतानुयायिनः, शब्देन सह त्रीणीति साङ्ख्याः, प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति नैयायिकाः, अर्थापत्त्या सह पञ्चेति प्राभाकराः तेषां निराकरणायोक्तं—षडिति। तानि कानीत्यपेक्षायामाह—प्रत्यक्षेति। तत्र प्रत्यक्षस्य सर्वप्रमाणोपजीव्यत्वाज्ज्येष्ठत्वाच्च तल्लक्षणमेव प्रथममारभते—तत्रेति। तेषु प्रमाणेष्वित्यर्थः। अनुमानादावतिव्याप्तिवारणाय प्रत्य

(१) अत्रेदं बोध्यम्। प्रत्यक्षशब्दो हि प्रमाप्रमाणयोर्द्वयोरपि वर्तते, यथा घटे चक्षुःसन्निकर्षानन्तरम् अयं घट इत्याकारं प्रमात्मकं ज्ञानं जायते तत्प्रत्यक्षपदाभिधेयम्। तज्ज्ञानस्य करणं चक्षुरपि प्रत्यक्षपदाभिधेयम्। (एवं च वेदान्तमते मनस इन्द्रियत्वनिराकरणात्प्रत्यक्षप्रमाणानि पञ्च श्रोत्रादीनीति ध्येयम्) महानसादौ गृहीतव्याप्तेः पुरुषस्य यदा पर्वतादौ अविच्छिन्नमूलधूमदर्शनानन्तरं व्याप्तिस्मरणं तदनन्तरं वह्निमानयम् इत्याकारा प्रमा या साऽनुमितिशब्दवाच्या तत्करणं व्याप्तिज्ञानमनुमानपदाभिधेयम्। ग्रामे दृष्टगोपिण्डस्य यदा चिद्वनं यातस्य गोसदृशगवयपिण्डेनेन्द्रियसन्निकर्षानन्तरं पूर्वदृष्टगोपिण्डस्मृत्युत्पत्तिः, प्रतीतिर्जायते तदनन्तरं तस्य निश्चयो भवति 'अनेन सदृशो मदीया गौः' इति' इयं प्रमा उपमितिशब्दवाच्या तत्करणं सादृश्यज्ञानम् उपमानपदवाच्यम्। 'अहरहः सन्ध्यामुपासीत' 'वत्सं बधान' इत्यादिवैदिकलौकिकवाक्यश्रवणानन्तरं जायमाना मानान्तराबाधितार्थविषयीभूतप्रमा शाब्दीपदाभिधेया तत्करणं वैदिकं लौकिकं वा आप्तवाक्यज्ञानं शब्दप्रमाणपदाभिधेयम्। प्रत्यक्षशब्दवदेव अर्थापत्तिशब्दोऽपि प्रमाप्रमाणसाधारणः, यथा पीनो देवदत्तोऽयं दिवा न भुङ्क्ते इति शब्दश्रवणसमनन्तरं दृश्यमानस्य श्रूयमाणस्य वा पीनत्वस्य रात्रिभोजनाभावेऽनुपपत्तिः अनया च पीनत्वज्ञानेन जायमाना 'अ

प्रमाणम् । प्रत्यक्षप्रमा चात्र चैतन्य(१)मेव 'यत्साक्षा-

देति । शुक्तिरूप्यज्ञानादिसाधने(२)तन्निरासाय **प्रमापदम्** । ननु प्रत्य-क्षप्रमात्वमिन्द्रियजन्यज्ञानत्वं ज्ञा(३)नाजन्यज्ञानत्वं वा ज्ञानाकरणज्ञानत्वं वा । नाद्यः, सिद्धान्ते मनसोऽनिन्द्रियत्वेन सुखादिप्रत्यक्षेऽ(४)व्याप-कत्वात् । न द्वितीयः, मतान्तरे प्रत्यक्षज्ञानमात्रस्यैवेश्वरज्ञानजन्यत-या तत्राव्यापकतापातात् । नापि तृतीयः, अनुभवस्य संस्कारे उपक्षी-णतया स्मृत्यकरणत्वेन(५)तत्रातिव्याप्तेः, संस्कारद्वारा करणत्वे प्रत्य-भिज्ञायामव्याप्तेः । इत्येवं प्रत्यक्षप्रमाया दुरुपपादत्वात्सुपपादः पक्ष आश्रयणीय इत्यभिप्रायवानाह-**प्रत्यक्षप्रमा चेति** । तत्र श्रुतिं प्रमाण-यति-**यदिति** । प्रमाणद्वारक-त्यक्षत्वव्यावृत्त्यर्थं साक्षात्पदम् । अप-

---

रोक्षवस्य मुङ्क्ते' इत्याकारा या प्रमा सा अर्थापत्तिपदाभिधेया तस्याः प्रमायाः उत्पादकपीनत्वज्ञानमपि अर्थापत्तिपदाभिधेयम्, परन्तु तत्प्रमाणमेव । निर्घटे देशे घटाभावाकारा या विलक्षणप्रमा सा अभावानुभव इत्यादिपदाभिधेया तस्याः करणं घटानुपलब्धिः सा अनुपलब्धिपदाभिधेयेति संक्षेपः ।

(१) वेदान्तनये ज्ञानं चैतन्यं ब्रह्मेत्याद्यनर्थान्तरम् । ज्ञानविशेषः प्रमा, तथा च प्रत्यक्षप्रमाया एव चैतन्यत्वकथनं युक्तमित्याशयः ।

(२) शुक्तिरूप्यज्ञानसाधने साक्षिणि तन्निरासाय-प्रत्यक्षप्रमाणलक्षणा-तिव्याप्तिनिरासाय प्रमापदम् । तथा च प्रत्यक्षज्ञानकरणं प्रत्यक्षप्रमाणमित्युक्तौ रजतमिदमित्यस्यापि प्रत्यक्षज्ञानस्य करणं साक्षी तस्मिन्नतिव्याप्तिः स्यात् तन्निरासाय प्रमापदमावश्यकमिति भावः ।

(३) अनुमित्युपमितिशब्दार्थापत्त्यभावप्रमाणानां व्याप्तिज्ञान-सादृश्य-ज्ञानतात्पर्यज्ञान-पीनत्वज्ञाना-नुपलब्धिज्ञानजन्यानां सर्वासामेव तदि-तरप्रमाव्यक्तीनां ज्ञानजन्यत्वम् इत्यतः पारिशेष्यात् ज्ञानाजन्यज्ञानत्वं प्रत्य-क्षप्रमालक्षणमिति द्वितीयकल्पानुसरणम् । (४) लक्षणस्याव्याप्तिः ।

(५) पूर्वानुभूतस्य पदार्थस्य संस्कार आत्मनि वर्तते अदृष्टवशात् तस्य पुनः सन्निकर्षादिना संस्कारोद्बोधे स्मृतिर्जायते । ज्ञानाकरणकं ज्ञानं प्रत्यक्षमि-

दपरोक्षाद्ब्रह्म' (बृ-३-४-१) इति श्रुतेः। अपरोक्षादित्यस्यापरोक्षमित्यर्थः। ननु चैतन्यमनादि तत्कथं चक्षुरादेस्तत्करणत्वेन प्रमाणत्वमिति। उच्यते। चैतन्यस्यानादित्वेऽपि तदभिव्यञ्जकान्तःकरणवृत्तिरिन्द्रियसन्निकर्षादिना जायते इति वृत्तिविशिष्टं चैतन्यमादिमदित्युच्यते। ज्ञानावच्छेदकत्वाच्च वृत्तौ ज्ञानत्वोपचारः। तदुक्तं विवरणे—

रोक्षप्रमाणाद् ब्रह्मणः साक्षात्त्वमिति भ्रमनिरासायाह—अपरोक्षादिति। ननु चैतन्यस्याऽ(१)नादित्वेन करणाकाङ्क्षाशून्यत्वात् चक्षुरादेस्तस्य करणत्वेन प्रमाणत्वं कथमिति शङ्कते—नन्विति। तत् तस्मात्। चैतन्यस्यानादित्वेऽपि चैतन्याभिव्यञ्जकान्तःकरणवृत्तिरिन्द्रियसन्निकर्षादिना जन्यत्वेन तद्विशिष्टचैतन्यस्यादिमत्तया सुवचत्वेन चक्षुरादेस्तत्करणत्वसम्भवेन प्रामाण्योपपत्तेर्मैवमिति परिहरति—उच्यते इति। अविशिष्टचैतन्यं प्रति चक्षुरादेरकरणत्वमिष्टमेव तस्य स्वप्रकाशत्वेन स्वात्मनि प्रमाणव्यापारानपेक्षत्वादिति भावः। ननु वृत्तिरेव प्रत्यक्षप्रमा किं न स्यात्? तस्यां ज्ञानव्यवहारोपलब्धेः, स्वरूपेणेन्द्रियजन्यत्वोपपत्तेश्च इत्याशङ्क्य सत्यं ज्ञानमित्यादिश्रुत्या चैतन्यस्यैव मुख्यज्ञानत्वावगमात्, वृत्तेश्च अन्तःकरणधर्मत्वेन जडत्वाच्च तस्याः प्रत्यक्षप्रमात्वमपि तु तस्यां चैतन्यरूपज्ञानावच्छेदकत्वेन(२)स्वोपचार

स्याभ्युपगमे स्मृतेरपि संस्कारजन्यत्वात् प्रमात्वापातः, अनुभवस्य तत्र संस्कार द्वारोपक्षीणतया स्मृतौ करणत्वायोगादित्यभिप्रायः प्रत्यक्षप्रमात्वेनेति। स्मृतौ संस्कारोऽवान्तरव्यापारः करणन्तु अनुभव एव व्यापारवतस्तस्य करणत्वादिति चेत्, तर्हि सोऽयं देवदत्त इत्यादिप्रत्यभिज्ञाप्रत्यक्षे स्मृतिजनकसंस्कारेऽव्याप्तिरिति॥

(१) चैतन्यस्यैव प्रत्यक्षप्रमात्वे तस्यानादित्वात् तत्र चक्षुरादेर्जन्यत्वात् करणानपेक्षा। कारणविशेषः करणम्। कार्ये च कारणमेव तेन चैतन्यस्य प्रमात्वे चैतन्ये विषयनिष्ठव्यापाराभावात्, कथं तस्य कारणत्वाभ्युपगमेनेति शङ्काभिप्रायः। प्रत्यक्षप्रमाणेन अविशिष्टचैतन्ये विशिष्टव्यापाराभावेऽपि अन्तःकरणवृत्तिविशिष्टचैतन्ये तद्व्यापारसम्भव इति परिहाराभिप्रायः। (२) ज्ञानत्वोपचारः।

'अन्तःकरणवृत्तौ ज्ञानत्वोपचारात्' इति ॥

ननु निरवयवस्यान्तःकरणस्य परिणामात्मिका वृत्तिः कथम् ? इत्थम् । न तावदन्तःकरणं निरवयवं सादिद्रव्य-

---

इत्याशयेनाह—ज्ञानेति । नन्विद केनाचार्येणोक्तमित्याकाङ्क्षायामाह-तदुक्तमिति । तथा च प्रकाशात्मकसंज्ञकैराचार्यैर्विवरणाख्ये ग्रन्थेऽभिहितत्वान्नायमपसिद्धान्त इति भावः ॥

(१)नन्वन्त करणं न परिणामि निरवयवत्वादाकाशवदित्यनुमानादन्त करणस्य परिणामात्मिकाया वृत्तेरेवासम्भवेन तद्वृत्तिविशिष्टं चैतन्यं ज्ञानमिति वक्तुमशक्यत्वेनाऽऽमभिन्नमेव ज्ञान तच्चेन्द्रियजन्यत्वात् प्रत्यक्षमिति नैयायिक शङ्कते—नन्विति । कथं ? कथमपि नास्तीत्यर्थः । अन्त करणं निरवयवं न भवति सादिद्रव्यत्वात् घटवदित्यनुमानेन भवदुक्तहेतो(२)रसिद्धत्वेन सादिद्र यत्वहेतुना सिद्धेन सावयवत्वेन तत्परिणामित्वानुमानात् तत्परिणामात्मिकाया वृत्ते सम्भवात् तद्विशिष्टमात्मचैतन्यमेव ज्ञानं न तु तद्भिन्नमित्याशयवान् परिहरति—इत्थमिति । आत्मादौ व्यभिचारनिरासाय 'सादीति' रूपादौ तद्वारणाय 'द्रव्यत्वेति' ।

नन्वत करणस्य सादित्वे प्रमाणाभावाद्विशेषणासिद्धो हेतुरिति

---

(१) नैयायिकैर्ज्ञानस्यात्मगुणत्वमङ्गीकृतम् । वेदान्तिभिस्तु वृत्तिविशिष्ट चैतन्यमेव ज्ञानमित्यङ्गीकृतम् । तत्रान्त करणस्य निरवयवत्वात् तेनैव च परिणामाभावात् परिणामरूपवृत्तेरसम्भवः । ततश्च तद्विशिष्टचैतन्याभावात् प्रत्यक्षप्रमात्वाभाव इति निष्कर्ष॰ शङ्काया॰ ।

(२) तन्मनोऽसृजतेत्यादिश्रुत्या मनसः सादित्वसिद्धि सादित्वेन हेतुना सावयवत्वसिद्धिः सिद्धेन सावयत्वहेतुना परिणामित्व सिध्यति, अतो न सत्प्रतिपक्षः । इदमत्रानुमानशरीरम्–अन्त करण परिणामि अन्त्यावयविभिन्नत्वे सति सावयवत्वात् मृद्वत् ।

त्वेन सावयवत्वात्। सादित्वं च 'तन्मानोऽसृजत' इत्यादिश्रुतेः। वृत्तिरूपज्ञानस्य मनोधर्मत्वे च 'कामः सङ्कल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' (बृ०-१-५-३) इति श्रुतिर्मानम्। धी(१)शब्देन वृत्तिरूपज्ञानाभिधानात्। अत एव कामादेरपि मनोधर्मत्वम् ॥

ननु कामादेरन्तःकरणधर्मत्वेऽहमिच्छाम्यहं जानाम्यहं बिभेमीत्याद्यनुभव आत्मधर्मत्वमवगाहमानः कथमुपप-

---

चेत् तत्सादित्वे भगवत्याः श्रुतेः प्रमाणत्वादित्याह—सादित्वं चेति। तत् ब्रह्म मनः अन्तःकरणमसृजदित्यर्थः। एवमन्तःकरणस्य सादित्वे प्रमाणमुक्त्वा तत्परिणामित्वे न केवलमनुमानमेव प्रमाणम्, अपि तु भगवती श्रुतिरपीत्याह-वृत्तिरूपज्ञानस्येति। चकारादनुमानसमुच्चयः। कामः इच्छा, विचिकित्सा संशयः। ननु श्रुतौ ज्ञानस्यानुक्तत्वात्तस्य मनोधर्मत्वे श्रुतेः कथं मानतेति चेत्तत्राह धीशब्देनेति। ननु धीशब्दाभिहितं ज्ञानमन्तःकरणोपादानकं न भवति मानसप्रत्यक्षत्वात्, न च श्रुतिविरोधः मनोऽनन्यत्वपरतयाऽपि तदुपपत्तेरित्याशङ्क्य मृद्घट इत्यादिवत् 'सर्वं मन एव' बृ-१-५-३ इति सामानाधिकरण्यश्रुतेरनुपादानपरत्वानुपपत्त्या कामादेरपि तदुपादानकत्वात् दृष्टान्तस्य साध्यविकलत्वेन ज्ञानमन्तःकरणोपादानकमेवेत्याशयेनाह-अत एवेति सामानाधिकरण्यश्रुतेरेवेत्यर्थः ॥

नन्वहमिच्छाम्यहं जानामीत्याद्यनुभवस्य कामादेरात्मधर्मत्वेनावगाहमानस्य विरोधात्तेषामन्तःकरणधर्मत्वं नोपपद्यते, श्रुतिस्तु आयुर्घृतमितिवत् हेतावुपचरितार्थेति शङ्कते-नन्विति। कामादेरन्तःकर-

---

(१) पूर्वोक्तश्रुतौ धीशब्दः पठितः।

यते । उच्यते । अयःपिण्डस्य दग्धृत्वाभावेऽपि दग्धृत्वाश्रयवह्नितादात्म्याध्यासात् यथा अयो दहतीति व्यवहारस्तथा सुखाद्याकारपरिणाम्यन्तःकरणैक्याध्यासात् अहं सुखी दुःखीत्यादिव्यवहारः ॥

नन्वन्तःकरणस्येन्द्रियतया(१)ऽतीन्द्रियत्वात् कथमहमिति प्रत्यक्षविषयतेति । उच्यते(२) । न तावदन्तःकरणमिन्द्रियमित्यत्र मानमस्ति । 'मनःषष्ठानीन्द्रियाणि' इति भगवद्गीतावचनं प्रमाणमिति चेत्, न, अनिन्द्रिये

णधर्मत्वमेव वक्तव्यम्, व्यवहारस्तु सुखाद्याकारपरिणाम्यन्तःकरणैक्याध्यासादुपपद्यते, यथाऽयःपिण्डस्य दग्धृत्वाभावेऽपि दग्धृत्वाश्रयवह्नितादात्म्याध्यासादयो दहतीति व्यवहारः तद्वदिति समाधत्ते उच्यते इति ।

नन्वस्तु वह्न्ययःपिण्डयोरुभयोरपि प्रत्यक्षविषयत्वेन तदात्म्याध्यासादुक्तव्यवहारः, आत्मान्तःकरणयोस्तु प्रत्यक्षविषयतदविषयतारतत्त्वाभावात् कथमुदाहृतव्यवहारः ? न चान्तःकरणस्य प्रत्यक्षविषयता तस्येन्द्रियतयाऽतीन्द्रियत्वाच्चक्षुरादीन्द्रियवदिति शङ्कते—नन्विति । अन्तःकरणस्येन्द्रियत्वे प्रमाणाभावाद् अतीन्द्रियत्वासिद्ध्या प्रत्यक्षविषयताऽभावासिद्धिरित्याशयेन परिहरति नेति । षष्ठस्य मनस इन्द्रियत्वप्रतिपादकस्य भगवद्वाक्यस्य परमप्रमाणस्य सत्त्वान्मानं नास्तीत्ययुक्तमिति चोदयति मन इति । अनिन्द्रियेणापि मनसा इन्द्रियगतषट्त्वसंख्यापूरणाविरोधेन उदाहृतभगवद्वचसस्त(३)दिन्द्रियत्वे प्रमाणत्वाभावान्मैवमित्याह—नेति । तथा च श्रुतेरनुपलम्भात् स्मृतेश्च तदिन्द्रि

---

(१) अन्तःकरणमतीन्द्रियम् इन्द्रियत्वात् चक्षुरादिवत् इत्यनुमानशरीरम् ।

(२) सिद्धेन इन्द्रियत्वहेतुना अन्तःकरणस्यातीन्द्रियत्वं साधनीयम्, नासिद्धेन । अत्र च हेतोरेवासिद्धिरित्युत्तरमाह—उच्यत इति ।

(३) तस्य मनस इन्द्रियत्वे प्रमाणाभावादित्यर्थः ।

णाऽपि मनसा पञ्चत्वसङ्ख्यापूरणाविरोधात्। न हीन्द्रियगतसङ्ख्यापूरणमिन्द्रियेणैवेति नियमः, 'यजमानपञ्चमा इडां भक्षयन्ति' इत्यत्र ऋत्विग्गतपञ्चत्वसङ्ख्याया अनृत्विजाऽपि यजमानेन पूरणदर्शनात्। 'वेदानध्यापयामास महाभारतपञ्चमान्' इत्यत्र वेदगतपञ्चत्वसङ्ख्याया अवेदेनापि महाभारतेन पूरणदर्शनात्। 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः' (का० १-३-१०) इत्यादिश्रुत्या

यत्वाबोधकत्वाच मानमस्तीति सुस्पम्। न च मन इन्द्रियम् इन्द्रियगतसंख्यापूरकत्वादित्यनुमानं मानमिति शङ्क्यम्, अनिन्द्रियेणापि तद्गतसंख्यापूरणाविरोधेनाप्रयोजकत्वात्। किंचोक्तानुमाने यदिन्द्रियगतसंख्यापूरकं तदिन्द्रियमिति विशेषव्याप्तेर्मूलम् उत यद्यद्गतसंख्यापूरकं तत्तज्जातीयं यथा-'पञ्चौ प्रतिप्रस्थातृपञ्चमा ऋत्विजः' इत्यत्र ऋत्विग्गतसंख्यापूरकऋत्विग्जातीय इति सामान्यव्याप्तिः इति विकल्प्य नोभयमित्याशयेनाह-न हीति। दृष्टान्ताभावेनाद्यनिरासमभिप्रेत्य द्वितीयो व्यभिचारग्रस्त इत्याशयेन हेतुमाह-यजमानेति। तथा च यजमाने ऋत्विग्गतसंख्यापूरकत्वं वर्तते तज्जातीयत्वं नास्तीति व्यभिचार इति भावः ॥

एवं श्रुतौ व्यभिचारं प्रदर्श्य स्मृतावपि तं दर्शयति-वेदानिति। अवेदेनापीति। पौरुषेयस्येतिहासत्वेन प्रसिद्धस्य वेदत्वाप्रसिद्धेरिति भावः यथा-'नक्षत्राणामहं शशी' इति वचनं न शशिनो नक्षत्रत्वे प्रमाणं तथा-'इन्द्रियाणां मनश्चास्मी'ति भगवद्वाक्यमपि मनस इन्द्रियत्वे न प्रमाणमित्यपि ज्ञेयम्। ननु मनस इन्द्रियत्वे बाधकाभावात् किमर्थमेवमुच्यते इत्याशङ्काव्यवच्छेदाय हेत्वन्तरमाह-इन्द्रियेभ्य इति। इन्द्रियपरार्थेभ्यः परत्वप्रतिपादनेन मनसोऽनिन्द्रियत्वबोधकतेत्यर्थः। ननु मनोव्यतिरिक्तेन्द्रियेभ्यः परा ह्यर्था इति व्याख्यानसम्भवेन न

मनसोऽनिन्द्रियत्वावगमाच्च । न चैवं मनसोऽनिन्द्रियत्वे सुखादिप्रत्यक्षस्य साक्षात्त्वं(१)न स्यादिन्द्रियाजन्यत्वादिति वाच्यम् । न हीन्द्रियजन्यत्वेन ज्ञानस्य साक्षात्त्वम्, अनुमित्यादेरपि मनोजन्यतया साक्षात्त्वापत्तेः, ईश्वरज्ञानस्यानिन्द्रियजन्यस्य साक्षात्त्वानापत्तेश्च ॥

तस्य(२) तत्त्वबाधकम् इति शङ्कानिरासाय 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' मु० २। ३ इत्येवमादिश्रुतिरादिपदेन संगृहीता तथा चादिपदोपात्तश्रुत्यैकवाक्यतामापन्नेयं श्रुतिरिन्द्रियपरेभ्यः परत्वं मनसः प्रतिपादयन्ती तस्यानिन्द्रियत्वं बोधयतीति भावः। ननु मनसोऽनिन्द्रियत्वे प्रत्यक्षस्येन्द्रियजन्यत्वादनिन्द्रियमनोजन्यसुखाद्युपलब्धेः प्रत्यक्षत्वं न स्यात् तस्मात्तत्प्रत्यक्षत्वसिद्धये तस्येन्द्रियत्वमवश्यमभ्युपेयमित्याशङ्क्य निराकरोति—**न चेति**। हि यस्मादिन्द्रियजन्यत्वं ज्ञानस्य प्रत्यक्षत्वे प्रयोजकं न भवति तस्मादिन्द्रियाजन्यत्वेन सुखाद्युपलब्धेरप्रत्यक्षत्वं स्यादिति न च वाच्यमित्यर्थः। तस्य तत्प्रयोजकत्वे किं बाधकमिति चेत्तत्राह—**अनुमित्यादेरिति**। उक्तप्रयोजकानुसारेण सुखादिज्ञानस्य प्रत्यक्षत्वसिद्धये मनसोऽपीन्द्रियत्वाश्रयणान्मनोजन्यानुमित्यादेः प्रत्यक्षत्वापत्तिर्बाधिकेत्यर्थः। नन्विन्द्रियत्वेनेन्द्रियजन्यत्वमेव(३)तत्प्रयोजकम्, अनुमित्यादेश्च मनस्त्वेन तज्जन्यत्वान्नातिप्रसङ्ग इत्यत आह—**ईश्वरज्ञानस्येति** ॥

एवं निरस्तस्वाभिमतप्रत्यक्षत्वप्रयोजकः सिद्धान्तेऽपि प्रयोजका-

(१) प्रत्यक्षत्वं न स्यात्। इन्द्रियजन्यं ज्ञानं प्रत्यक्षम् इति प्रत्यक्षलक्षणवादिनः तार्किकस्य प्रत्यवस्थानमिदम्।

(२) तस्य—मनसः। तत्त्वबाधकम् इन्द्रियत्वे बाधकम् 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः' इति श्रुतिवचनमिति शेषः।

(३) तत्प्रयोजकम्—प्रत्यक्षताप्रयोजकमित्यर्थः।

सिद्धान्ते प्रत्यक्षत्वप्रयोजकं कि(१)मिति चेत्, किं ज्ञानगतस्य प्रत्यक्षत्वस्य प्रयोजकं पृच्छसि किं वा विषयगतस्य। आद्ये प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभेद इति ब्रूमः। तथा हि—त्रि(२)विधं चैतन्यं प्रमातृचैतन्यं प्रमाणचैतन्यं विषयचैतन्यं चेति। तत्र घटाद्यवच्छिन्नं चैतन्यं विषयचैतन्यम्, अन्तःकरणवृत्त्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यम्, अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम्॥

न्तरमपश्यन्नाक्षिपति-**सिद्धान्त इति**। किम्? न किमपीत्यर्थः। सिद्धान्ते तत्प्रयोजकस्य सत्त्वाद्दोषप्रतिक्षेपाय पृच्छ्यते-**किमिति**। ज्ञानगतप्रत्यक्षत्वस्य तत्पृच्छामीति चेत्तत्राह-**आद्य इति**। नन्वद्वैतवादिनस्तव कथं चैतन्यभेदो येन प्रमाणचैतन्यस्य विषयचैतन्येनाभेदस्य ज्ञानगतप्रत्यक्षत्वप्रयोजकत्वं भवेत् इत्याशङ्क्यौपाधिकं भेदमुपपादयति-**तथा हीति**।

नन्वन्तःकरणस्य वृत्तेरेवासम्भवात् तदवच्छिन्नं चैतन्यं प्रमाणचैतन्यमित्युक्तिरयुक्ता, न ह्यणुपरिमाणस्य तस्य वृत्तिः सम्भवति। न च तत्परममहत्परिमाणम्, प्राणशब्दाश्रयस्य तस्यैवोत्क्रान्तिगत्यादिश्रव-

---

(१) प्रत्यक्षस्वरूपपदार्थतावच्छेदकस्य प्रयोजकेन केनापि भाव्यम्। तच्चेन्द्रियजन्यत्वमिति तार्किकाः। मनस इन्द्रियत्वनिराकरणेन अन्यस्य चानुपलम्भेन अहं सुखीत्यादिसाधारणात् प्रत्यक्षतयाऽनुभूयमानात् ज्ञानव्यक्तिष्वननुगतप्रयोजकाभावादेव प्रत्यक्षता न स्यादिति कर्कशाशय आक्षिपति-सिद्धान्त इति।

(२) अनादिकल्पितानां सर्वेषां पदार्थानां प्रमातृ-प्रमाण-प्रमेयभेदभिन्नानां तैश्च सर्वैः पदार्थैः। यथा घटशरावमणिकमठादिभिरुपाधिभिराकाशोऽपरिच्छिन्नमपि वियत् परिच्छिद्यते, एवम् अनवच्छिन्नमपि चैतन्यमवच्छिद्यते, वस्तुतश्चैतन्यमेकमेवेति न विरोधोऽद्वैतश्रुतेः इति तत्त्वम्।

तत्र यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान्प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते। स एव परिणामो वृत्तिरित्युच्यते। अनुमित्यादिस्थले तु नान्तःकरणस्य वह्न्यादिदेशगमनं वह्न्यादेश्चक्षुराद्यसन्निकर्षात्। तथा चायं घट इत्यादिप्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहिरेकत्र देशे समवधानात्तदुभयावच्छिन्नं चैतन्यमेकमेव, विभाजकयोरप्यन्तःकरणवृत्तिघटादिविषययोरेक-

---

णात्। नापि मध्यमपरिमाणम्, तथात्वे देहवन्मन्दगतित्वेन झटिति विषयप्रतिभासानुपपत्तेः। आन्तरस्य बहिर्निर्गमनानुपपत्तेश्चेत्याशङ्क्यान्तःकरणस्याणुत्वे देहव्यापिसुखाद्युपलब्ध्यनुपलब्ध्यनुपपत्तिम्, तस्य प्राणशब्दस्याश्रयस्य दूरवर्तिध्रुवादिपर्यन्तगमने तदवच्छिन्नजीवस्यापि गतत्वेन देहस्य निर्जीवत्वापत्तिं चाभिप्रेत्य तस्य मध्यमपरिमाणत्वमाश्रित्योत्तरमाह—तत्रेति। तेषु त्रिषु पक्षेष्वित्यर्थः। तैजसमित्यनेनातिस्वच्छविरलतैजसद्रव्यतया सवितृकिरणवच्छीघ्रप्रसरोपपत्तिर्बोधिता। ननु अनुमित्यादिस्थलेऽप्यन्तःकरणस्य वह्न्यादिदेशगमनेन वृत्त्यवच्छिन्नस्य तदवच्छिन्नाभेदादुक्तप्रयोजकं तत्रातिव्याप्तमित्याशङ्क्याह—**अनुमितीति**। तत्र हेतुमाह—**वह्न्यादेरिति**। ननु प्रत्यक्षस्थलेऽपि वृत्तिघटयोर्भेदाद्भिन्नोपाधिकयोः प्रमाणप्रमेयचैतन्ययोर्भेदावश्यम्भावादुक्तप्रयोजकं तत्राव्याप्तमित्यत आह—**तथा चेति**। चक्षुरादिसन्निकर्षस्थले मनोनिर्गमने सिद्धे सतीत्यर्थः। **समवधानात्**सहावस्थानात्, **तदुभयावच्छिन्नं** घटादितदाकारवृत्त्युपहितम्॥

ननु विशेषणयोरिवोपाध्योरेकदेशस्थितत्वेऽपि भेदजनकत्वात्कथमुपहितचैतन्यैक्यमित्याशङ्क्य उपाध्योर्भिन्नदेशस्थत्वेनैव भेदजन-

देशस्थत्वेन भेदाजनकत्वात् । अत एव मठान्तर्वर्तिघटावच्छिन्नाकाशो न मठावच्छिन्नाकाशाद्भिद्यते । तथा चायं घट इति घटप्रत्यक्षस्थले घटाकारवृत्तेर्घटसंयोगितया घटावच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्य चाभिन्नतया तत्र घटज्ञानस्य घटांशे प्रत्यक्षत्वम् । सुखाद्यवच्छिन्नचैतन्यस्य (१) तद्वृत्त्यवच्छिन्नचैतन्यस्य च नियमेनैकदेशस्थितोपाधिद्वयावच्छिन्नत्वात् नियमेनाहं सुखीत्यादि-

---

क्व, न तु विशेषणयोरिव स्वरूपेणापीत्याशयेना-**विभाजकयोरपीति** । भिन्नदेशस्थत्वेनोपधेयभेदप्रयोजकयोरपीत्यर्थः । ननु लाघवात्स्वरूपेणैव भेदजनकत्वमुपाध्योरस्त्वत आह—**अत एवेति** । एकदेशस्थितत्वेनोपाध्योर्भेदाजनकत्वादेवेत्यर्थः । एवं च प्रामाणिकत्वाद्गौरवं न दोषावहमिति भावः । फलितमाह-**तथा चेति** । एकदेशस्थितत्वेनोपाध्योर्भेदाजनकत्वे सिद्धे सतीत्यर्थः । **तद्वृत्त्यवच्छिन्नचैतन्यस्य**-घटवृत्त्यवच्छिन्नचैतन्यस्य । **तत्र**-अयं घट इति प्रत्यक्षस्थले । ननु चक्षुराद्यसन्निकृष्टे सुखादौ तद्वृत्त्यनुदयात् कथं तदंशे प्रत्यक्षत्वमित्याशङ्क्य तस्यान्तरत्वेन चक्षुरादिसन्निकर्षानपेक्षणादित्याशयेनाह-**सुखादीति** । **तत्**-सुखादि । (२) एकस्मिन्नन्तःकरणरूपे देशे स्थितं यदुपाधिद्वयं सुखादि तद्वृत्तिरूपं तदवच्छिन्नत्वात् ।

---

(१) सुखाद्याकारपरिणतान्तःकरणवृत्त्यवच्छिन्नचैतन्यस्य च ।

(२) अयमत्र तत्त्वम्-वेदान्तनये सुखादीनामन्तःकरणधर्मत्वेन तेषामन्तःकरणदेशस्थत्वम्, सुखाद्याकारा वृत्तिरपि तदा अन्तःकरणस्था, इति सुखावच्छिन्नसुखाकारवृत्त्यवच्छिन्नचैतन्यस्य पूर्वप्रदर्शित-(उपाध्योरेकदेशस्थत्वेन उपधेयभेदाप्रयोजकत्वमिति) रीत्या एकत्वात् सुखादेः प्रत्यक्षत्वम् । बाह्यविषयाकारवृत्तेरिन्द्रियसन्निकर्षापेक्षा, आन्तरविषयाकारवृत्तिस्तु तथा नेति आन्तरबाह्यविषययोर्विशेषः ।

ज्ञानस्य प्रत्यक्षत्वम्। नन्वेवं स्ववृत्तिसुखादिस्मरणस्यापि सुखांशे प्रत्यक्षत्वापत्तिरिति चेन्न। तत्र स्मर्यमाणसुखस्यातीतत्वेन स्मृतिरूपान्तःकरणवृत्तेर्वर्तमानत्वेन तत्रोपाध्योर्भिन्नकालीनतया तत्तदवच्छिन्नचैतन्ययोर्भेदात्। उपाध्योरेकदेशस्थत्वे सत्येककालीनत्वस्यैवोपधेयाभेदप्रयोजकत्वात्॥

यदि चैकदेशस्थत्वमात्रमुपधेयाभेदप्रयोजकं तदा अहं

प्रत्यक्षत्वमिति। सुखांशे इति शेषः। नन्वेवमुपाध्योरेकदेशस्थत्वेन भेदाजनकत्वे अहं पूर्वं सुखीत्यादि स्ववृत्तिसुखादिस्मरणस्यापि सुखांशे प्रत्यक्षत्वं स्यादिति(१) शङ्कते—नन्विति। न केवलमुपाध्योरेकदेशस्थत्वमात्रमुपहिताभेदप्रयोजकम् अपि त्वेककालीनत्वमपि इति न स्मृतावतिव्याप्तिस्तत्रोपाध्योर्भिन्नकालीनत्वादिति परिहरति—नेति। तत्र-स्ववृत्तिसुखादिस्मरणे। तत्र तयोः सुखतद्वृत्तिरूपयोरुपाध्योः। तत्तदवच्छिन्नचैतन्ययोः—सुखतद्वृत्त्यवच्छिन्नचैतन्ययोः। उपधेयेति। उपहितचैतन्येत्यर्थः।

नन्वेवं तर्हि भिन्नकालीनयोरेकदेशस्थयोर्घटमठयोर्भेदकत्वापत्तिः उपधेयाभेदसमये उपाध्योरेककालत्वविवक्षायां त्वन्योन्याश्रय(२) इत्यरुचेराह—यदीति। उपाध्योरित्यनुषज्यते। प्रमाणचैतन्यस्य विषयचैतन्याभेद इत्यत्र वर्तमानत्वं विषयविशेषणं देयम्(३), तथा च

---

(१) स्मर्यमाणसुखाकारवृत्त्यवच्छिन्नसुखावच्छिन्नचैतन्ययोः पूर्वोक्तदिशा एकत्वात् इति शङ्काऽभिप्रायः।

(२) उपधेयाभेदसिद्धावेककालीनोपाधिद्वयावच्छेदसिद्धिः तत्सिद्धावुपधेयाभेदसिद्धिरित्यन्योन्याश्रयः। एकदेशस्थत्वापेक्षया एकदेशस्थत्वे सत्येककालीनत्वस्य उपधेयाभेदप्रयोजकत्वे गौरवमपि बाधकमुन्नेयम्।

(३) तथा च प्रमाणचैतन्यस्य वर्तमानकालीनविषयावच्छिन्नचैतन्याभेदः प्रत्यक्षप्रयोजक इति फलितम्।

पूर्वं सुखीत्यादिस्मृतावतिव्याप्तिवारणाय वर्तमानत्वं विषयविशेषणं देयम्। नन्वेवमपि स्वकीयधर्माधर्मौ वर्तमानौ यदा शब्दादिना ज्ञायेते तदा तादृशशाब्दज्ञानादावतिव्याप्तिः, तत्र धर्माद्यवच्छिन्नतद्वृत्त्यवच्छिन्नचैतन्ययोरैक्यादिति चेन्न। योग्यत्वस्यापि विषयविशेषणत्वात्। अन्तःकरणधर्मत्वाविशेषेऽपि किञ्चिदयोग्यं किञ्चिद्योग्यमित्यत्र फलबलकल्प्यः स्वभाव एव शरणम्, अन्यथा न्यायमतेऽ-

---

स्मर्यमाणसुखादेरवर्तमानत्वेन न स्मृतावतिव्याप्तिरित्यर्थः। यद्यप्यवर्तमानस्यानुपाधित्वेन विषयावच्छिन्नत्वेनैवोक्तातिव्याप्तिनिरासः, तथाऽपि विषयस्योपलक्षणत्वनिरासद्वारोक्तातिव्याप्तिनिरासाय वर्तमानत्वं विषयविशेषणमपेक्षितमिति ध्येयम्। ननु वर्तमानस्य विषयविशेषणत्वेऽपि धर्माधर्मविषयकशाब्दादिज्ञानेऽतिव्याप्तिस्तयोर्वर्तमानत्वादिति शङ्कते-नन्विति। एकदेशस्यस्वं बोधयितुं स्वकीयेत्युक्तम्। भवान् धार्मिकस्त्वमधार्मिक इत्यादिशब्दः। आदिशब्देनाहं सुकृतादृष्टवान् सुखित्वाद् अहं दुष्कृतादृष्टवान् दुःखित्वादित्यनुमानादिकं ग्राह्यम्। तत्र-शाब्दज्ञानादौ। (१)तद्धर्मादिप्रमाणचैतन्यस्य वर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वमिति। प्रत्यक्षत्वप्रयोजके योग्यत्वस्यापि विषयविशेषणत्वाद्धर्मादेश्चायोग्यत्वान्नातिव्याप्तिरिति परिहरति-नेति। योग्यत्वस्य—प्रत्यक्षयोग्यत्वस्य। ननु सुखादेर्धर्मादेश्चान्तःकरणधर्मत्वाविशेषात्कस्यचिद्योग्यत्वं कस्यचिन्नेत्यत्र किं नियामकमिति चेत्तत्राह-अन्तःकरणेति। विपक्षे बाधकमाह—अन्यथेति। फलबलकल्प्य-

---

(१) तेषु धर्मादिषु यानि प्रमाणानि शब्दादीनि तदवच्छिन्नचैतन्यस्य तद्धर्मादिप्रमाणचैतन्यस्य वर्तमानधर्मादिविषयावच्छिन्नचैतन्याभेदो वर्तत इति पुनः प्रत्यक्षत्वापत्तिरिति।

स्यात्मधर्मत्वाविशेषात् सुखादिवद्धर्मादेरपि प्रत्यक्षत्वापत्तिर्दुर्वारा ॥

न चैवमपि वर्तमानतादशायां त्वं सुखीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षता स्यादिति वाच्यम्। इष्टत्वात्। 'दशमस्त्वमसि' इत्यादौ सन्निकृष्टविषये शब्दादप्यपरोक्षज्ञानाभ्युपगमात्। अत एव पर्वतो वह्निमानित्यादिज्ञानमपि वह्न्यंशे परोक्षं पर्वतांशेऽपरोक्षम्। पर्वताद्यवच्छिन्नचैतन्यस्य बहिर्निःसृतान्तःकरणवृत्त्यवच्छिन्नचैतन्याभेदात्। वह्न्यंशे त्वन्तःकरणवृत्तिनिर्गमनासम्भवेन वह्न्यवच्छिन्नचैतन्यस्य प्रमाणचैतन्यस्य च परस्परं भेदात्।

स्वभावस्याशरणत्व इत्यर्थः ॥

ननु योग्यत्वविशेषणदानेऽपि सुखवर्तमानतासमये त्वं सुखीति वाक्यजन्यज्ञानस्य प्रत्यक्षता स्यादित्याशङ्क्येष्टापत्त्या परिहरति-**न चैवमिति**। ननु त्वं सुखीत्यादिवाक्यं न स्वविषयपरोक्षज्ञानजनकं वाक्यत्वाज्ज्योतिष्टोमादिवाक्यवदित्यनुमानात्कथमुक्तवाक्यादपरोक्षज्ञानमिति चेत्, दशमस्त्वमसीत्यादिवाक्ये व्यभिचारान्नेत्याह-**दशम इति**। उक्तानुमाने सन्निकृष्टविषयत्वमुपाधिरपीत्याशयेनाह-**सन्निकृष्टविषय इति**। नन्वेवं तर्हि पर्वतो वह्निमानित्याद्यनुमितेरपि प्रत्यक्षत्वं स्यादिति चेत्, तत्र किं पर्वतांशे तदापाद्यते वह्न्यंशे वा? नाद्यः इष्टत्वादित्याशयेनाह-**अत एवेति**। प्रमाणचैतन्यस्य योग्यवर्तमानविषयचैतन्याभेदस्य प्रत्यक्षत्वप्रयोजकत्वाभ्युपगमादेवेत्यर्थः। द्वितीयं प्रत्याह-**वह्न्यंश इति**। आद्ये हेतुमाह-**पर्वतादीति**। द्वितीये हेतुमाह-**वह्न्यंशे त्विति**। ननु 'सिद्धानुगममात्रं हि कर्तुं युक्तं परीक्षकैर्न सर्वलोकसिद्धस्य लक्षणेन निवर्तन'मिति भट्टपादैरुक्तत्वात् लक्षणेन

तथा चानुभवः 'पर्वतं पश्यामि वह्निमनुमिनोमीति' ॥

न्यायमते तु पर्वतमनुमिनोमीत्यनुव्यवसायापत्तिः । असन्निकृष्टपक्षकानुमितौ तु सर्वांशेऽपि ज्ञानं परोक्षम् । सुरभि चन्दनमित्यादिज्ञानमपि चन्दनखण्डांशे अपरोक्षं सौरभांशे तु परोक्षं सौरभ्यस्य चक्षुरिन्द्रियायोग्यतया योग्यत्वघटितस्य निरुक्तलक्षणस्याभावात् ॥

प्रसिद्धस्यानुमितित्वस्य निर्वर्तनमयुक्तमिति चेत्तत्राह तथा चेति । अनुभवोऽपीत्यर्थः । तमेवावेदयति पर्वतमिति । तथा च तस्याः प्रसिद्धत्वेऽपक्षविषयत्वात्तन्निवर्तनमस्माभिः क्रियते इति भावः ॥

एवं स्वपक्षे प्रसिद्धानुमानं प्रदर्श्य परमते तदतिक्रमणमापादयति-न्यायमत इति । स्वपक्षात् भेदे वैलक्षण्यद्योतकस्तुशब्दः । पृथिवीपरमाणवो गन्धवन्तः पृथिवीत्वात्, घटादिवदित्यादावप्रत्यक्षपक्षकानुमितौ पक्षे साध्ये च ज्ञानं परोक्षमेवेत्याह-असन्निकृष्टेति । ननु सुरभिचन्दनमित्यादौ सौरभ्यांशे ज्ञानं परोक्षमपरोक्षं वा ? नाद्यः (१) तत्सामग्र्यभावाच्चक्षुर्विषयत्वाच्च । न द्वितीयः, तदाकारकत्वप्रभावादित्याशङ्काप्रायपक्षमवलम्ब्याह-सुरभीति । आदिपदेन मधुरमाम्रफलमित्यादिपरिग्रहः । परोक्षमिति । आघ्रातपूर्वं तत्सौरभं चेत्तर्हि तत्र ज्ञानं स्मृतिः अनाघ्रातपूर्वं चेत्तर्हि (२)चन्दनखण्डत्वाल्लिङ्गादनुमितिरित्यर्थः । ननु सौरभ्यस्यापि योग्यविषयत्वात्तदंशेऽपि ज्ञानपरोक्षमेव किं न स्यादिति चेत्तत्राह-सौरभ्यस्येति । तथा च तदिन्द्रिययोग्यत्वघटितलक्षणस्याभावादसाव इत्यर्थः ॥

नन्वसन्निकृष्टपक्षकानुमितिस्थले पक्षापरोक्षतायां यथाऽसन्निकृष्टत्वं

---

(१) परोक्षसामग्र्यभावात् । परोक्षज्ञानसामग्री च सुरभित्वव्याप्यं चन्दनखण्डत्वमिति व्याप्तिज्ञानादिरूपा तस्याः सुरभिचन्दनमित्याकारकज्ञानात्पूर्वमभावादित्यर्थः । विषयस्यापि योग्यत्वेन अनुमानस्यानुपयोगाच्च ।

(२) अयं चन्दनखण्डः सुरभिः चन्दनखण्डत्वात् चन्दनखण्डान्तरवत् ।

न चैवमेकत्र ज्ञाने परोक्षत्वापरोक्षत्वयोरभ्युपगमे तयोर्जातित्व (१)न स्यादिति वाच्यम्। इष्टत्वात्। जाति

बाधक तया सन्निकृष्टपक्षकानुमितिस्थले सुरभिचन्दनमित्यादौ परोक्षत्वापरोक्षत्वयोरभ्युपगमे प्रसिद्धजातिबाधकसाङ्कर्यप्रसङ्ग बाधकस्तथा च नेद युक्तमित्याशङ्क्य निराचष्ट-**न चेति**। एवम् उक्तप्रकारेण जात्युपाध्युदासीनधर्ममात्रस्याभ्युपगमेन। तयोर्जातित्वाभावस्येष्टत्वादिति हेतुमाह **इष्टत्वादिति**। ननु घटत्वादिवत्परोक्षत्वापरोक्षत्वयोरपि प्रामाणिकतया प्रसिद्धस्यास्यानभ्युपगमेऽतिप्रसङ्ग इति चेत्तत्राह-**जातित्वेति**। ननु नीलघटत्वादावुपाधित्ववद् घटत्वादौ जातित्व कुतो न प्रामाणिकमित्याशङ्कानिरासायोपाधित्वग्रहणम्। घटत्वादौ जातित्वमित्येवरूपा परिभाषा तथा नीलघटत्वादावुपाधित्वमित्येवरूपा या परिभाषा तयोर्द्वयोरपि सकलप्रमाणाविषयतयाऽप्रामाणिकत्वादिति परिभाषाया एवोभयत्र सम्बन्ध। अप्रामाणिकत्वाज्जातित्वोपाधित्वयोरिति शेष इति कश्चित् (२)। ननु कुत सकलप्रमाणागोचरता घटोऽयमिति

---

(१) पर्वतो वह्निमान् इति वह्निरूप एव-पर्वतविशेष्यक संयोगसम्बन्धक विशिष्टज्ञानम् एकमेव। एकस्मिन्नत्र ज्ञाने पर्वतरूपविशेष्यांशे प्रत्यक्षत्वे वह्निरूपविशेषणांशे परोक्षत्वे स्वीकृते तु प्रत्यक्षत्वपरोक्षत्वयोर्जातित्व न स्यात्, साङ्कर्यरूपजातिबाधकघटितत्वात्। परस्परात्यन्ताभावसमानाधिकरणधर्मयोरेकत्र समावेश सङ्कर। पृथिवीपरमाणवो गन्धवन्त इत्यनुमितौ अपरोक्षत्वात्यन्ताभावसमानाधिकरण परोक्षत्व वर्तते, घटोऽयमिति प्रत्यक्षज्ञाने परोक्षत्वात्यन्ताभावसमानाधिकरण प्रत्यक्षत्व वर्तते। तयो परस्परविरुद्धधर्मयो परोक्षत्वापरोक्षत्वयो एकत्र पर्वतो वह्निमानित्यत्र समावेश इति तयोर्जातित्व न स्यादिति तार्किकाणामाक्षेप।

(२) केचित्-शिखामणिकारा। 'घटत्वनीलघटत्वयो जातित्वोपाधित्वयोरिति शेष' इतिशेष प्रपूर्य व्याख्यानयन्ति। तच्च युक्त दृश्यते परिभाषाया अप्रामाणिकत्वोक्तावपि फलत घटत्वनीलघटत्वयोरेवाप्रामाणिकत्वकथन स्यात्।

त्वोपाधित्वपरिभाषाया (१) सकलप्रमाणागोचरतया अप्रामाणिकत्वात्। घटोऽयमित्यादि प्रत्यक्षं हि घटत्वादिसद्भावे मानं न तु तस्य जातित्वेऽपि॥

जातित्वरूपसाध्याप्रसिद्धौ तत्साधकानुमानस्याप्यनवकाशात्। समवायासिद्ध्या सकलभिन्ननिखिलप्रपञ्चस्यानित्यतया च नित्यत्वसमवेतत्वघटितजातित्वस्य घट-

---

प्रत्यक्षगोचरत्वादित्याशङ्क्य तस्य तत्सद्भाव एवोपक्षीणत्वं तज्जातित्वसाधने उदासीनत्वादित्याह—**घटोऽयमिति।**

ननु प्रत्यक्षाभावेऽपि घटत्वादिकं जातिः उपाधिभिन्नसामान्यधर्मत्वात्सत्तावदित्यनुमानमस्तु तत्र प्रमाणमित्याशङ्क्याह—**जातित्वेति।** जातित्वरूपस्य नित्यानेकसमवेतत्वलक्षणस्य साध्यस्य (२) प्रसिद्धौ तद्व्याप्यत्वासिद्धौ नाधकत्वेनानुमानाप्रवृत्तेरित्यर्थः। नन्वेवं भूतजातित्वाप्रसिद्धावपि तद्घटकनित्यत्वैकत्वानेकसमवेतत्वानामस्त्यामाकाशघटादिषु प्रसिद्धिरिति तामादाय तद्घटितजातित्वं घटत्वादौ सेत्स्यतीत्याशङ्क्याह—**समवायेति।** ननु रूपी घटो गुरुः घट इति प्रत्ययस्य सम्बन्धावगाहितया परिशेषात्समवायसिद्धिरिति चेत्। न। गुणगुणिनोरवयवावयविनोश्चात्यन्तभेदे सम्बन्धस्य च (३)

घटोऽयमित्यादिप्रत्यक्षस्य घटत्वसद्भावे प्रमाणत्वं प्रदर्शयतो ग्रन्थकृतस्तदेव तात्पर्यं च।

(१) परिभाषासङ्केतः स देवोऽर्हद्वादिरिव स्वस्वशास्त्रीयसंज्ञा इति यावत्।

(२) साध्ये साध्यतावच्छेदकस्याभावः साध्याप्रसिद्धिः, यथा घटत्वं जातिरित्यत्र जातित्वस्य नित्यानेकसमवेतत्वरूपस्याप्रसिद्धिः। तथा च गगनमयवह्निमान् इत्यत्र साध्यतावच्छेदकविशिष्टसाध्यव्याप्यवत्ताज्ञानरूपपरामर्शाप्रसिद्धत्वादनुमित्यभाव, तथैव प्रकृतेऽप्यनुमित्यभाव।

(३) तत्सम्बन्धस्य—समवायस्य च तथात्वे अत्यन्तभेदे सामानाधिकरण्यानुपपत्तेः। न हि जातु दण्डः पुरुष इति भवति। भवति तु शुक्लो घटः घटः शुक्ल इत्यादि अतोऽभेद एव शुक्लघटयोरिति। तथा च दण्डः पुरुष इति व्यतिरेकोदाहरणम्।

तथात्वे दण्डपुरुषयादाविव शुक्लो घटो मृद्घट इति समानाधिकरणप्रत्ययानुपपत्तेः । किञ्च समवायिभ्यां सम्बद्धः समवायो(१)विशिष्टप्रत्ययनियामक उतासम्बद्धः ? नाद्यस्तस्यान्यस्तस्याप्यन्यः सम्बन्धः कल्प्य इत्यन(२)वस्थाप्रसङ्गात् । ननु समवायिभिर्नित्यसम्बद्ध एवायं गृह्यतेऽतो नोक्तदोष इति चेत्तर्हि संयोगोऽपि संयोगिभिर्नित्यसम्बद्धत्वात्सम्बन्धान्तरं नापेक्षेत । अर्थान्तरत्वादपेक्षत इति चेत्, तर्हि समवायोऽपि तथात्वात्कुतो नापेक्षते । संयोगो गुणत्वात्तथेति चेन्न । गुणपरिभाषाया अतन्त्रत्वादपेक्षाकारणस्य च तुल्यत्वात् । न(३)द्वितीयोऽतिप्रसङ्गात् । किञ्च स अनेक एको वा ? आद्येऽपसिद्धान्तो गौरवं च, द्वितीये रूपज्ञानादिसमवायस्य वायुघटादिवृत्तिसमवायाभेदाद्रूपवान् वायुः घटो विलक्षणगतिमानिति प्रतीतिप्रसङ्गात् । न च तत्र(४) रूपाद्यभावा-

(१) दण्डी पुरुष इतिवद्रूपी घट इति विशेषितविषयकप्रत्ययनियामक इत्यर्थः ।

(२) रूपी घट इत्यत्र रूपघटावत्यन्तभिन्नौ सम्बद्धौ च । अयुतसिद्धयोरनयोर्न संयोगादिः सम्भवति, अतो नित्यसम्बन्धस्य समवायस्य सिद्धिर्नैयायिकानाम् । तत्रेदं प्रतिवक्तव्यम् । समवायेऽपि सम्बन्धः स च तत्त्वादेव द्विष्ठः रूपे घटे च वर्तते न रूपघटात्मक एव । रूपतत्समवायावप्यत्यन्तभिन्नावेव इत्यन्तभेदसाम्यात्तावपि न सम्बन्धान्तरमृते सम्बन्त्स्यतः । असम्बद्धेन अतदात्मना च समवायेन उपकाराधानासम्भवात् । तथा च कल्पितोऽपि रूपसमवाययोः सम्बन्धोऽपि सम्बद्ध एव अतिशयाधानसमर्थो नासम्बद्ध इति भवेदनवस्था समवायकल्पने । समवायस्य रूपघटयोः स्वरूपेणैव स्थितिकल्पने तु संयोगस्यापि घटपटयोः स्वरूपेणैव स्थितिकल्पनेनैव सामञ्जस्ये संयोगस्य समवायेन स्थितिकल्पना अकारणिका स्यात् तस्माद् रूपघटयोस्तादात्म्यमेव । विस्तरस्त्वाकरे द्रष्टव्यः ।

(३) द्वितीयः पक्षः उत असम्बद्ध इति । असम्बद्धेन चेत्समवायेन रूपी घट इति प्रत्ययः तदा असम्बद्धत्वाविशेषात् असम्बद्धेन पटेनापि रूपी घट इति प्रत्ययप्रसङ्गः ।

(४) तत्र वायौ घटे च, रूपविलक्षणगत्याद्यभावात् ।

त्वादावसिद्धेश्च(१)। एवमेवोपाधित्वमपि निरसनीयम् ॥

नोक्तप्रतीतिप्रसङ्ग इति वाच्यम्। (२)तद्वृत्तित्वप्रयोजकसम्बन्धे सति तदभावव्यवहारस्य व्याहतत्वात्। इत्थं समवायसिद्ध्या प्रत्यक्षेण, कार्यत्वप्रध्वंसप्रतियोगित्वलिङ्गकानुमानेन, 'सदेव सोम्येदमग्र आसीत्' (छा० ६-२-१) इतिश्रुत्या च ब्रह्मभिन्नसकलप्रपञ्चस्यानित्यतया च नित्यत्वसमवेतत्वघटितजातित्वस्य घटत्वादावसिद्धेश्चेत्यर्थः। अप्रामाणिकत्वमिष्टत्वे हेतुस्तत्र(३)प्रत्यक्षस्य घटत्वादेर्जातित्वे मानभावादिहेतुत्रयम्(४)। ननूपाधित्वपरिभाषाया अप्यप्रामाणिकत्वं प्रतिज्ञाय कथं जातित्वपरिभाषाया एव (५)तत्त्वे हेतूपन्यास इत्याशङ्क्योक्तहेतुभिरेव तथा अप्यप्रमाणिकत्वसाधनस्य सुवचत्वादित्याशयेनातिदिशति एवमिति। तथा च नीलघटत्वादेरुपाधित्वपरिभाषा न प्रामाणिकी नीलोऽयं घट इत्यादिप्रत्यक्षस्य नीलघटत्वसद्भावे मानतया तस्योपाधित्वेऽमानत्वात्। उपाधित्वरूपसाध्याप्रसिद्धौ तत्साधकस्य नीलघटत्वादिकमुपाधिः जातिभिन्नसामान्यधर्मत्वात् आकाशत्वादिवदित्यनुमानस्य अनवकाशात् समवायाद्यसिद्ध्योपाधित्वासिद्धेश्चेत्येवं निरसनीयमित्यर्थः ॥

---

(१) घटत्वस्य जातित्वे प्रत्यक्षानुमाने प्रमाणे नाभिदेशोचिते तयोरन्यथासिद्धत्वप्रदर्शनात् ताभ्यां घटत्वस्य जातित्वं नेत्यतीति तात्पर्यम्। घटत्वस्य उपाधित्वमपि प्रत्यक्षानुमानयोरन्यथासिद्धत्वप्रदर्शनद्वारा निरसनीयमिति।

(२) वायौ तद्वृत्तित्व-रूपवृत्तित्व-प्रयोजके रूपसमवायसम्बन्धे सत्यपि रूपं नास्तीति तदभाव-रूपाभाव-व्यवहारस्य व्याहतत्वादित्यर्थः।

(३) अप्रामाणिकत्वे।

(४) प्रत्यक्षस्य घटत्वसद्भावे प्रमाणत्वं न तस्य जातित्वे इति प्रथमो हेतुः। जातिस्वरूपमात्र्याप्रसिद्ध्या अनुमानस्यानवकाश इति द्वितीयः। जातित्वघटितनित्यत्वसमवेतत्वाप्रसिद्ध्याऽपि जातित्वासिद्धिरिति तृतीयः।

(५) तत्त्वे-अप्रामाणिकत्वे।

पर्वतो वह्निमानित्यादौ च पर्वतांशे वह्न्यंशे चान्तःकरणवृत्तिभेदाद्बहिराकारेण तत्तद्वृत्त्यवच्छेदकभेदेन परोक्षत्वापरोक्षत्वयोरेकत्र(१) चैतन्ये वृत्तौ न विरोधः । तथा च तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तदाकारवृत्त्यवच्छिन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वम् ॥

(२)घटादेर्विषयस्य प्रत्यक्षत्वं तु प्रमात्रभिन्नत्वम् ।

नन्वेवमप्येकस्यैव चैतन्यस्य परोक्षत्वापरोक्षत्वात्मविरुद्धधर्माक्रान्तत्वं विरुद्धमित्याशङ्क्याह-**पर्वत इति** । **चैतन्ये** प्रमात्मकचैतन्ये । एवं सतीदं फलितमित्याह—**तथा चेति** । तत्तद्वृत्त्यवच्छिन्नचैतन्यस्य तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तस्मिंस्तस्मिञ्ज्ञानांशे प्रत्यक्षत्वप्रयोजकमिति ज्ञानगतस्य प्रत्यक्षत्वस्य प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभिन्नत्वमित्युक्तप्रयोजकेन विवक्षितमित्यर्थः ।

---

(१) एकत्रेति । मूले, घटावच्छिन्नाकाशो मठावच्छिन्नाकाशान्न भिद्यते विभाजकयोर्घटमठयोरेकदेशस्थत्वात् । एवम् अन्तःकरणवृत्तिघटयोरप्येकदेशस्थत्वान्नोपधेयभेदकत्वमित्युक्तमधस्तात् । तथा च पर्वतवह्न्योरप्येकदेशस्थोपाधिद्वययोर्नोपधेयचैतन्यभेदकत्वमिति कुतः परोक्षत्वापरोक्षत्वे एकस्मिन्नेव चैतन्ये सम्भवतः इत्याक्षेपं मनसि निधाय उत्तरयति–पर्वतो वह्नीत्यादिना । तथा च अयं घट इत्यादौ घटावच्छिन्नमन्तःकरणावच्छिन्नं च चैतन्यम् एकमेव, पर्वताकारा वृत्तिस्तु चक्षुःसन्निकर्षाज्जाता बाह्यगोचरा, तदवच्छिन्नं चैतन्यं पर्वतदेशीयम्, वह्न्याकारा वृत्तिस्तु व्याप्तिज्ञानजन्या हृदयदेशीयचैतन्यावच्छेदिका, अतः परोक्षत्वापरोक्षत्वयोरविरोध इत्याशयः ।

(२) द्वितीये घटादेरित्यधिकः पाठो दृश्यते पुस्तकान्तरेषु स च युक्ततरः । किं ज्ञानगतेत्यादिना विकल्प्य आद्ये प्रमाणचैतन्येत्यादिना दत्तोत्तरत्वादत्र द्वितीयकल्पस्य निराकरिष्यमाणत्वादिति । अत्र प्रत्यक्षत्वं तु इत्यस्य प्रत्यक्षत्वप्रयोजकम् इत्यर्थः, तथैवोपक्रान्तत्वात् । अतेदमूह्यम् । अयं घट इति ज्ञानमपि प्रत्यक्ष

ननु कथं घटादेरन्तःकरणावच्छिन्नचैतन्याभेदः ? अहमिमं पश्यामि इति भेदानुभवविरोधादिति चेत् । उच्यते । प्रमा

एवं ज्ञानप्रत्यक्षत्वस्य प्रयोजकमभिधाय प्रमेयगतस्य तस्य त(१)दाह घटादेरिति । तुशब्देनेन्द्रियजन्यज्ञानविषयत्वं विषयप्रत्यक्षत्वमित्यादिलक्षणनिरासः । मन रूपेन्द्रियजन्यानुमितिज्ञानवि(२)षयेति व्याप्तेः । प्रमात्रभिन्नत्वमिति । घटादेर्विषयस्येत्यनुष(३)ज्यते । ननु विषयस्य घटादेः प्रमात्रभिन्नत्वमुच्यते तदवच्छिन्नचैतन्यस्य वा ? नाद्यः, तस्य जडत्वेन तस्यासम्भवात् । न द्वितीयः, अहं मनुष्य इति प्रतीतिः स्यात् । न च सोपलभ्यते, उपलभ्यते च तद्विरुद्धम् । अहमिमं पश्यामीति भेदप्रतीतेः अतः कथं विषयस्य प्रमात्रभेद इति शङ्कते—नन्विति । प्रमात्रभेदो नाम घटादे(४)स्तदवच्छिन्नचैतन्यस्य नैक्यं न विवक्षितं येन विरोधः स्यादपि त्वन्यदेव । तदभिन्नत्वमिति समाधत्ते—उच्यत इति । प्रमातृसत्तेत्यस्य प्रमातृलक्षण

ज्ञानविषयो घटोऽपि प्रत्यक्षः । अत एव घटज्ञानं प्रत्यक्षमिति व्यपदेशाद् द्वितीयस्य घटः प्रत्यक्ष इति । तत्र ज्ञानगतप्रत्यक्षप्रयोजकमुक्तं विषयगतस्य तस्य प्रयोजकमिदानीमाह-प्रमात्रभिन्नत्वमिति । अत्र यद्यपि घटादेर्विषयस्य प्रत्यक्षत्वं प्रत्यक्षज्ञानविषयत्वं ज्ञानस्य तु प्रत्यक्षत्वं पूर्वोक्तमेव, अनुमित्यादिज्ञानानां विरहेण स्वत एव प्रत्यक्षत्वेऽपि प्रमातृचैतन्यविषयावच्छिन्नचैतन्ययोरभेदाभावादेव अनुमितिविषये नातिप्रसङ्गः । तथापि विषयस्यापरोक्ष्यं सन्दिह्यते इति विवरणे विषयप्रत्यक्षलक्षणं चेत् प्रमात्रभेदरूपमेवोक्तं शास्त्रेऽनुसृत्यमिति तत्त्वम् ।

(१) तस्य-प्रत्यक्षत्वस्य, तत् प्रयोजकम् आह ।

(२) व्याप्यमते मनस इन्द्रियत्वात् तज्जन्यानुमितिविषये परमाण्वादावतिव्याप्तिरित्यर्थः । (३) घटादेर्विषयस्य प्रमात्रभिन्नत्वं प्रत्यक्षत्वमित्यर्थः ।

(४) तदवच्छिन्नचैतन्यस्य घटावच्छिन्नस्य अन्तःकरणावच्छिन्नस्य चाऽभेदस्तयो पूर्वोक्तप्रकारेणैवात् ।

त्रभेदो नाम न तदैक्यम्, किन्तु प्रमातृ(१)सत्ताऽतिरिक्तसत्ताकत्वाभाव। तथा च घटादेः स्वावच्छिन्नचैतन्येऽध्यस्ततया विषयचैतन्यसत्तैव घटादिसत्ता, अधिष्ठानसत्ताऽतिरिक्ताया आरोपितसत्ताया अनङ्गीकारात्। विषयचैतन्यञ्च(२) पूर्वोक्तप्रकारेण प्रमातृचैतन्यमेवेति(३) प्रमातृचैतन्यस्यैव घटाद्यधिष्ठानतया प्रमातृसत्तैव घटादिसत्ता नान्येति सिद्ध घटादेरपरोक्षत्वम्॥

अनुमित्यादिस्थले त्वन्तःकरणस्य वह्न्यादिदेशनिर्गमनाभावे वह्न्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्यानात्मकतया वह्न्यादिसत्ता प्रमातृसत्तातो भिन्नेति नातिव्याप्तिः।

(४) नन्वेवमपि धर्माधर्मादिगोचरानुमित्यादिस्थले

सत्तेत्यर्थ। न तु तन्निष्ठसत्ताजाति, प्रमातृप्रमेयनिष्ठसत्ताजातेरेक्त्वया तन्निष्ठसत्ताऽतिरिक्तसत्ताया असिद्धेः। तथा च प्रमात्रभेदस्योक्तलक्षणे सतीद फलितमित्याह–**तथा चेति**। **प्रमातृचैतन्यमेवेति**। अत प्रमातृसत्ताऽतिरिक्तसत्ताशून्यत्व घटादेरपरोक्षत्व सिद्धमित्यर्थ।

अनुमेयवह्न्यादेश्चैतन्यसत्ताऽतिरिक्तसत्ताशून्यत्वेऽपि तस्य प्रमातृचैतन्यानात्मकतया नातिव्याप्तिरिति चैतन्यपद विहाय प्रमातृपदोपादानमित्याशयेनाह–**अनुमित्यादीति**। नन्वेवमप्यतिव्याप्तिरस्तीति शङ्कते–**नन्विति**। प्रत्यक्षयोग्यत्वस्यापि विषयविशेषणत्वेन योग्यविषयस्य

---

(१) वह्निमान् पर्वत इत्यत्र वह्न्यवच्छिन्नस्य देवदत्तीयान्तःकरणावच्छिन्नस्य च चैतन्यस्य वस्तुत एकत्वादतिव्याप्ति स्यादत चैतन्यपद विहाय प्रमातृपदोपादान कृतम्। तच्च मूले अनुमित्यादिस्थले त्वित्यादिना स्पष्टीकरिष्यते।

(२) पूर्वोक्तेति। यथा तडागोदक कुल्यात्मनेत्यत्रोक्तेनेत्यर्थ।

(३) इतिशब्दो हेत्वर्थ।

(४) एवमपि प्रमातृसत्ताऽनतिरिक्तेत्यादिलक्षणस्य अनुमेयवह्न्यादावतिव्याप्त्यभावेऽपि। तत्रान्तःकरणगमनाभावादिति भाव।

धर्माधर्मयोः प्रत्यक्षत्वापत्तिः, धर्माद्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्याभिन्नतया धर्मादिसत्तायाः प्रमातृसत्तानतिरेकादिति चेत्। न। योग्यत्वस्यापि विषयविशेषणत्वात्॥

(१)नन्वेमपि रूपी घट इति प्रत्यक्षस्थले घटगतपरिमाणादेः प्रत्यक्षत्वापत्तिः, रूपावच्छिन्नचैतन्यस्य परिमाणाद्यवच्छिन्नचैतन्यस्य चैकतया रूपावच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेदे परिमाणाद्यवच्छिन्नचैतन्यस्यापि प्रमात्रभिन्नतया परिमाणादिसत्तायाः प्रमातृसत्ताऽतिरिक्तत्वाभावादिति चेत्। न। तत्तदाकारवृत्त्युपहितत्वस्यापि प्रमातृविशेषणत्वात्। रूपाकारवृत्तिदशायां परिमाणाद्याकारवृत्त्यभावेन परिमाणाद्याकारवृत्त्युपहितप्रमातृचैतन्याभिन्नसत्ताकत्वाभावेनातिव्याप्त्यभावात्॥

प्रमात्रभिन्नत्वरूपलक्षणस्य धर्मादावभावात्तातिव्याप्तिरित्याह—नेति।

ननु घटगतरूपप्रत्यक्षदशायां तद्गतपरिमाणादावतिव्याप्तिः, रूपावच्छिन्नचैतन्यस्यैव परिमाणाद्यवच्छिन्नचैतन्यरूपतया तस्य(२)तदभिन्नप्रमातृसत्ताऽतिरिक्तसत्ताकत्वाभावादिति शङ्कते—नन्वेमपीति। परिमाणादेः प्रमातृसत्ताऽतिरिक्तसत्ताशून्यत्वेऽपि परिमाणाद्याकारवृत्त्युपहितप्रमातृचैतन्यसत्ताऽतिरिक्तसत्ताशून्यत्वाभावान्नातिव्याप्तिरिति समाधत्ते—नेति।

ननु परिमाणादावतिव्याप्तिवारणाय तत्तदाकारवृत्त्युपहितत्वस्यापि

(१) योग्यत्वस्य विषयविशेषणत्वेऽपीत्यर्थः।

(२) तस्य परिमाणादेः, तदभिन्ना परिमाणाभिन्ना, या प्रमातृसत्ता तदतिरिक्तसत्ताकत्वाभावादित्यर्थः। परिमाणादीनां रूपावच्छिन्नत्वेन रूपाधिष्ठानभूतचैतन्यसत्ताकत्वात्, तस्य च प्रमात्रभिन्नत्वादिति भावः।

(१) नन्वेवं वृत्तावव्याप्तिः, अनवस्थाभिया वृत्तिगोचरवृत्त्यनङ्गीकारेण तत्र स्वाकारवृत्त्युपहितत्वघटितोक्तलक्षणाभावादिति चेत्। न। अनवस्थाभिया वृत्तेर्वृत्त्यन्तराविषयत्वेऽपि स्वविषयत्वाभ्युपगमेन स्वविषयवृत्त्युपहितप्रमातृचैतन्याभिन्नसत्ताकत्वस्य तत्रापि भावात्। एवं चान्तःकरणतद्धर्मादीनां केवलसाक्षिविषयत्वेऽपि तत्तदाकारवृत्त्यभ्युपगमेन उक्तलक्षणस्य तत्रापि सत्त्वान्नाव्याप्तिः॥

प्रमातृविशेषणत्वे वृत्तावव्याप्तिरिति शङ्कते—**नन्वेवमिति**। अनवस्थाभयेन वृत्तिगोचरवृत्त्यनङ्गीकारेऽपि घटमहं जानामीति वृत्तेः स्वविषयत्वाभ्युपगमात् इतरवृत्त्यवच्छिन्नचैतन्याप्रकाश्यतया स्वावच्छिन्नचैतन्यप्रकाश्यत्वे सति प्रकाशमानत्वान्नाव्याप्तिरित्याशयेनाह—**नेति**। यथा वृत्तेर्वृत्त्यन्तराविषयत्वेऽपि स्वविषयत्वाभ्युपगमादव्याप्तिनिरासः एवमन्तःकरणस्य तद्धर्माणां कामादीनां च केवलसाक्षिविषयत्वेऽपि वृत्तिविषयत्वस्वीकारान्न तत्राव्याप्तिरित्याह—**एवं चेति**। आदिना प्रातिभासिकरजतादिसंग्रहः।

---

(२) जडाः सर्वे पदार्थाः अज्ञानावृता अतो न प्रकाशन्ते, तद्गोचरवृत्त्या आवरणनाशेन ते प्रकाशन्ते। यथा घटादयो जडाः स्वगोचरवृत्त्यैवावभासन्ते, तथैव वृत्तिरपि जडा न स्वतो मानयोग्या अतस्तद्गतावरणनिवृत्तिपूर्वकं तस्या भानं वक्तव्यम्। तथा च तदर्थं वृत्त्यन्तरानुसरणेऽनवस्था, वृत्त्यभावे मानाभाव इत्युभयतः पाशारज्जुरिति शङ्कस्याशयः। यद्यपि ब्रह्मातिरिक्तं सर्वमेव जडं, तथापि प्रत्यक्षतोऽनुभूयमानवैलक्षण्येन कस्यचित् किञ्चित्स्वभावविशेषादिकमास्थेयम्। यथा घटदीपकौ द्वावपि जडौ तथाऽपि घटस्य स्वभाने आलोकचक्षुःसन्निकर्षापेक्षा प्रदीपस्य तु आलोकानपेक्षा स तु घटं प्रकाशयन् स्वात्मानमपि प्रकाशयति, एवमेव वृत्तिरपि विनैव वृत्त्यन्तरं तदर्थं जाना त॰ प्रकाशयन्ती स्वात्मानमपि प्रकाशयिष्यतीति समाधातुर्वेदान्तिनोऽभिप्रायः।

न चान्तःकरणतद्धर्मादीनां वृत्तिविषयत्वाभ्युपगमे केवलसाक्षिविषयत्वाभ्युपगमविरोध इति वाच्यम्। न हि वृत्तिं विना साक्षिविषयत्वं केवलसाक्षिवेद्यत्वं किन्त्विन्द्रियानुमानादिप्रमाणव्यापारमन्तरेण साक्षिविषयत्वम्(१)। अत एव(२) अहङ्कारटीकायामाचार्यैरहमाकारान्तःकरणवृत्तिरङ्गीकृता, अत एव च प्रातिभासिकरजतस्थले रजताकाराविद्यावृत्तिः साम्प्रदायिकैरङ्गीकृता, तथा चान्तःकरणतद्धर्मादिषु केवलसाक्षिवेद्येषु वृत्त्युपहितत्वघटितलक्षणस्य सत्वान्नाव्याप्तिः॥

ननु वृत्त्यादिव्यावर्तककेवलपदविरोधात् कथं वृत्तिविषयत्वमभ्युपगन्तुं शक्यमित्याशङ्क्य परिहरति—न चेति। केवलपदं न वृत्तिनिरासार्थमपि त्विन्द्रियानुमानादिप्रमाणव्यापारनिवृत्त्यर्थम्, अतो न तद्विरोध इत्याह—न हीति। स्वोक्तार्थे पद्मपादाचार्यसम्मतिमाह—अत एवेति। यतो न वृत्तेः केवलपदव्यावर्त्यत्वमत एव 'अहंवृत्तिविशिष्टमेवान्तःकरणं चैतन्यविषयभावमापद्यते' इत्यहङ्कारटीकायामाचार्यैरहमित्याकारान्तःकरणविषया वृत्तिरङ्गीकृतेत्यर्थः। साम्प्रदायिकैरिति। (३)सर्वज्ञमुनिप्रभृतिभिः। अन्तःकरणादीनां वृत्तिविषयत्वे निर्विवादे सति फलितमव्याप्तिनिराकरणमुपसंहरति—तथा चेति।

---

(१) केवलसाक्षिविषयत्वमिति योजना।

(२) अहङ्कारटीकायामिति। 'अथातो ब्रह्मजिज्ञासा' इति सूत्रस्य तद्भाष्यं तस्य शारीरकभाष्यस्य या टीका पद्मपादाचार्यस्य पञ्चपादिकाख्या तस्यापि यद्विवरणं श्रीमत्प्रकाशात्माचार्यकृतं सा अहङ्कारटीका तस्याम्। प्रथमवर्णके 'अहंवृत्तिविशिष्टमेवान्तःकरणं चैतन्यस्य विषयभावमापद्यते' इत्यत्र इदं विजयनगरसीरीजमुद्रितपुस्तके ५५ पृष्ठे २१ पङ्क्तौ द्रष्टव्यम्।

(३) सर्वज्ञमुनि-संक्षेपशारीरकाचार्यैः।

तदयं निर्गलितोऽर्थः, स्वाकारवृत्त्युपहितप्रमातृचैतन्यसत्ताऽतिरिक्तसत्ताकत्वशून्यत्वे सति योग्यत्वं विषयस्य प्रत्यक्षत्वम्। तत्र संयोगसंयुक्ततादात्म्यादीनां सन्निकर्षाणां चैतन्याभिव्यञ्जकवृत्तिजनने विनियोगः।

श्रोतृसुखप्रतिपत्तये दत्तैर्विशेषणैर्निष्पन्नलक्षणं निष्कृष्य दर्शयति–तदयमिति। (१)ततस्य पूर्वोक्तस्यायम्, तत्तस्मादयमिति वा। स्वविषयस्तदाकारा तद्गोचरा या वृत्तिस्तदुपहितं यत्प्रमातृचैतन्यं तद्रूपाया सत्ता तदतिरिक्ता सत्ता यस्य स तथा तस्य भावस्तत्त्वं तेन शून्यत्वे सति–तदतिरिक्तसत्तावत्त्वरहितत्वे सति–प्रत्यक्षयोग्यत्वं प्रत्यक्षव्यवहारप्रयोजकमित्यर्थः। एवं ज्ञानगतस्य ज्ञेयगतस्य च प्रत्यक्षत्वस्य प्रयोजकमुक्तं तत्र तादृशवृत्त्यवच्छिन्नचैतन्यस्य तादृशविषयावच्छिन्नचैतन्याभिन्नत्वं विषयगतप्रत्यक्षत्वस्य प्रयोजकमिति विवेकः। तत्र प्रत्यक्षस्य विषयस्य प्रत्यक्षज्ञानं चैतन्यमेव तच्चानादीति संयोगादिसन्निकर्षाणां क्व विनियोग इत्यपेक्षायामाह–तत्रेति–उक्तरीत्योभयप्रयोजकसिद्धे सति, संयोगः संयुक्ततादात्म्यं संयुक्ताभिन्नतादात्म्यं [(२)तादात्म्यमभिन्नतादात्म्यं] मित्येवं रूपाणां सन्निकर्षाणां घटतद्गतरूपरूपत्वशब्दशब्दत्वावच्छिन्नचैतन्याभिव्यञ्जकवृत्त्युत्पादने विनियोग इत्यर्थः॥

यस्या जनने एतेषां विनियोगः सा वृत्तिः कतिविधेत्यपेक्षायामाह–

---

(१) तदयमित्यस्य मूलस्थस्य पदस्य षष्ठ्या पञ्चम्या च समासं दर्शयति-तत्तस्येत्यादिना।

(२) मुद्रितपुस्तके एतत्पाठः प्रमादभ्रष्टः प्रतिभाति, हस्तपुस्तकयोस्तु वर्तते एव।

सा च वृत्तिश्चतुर्विधा(१) संशयो, निश्चयो, गर्वः, स्मरणमिति । एवंविधवृत्तिभेदेन एकमप्यन्तःकरणं मन इति बुद्धिरिति अहङ्कार इति चित्तमिति व्याख्यायते । तदुक्तम्—

मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम् ।
संशयो निश्चयो गर्वः स्मरणं विषया इमे ॥ १ ॥

तच्च प्रत्यक्षं द्विविधम् । सविकल्पकनिर्विकल्पक-

सा चेति । सविकल्पेऽन्यवृत्त्यवच्छिन्नचैतन्यस्य प्रत्यक्षत्वात् वृत्त्यन्तःकरणपरिणामत्वात्तद्घटकवृत्तिमदन्तःकरणनिरूपणं न प्रकृतासङ्गतमिति द्रष्टव्यम् । संशयाकारा निश्चयाकारा गर्वाकारा स्मरणाकारा, संशयाद्याकारेण परिणामरूपा वृत्तिश्चतुर्विधेत्यर्थः । एवं संशयादिविषयाकारपरिण(२)तविविधवृत्तिभेदेनैकमप्यन्तःकरणं संशयाकारवृत्तिमन्मन इत्युच्यते, निश्चयाकारवृत्तिमद्बुद्धिरित्युच्यते, गर्वाकारवृत्तिमदहङ्कार इत्यभिधीयते, स्मरणाकारवृत्तिमच्चित्तमिति व्यपदिश्यते इत्यर्थः । श्लोकविभागे पूर्वाचार्यसंमतिमाह—**तदुक्तमिति ।** वृत्तिभेदेन तत्तद्वृत्तिमतो भेदादन्तःकरणं मन आदिभेदेन चतुर्विधम्, संशयादयोऽमी विषयाः, एतेषां विषयत्वे एतदाकारवृत्तीनामप्येतद्विषयत्वात् प्रकृतप्रतिकूलतेति भावः ।

प्रत्यक्षघटकवृत्तिस्वरूपमभिधाय विषयावच्छिन्नचैतन्याभिन्नवृत्त्यवच्छिन्नचैतन्यरूपमुक्तं प्रत्यक्षं विभज्य दर्शयति—**तच्चेति ।** तत्र प्रथमोद्दिष्टत्वात्सकलवादिसंमतत्वाद्व्यवहारप्रयोजकत्वादादौ स-

---

(१) चक्षुःसंयोगादिना घटाद्याकारा या वृत्तिर्जायते, सा संशयरूपा निश्चयरूपा गर्वरूपा स्मरणरूपेति तस्याश्चातुर्विध्यमित्यर्थः ।

(२) णाम इति पाठः गपुस्तके ।

भेदात्। तत्र सविकल्पकं वैशिष्ट्यावगाहिज्ञानं यथा घटमहं जानामीत्यादि ज्ञानम्। निर्विकल्पकं तु संसर्गानवगाहिज्ञानम्। यथा—सोऽयं देवदत्तः, तत्त्वमसीत्यादिवाक्यजन्यज्ञानम्॥

ननु शाब्दमिदं ज्ञानं न प्रत्यक्षमिन्द्रियाजन्यत्वादिति

विकल्पकं लक्षयति। तत्रेति। तत्र तयोर्मध्ये। विकल्पो वैशिष्ट्यं तेन सह वर्तत इति सविकल्पकं वैशिष्ट्यविषयकमित्यर्थमभिप्रेत्याह—वैशिष्ट्यावगाहीति। (१)तथात्वमिच्छादावतिव्याप्तमित्यत उक्तम्—ज्ञानमिति। (२)तत्त्वं तु निर्विकल्पकेऽति व्याप्तमित्यत उक्तं वैशिष्ट्यावगाहीति। उदाहरणमाह—यथेति। घटमहं जानामीत्यादिज्ञानं घटरूपविशेषणविशिष्टज्ञानावगाहिज्ञानत्वाद्वैशिष्ट्यावगाहीत्यर्थः। निर्गतो विकल्पो यस्मादिति निर्विकल्पकमित्यर्थमभिप्रेत्य द्वितीयं लक्षयति-निर्विकल्पकं त्विति। संसर्गो विशेषणविशेष्यसम्बन्धो वैशिष्ट्यमिति यावत्। उदाहरणमाह—यथेति। दे(३)शकालोपलक्षितदेवदत्तलक्षणाभेदविषये सोऽयं देवदत्त इतीन्द्रियजन्यैक्यप्रत्यक्षे सन्निकर्षवशादुपलक्षकदेशकालादेरपि भानसम्भवात्, शाब्दे तु ज्ञाने तात्पर्यविषयस्यैव भाननियमात्, अभेदमात्रविषयत्वाच्छाब्दमेवैतदुदाहरणमित्यभिप्रेत्याह—वाक्यजन्येति। प्रकृष्टप्रकाशश्चन्द्रः, 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्याद्यवान्तरवाक्यमादिशब्दार्थः॥

ननु निर्विकल्पकप्रत्यक्षं लक्षयित्वा वाक्यजन्यज्ञानस्य तदुदाह-

---

(१) तथात्व—वैशिष्ट्यावगाहित्वम्। (२) तत्त्व—ज्ञानत्वम्।

(३) ननु सोऽयं देवदत्त इत्यैक्यप्रत्यभिज्ञयैव वाक्यप्रयोगात् देशाद्युपलक्षितदेवदत्तलक्षणाभेदविषयम् इन्द्रियजन्यज्ञानमप्यस्ति निर्विकल्पकप्रत्यक्षम्, तद् विहाय कथं शाब्दमेवोदाह्रियते इत्याशङ्कां कृत्वा पश्चादयं ग्रन्थो योजनीयः।

चेत् । न । न हि इन्द्रियजन्यत्वं प्रत्यक्षत्वे तन्त्रं दूषितत्वात् । किन्तु योग्यवर्तमानविषयकत्वे सति प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वमित्युक्तम् । तथा च सोऽयं देवदत्त इति वाक्यजन्यज्ञानस्य सन्निकृष्टविषयतया बहिर्निःसृतान्तःकरणवृत्त्यभ्युपगमेन देवदत्तावच्छिन्नचैतन्यचोरभेदेन सोऽयं देवदत्त इति वाक्यजन्यज्ञानस्य प्रत्यक्ष-

---

त्वाभिधानमत्यन्तासङ्गतमित्याशयेन शङ्कते—नन्विति । (१)शाब्दज्ञानस्य इन्द्रियाजन्यत्वेऽपि निरुक्तप्रत्यक्षत्वप्रयोजकसत्त्वात् सन्निहितविषयकवाक्यजन्यज्ञानस्यापि प्रत्यक्षत्वाभ्युपगमात्रासङ्गतिरित्याशयेनाह-न हीति । इन्द्रियजन्यत्वस्य मनोरूपेन्द्रियजन्यानुमित्यादावतिव्याप्त्यादिप्रदर्शनेन दूषितत्वात् । उक्तं विस्मृत्य पृच्छति-किन्त्विति । प्रोक्तं स्मारयति—योग्येति । यद्यपि प्रमाणचैतन्यस्य योग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं पूर्वमुक्तम्, तथाऽपि तत्त्वे योग्यवर्तमानविषयकत्वे सति प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभिन्नत्वे च विशेषाभावादेव(२)मुक्तम् । तथा च प्रमाणचैतन्यस्य योग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं पूर्वमुक्तमिति भावः । तथा चेन्द्रियजन्यत्वस्याप्रयोजकत्वे निरुक्तस्य प्रयोजकत्वे च सतीमं फलितमित्याह—तथा चेति ।

नन्वेवं लौकिकोदाहरणसम्भवेऽपि वैदिकं न सम्भवति 'विज्ञातारमरे केन विजानीयात्' इत्यादिश्रुत्या प्रमातुर्विषयत्वनिरासात् । तत्पदार्थाभिन्नत्वं पदार्थप्रमातृचैतन्यस्य विषयावच्छिन्नचैतन्यत्वाभावात्सिद्ध-

---

(१) 'शाब्दज्ञानस्य' इति पाठः कपुस्तकयोर्नास्ति ।

(२) एव-योग्यवर्तमानविषयकत्वे सति प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वम्-इत्यभिप्रायः ।

त्वम्। एवं तत्त्वमसि इत्यादिवाक्यजन्यज्ञानस्यापि । तत्र प्रमातुरेव विषयतया तदुभयाभेदस्य सत्त्वात्।

त्वप्रयोजकस्यासत्त्वादित्याशङ्क्याह-एवमिति। तत्त्वमसीत्यादिवाक्यजन्यज्ञानस्यापि (१)सन्निकृष्टतत्त्वंपदलक्ष्यविषयतयोक्तवाक्यजन्यान्तःकरणवृत्त्यभ्युपगमेन लक्ष्यचैतन्यस्य वृत्त्यवच्छिन्नचैतन्यस्याभेदेन प्रत्यक्षत्वमित्यर्थः। तत्र—तस्मिञ्ज्ञाने। प्रमातृपदेन लक्ष्यं प्राह्यं त्वंपदलक्ष्यात्तत्पदलक्ष्यस्याभिन्नत्वादे(२)वमुक्तम्। (३)श्रुतिस्तु फलव्याप्यत्वनिषेधपरा।

---

(१) अय भाव –तत्त्वमसीत्येव शब्दश्रवणे सर्वज्ञत्वकिञ्चिज्ज्ञत्वाकर्तृत्वकर्तृत्वादिविशिष्टाभेदविषय ज्ञानं न जायते, किन्तु तत्त्वमिति पदद्वयलक्ष्यस्वरूपविषयमेव जायते कर्तृत्वाकर्तृत्वादिविरुद्धधर्मवतोरैक्यायोगात्। तत्त्व पदलक्ष्यञ्च केवल चैतन्य सन्निकृष्टमेवेति उक्तवाक्यजन्यान्तःकरणवृत्त्यभ्युपगमे न किञ्चिद्बाधकम्। तथा च लक्ष्यचैतन्यस्य वृत्त्यवच्छिन्नचैतन्यस्य च एकदेशस्थितोपाधिद्वयावच्छिन्नत्वात् अभेदे सति प्रत्यक्षत्व सुस्थमेव।

(२) प्रमातुरेव विषयतयेत्याद्युक्तमित्यर्थः।

(३) ननु तत्त्वपदलक्ष्यस्य ब्रह्मणः शास्त्रजन्यज्ञानविषयत्वे 'विज्ञातारमरे केन विजानीयात्' इत्यादिश्रुतीना का गतिरित्याशङ्क्य समाधत्ते-श्रुतिस्तु फलव्याप्यत्वनिराकरणपरेति। तथा चोक्तम्—

फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम्।
ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता॥

इन्द्रियसन्निकर्षद्वारा अन्तःकरणस्य घटाद्याकारवृत्तौ सत्या तत्र चैतन्य प्रतिबिम्बते, तच्च चैतन्य 'फलम्' इत्यभिधीयते। चैतन्यप्रतिबिम्बयुता च सा वृत्तिः विषय व्याप्नोतीति फलरूपचैतन्यस्यापि व्याप्तिर्जाता, तथा च घटादीना जडाना फलव्याप्यत्वम्। तच्च ब्रह्मणि न सम्भवति जडत्वापत्तेः। तत्त्वमस्यादिवाक्यश्रवणसमनन्तरजायमानया वृत्त्या ब्रह्मणो व्याप्यत्वे न कापि हानिः, प्रत्युत तद्विषयाज्ञाननिवृत्तिं विना भानासम्भवात् अज्ञाननाशार्थं वृत्तिः स्वीकार्यैवेति कारिकाऽभिप्रायः।

ननु वाक्यजन्यज्ञानस्य पदार्थसंसर्गावगाहितया कथं निर्विकल्पकत्वम्। उच्यते। वाक्यजन्यज्ञानविषयत्वे हि न पदार्थसंसर्गत्वं तन्त्रम्, अनभिमतसंसर्गस्यापि वाक्यजन्यज्ञानविषयत्वापत्तेः, किन्तु तात्पर्यविषयत्वम्॥

प्रकृते च 'सदेव सोम्येदमग्र आसीत्' छा०-६-२-१ इत्युपक्रम्य 'तत्सत्य स आत्मा तत्त्वमसि श्वेतकेतो' छा०-६-८-७ इत्युपसंहारे विशुद्धे ब्रह्मणि वेदान्तानां तात्पर्यमवसितमिति कथ तात्पर्याविषयसंसर्गमवबोधयेत्।

ननु सोऽयं देवदत्त इत्यादिवाक्यजन्यं ज्ञानं संसर्गावगाहि वाक्यजन्यज्ञानत्वात् गामानयेति वाक्यजन्यज्ञानवत्। उक्तवाक्यजन्यं ज्ञानं न निर्विकल्पकं संसर्गावगाहित्वात्तद्वदिति चेत्याशयेन शङ्कते-नन्विति। भवेदेवं यदि वाक्यजन्यज्ञानविषयत्वे पदार्थसंसर्गत्वं तन्त्रं भवेन्न तु तथा, तथात्वे हि भोजनप्रकरणे सैन्धवमानयेत्यत्रानभिमतस्याश्वादिसंसर्गस्यापि (१)तत्त्वापत्तेरित्याशयेनाह—उच्यत इति। ननु पदार्थसंसर्गत्वस्य तत्र तन्त्रत्वाभावे किं तत्र तन्त्रमिति पृच्छ्यते किन्त्विति। यस्तात्पर्यविषयः स एव वाक्यजन्यज्ञानगोचरः, स च संसर्गोऽसंसर्गो चेति विशेषो नादर्तव्य इत्याह—तात्पर्य्येति।

प्रकृते तु पिप्पलमात्रे लौकिकवाक्यस्येव उपक्रमोपसंहारादितात्पर्यलिङ्गैः तत्त्वमस्यादिवेदान्तवाक्यानामद्वितीये विशुद्धे ब्रह्मणि तात्पर्यावधारणात्संसर्गस्यैव तात्पर्यगोचरत्वात्सोऽयमित्यादिवाक्यानां तात्पर्याविषयसंसर्गावगाहित्वं बाधितमित्याशयेनाह—प्रकृते इति। ननु तत्त्वमस्यादिवाक्यानां प्रसिद्धमखण्डार्थत्वं विहाय कथं संसर्गानवगाहि-

---

(१) तत्त्वापत्ते-वाक्यजन्यज्ञानविषयत्वापत्ते।

इदमेव तत्त्वमस्यादिवाक्यानामखण्डार्थत्वम्, यत्संसर्गानवगाहियथार्थज्ञानजनकत्वमिति॥ तदुक्तम्—

संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम्।
उक्ताऽखण्डार्थता यद्वा तत्प्रातिपदिकार्थता॥ १॥

प्रातिपदिकार्थमा(१)त्रपरत्वं वाऽखण्डार्थत्वमिति चतुर्थपादार्थः॥

तच्च प्रत्यक्षं पुनर्द्विविधं जीवसाक्षि ईश्वरसाक्षि चे-

ज्ञानजनकत्वमपूर्वमुक्तमित्याशङ्क्याह—इदमेवेति। (२)एवकारोऽप्यर्थे। तेन(३) च प्रातिपदिकार्थमात्रपरत्वमखण्डार्थमित्यस्य समुच्चयः। तत्राचार्य्यसम्मतिमाह—तदुक्तमिति। चित्सुखाचार्य्यैरिति शेषः। गिरां तत्त्वमस्यादिवाक्यानां संसर्गासङ्गिसम्यग्धीहेतुता या सेयमखण्डार्थतोक्ता तदनवगाहियथार्थज्ञानहेतुत्वं यत्तदिदमखण्डार्थत्वमुक्तमित्यर्थः। तासां प्रातिपदिकार्थताऽखण्डार्थतोक्तेति लक्षणस्य संसर्गपरे वाक्येऽतिव्याप्तिस्तत्रापि प्रातिपदिकार्थप्रतिपादकत्वसत्त्वादित्याशङ्क्याह—प्रातिपदिकार्थमात्रपरत्वमिति। तथा च तत्र तन्मात्रप्रतिपादकत्वाभावान्नातिव्याप्तिरिति भावः।

उक्तप्रत्यक्षज्ञानस्य साक्षिद्वैविध्येन द्वैविध्यमाह—तच्चेति। संसर्गावगाहित्वानवगाहित्वभेदेऽपि ज्ञानं चैतन्यरूपमेकमेव, तच्च जीवसाक्षीश्वरसाक्षिभेदेन द्विविधमित्यर्थः। यत्तु साक्षिपदं तज्जन्यपरम्,

---

(१) यद्वा तत्प्रातिपदिकार्थतेति पादस्य प्रातिपदिकार्थमात्रपरत्वमिति मात्रपदपूरणपूर्वकव्याख्यानाभावे संसर्गविशिष्टप्रमाजनके बोधेऽतिव्याप्तिः। तासां गिरां प्रातिपदिकार्थता तत्प्रातिपदिकार्थता, इत्येवंभूतलक्षणस्य तत्र सत्त्वादित्यर्थः।

(२) इदमेव तत्त्वमस्यादिवाक्यानामखण्डार्थत्वमित्यत्रस्थ एवकारोऽप्यर्थ इत्यर्थः। अवधारणार्थे एवकारे प्रातिपदिकार्थमात्रपरत्वरूपलक्षणान्तरस्यानवकाशादिति। (३) तेन च-अप्यर्थकेन एवकारेण च।

ति। तत्र जीवो नामान्तःकरणावच्छिन्नं चैतन्यम्। तत्साक्षि तु अन्तःकरणोपहितं चैतन्यम्। अन्तःकरणस्य विशेषणत्वोपाधित्वाभ्यामनयोर्भेदः। विशेषणं च कार्यान्वयि व्यावर्तकम्। उपाधिश्च कार्यानन्वयी व्यावर्तको वर्त-

तथा च जीवसाक्षिजन्यमीश्वरसाक्षिजन्यमिति द्विविधमित्यर्थ इति केचित्(१)। तच्चोपादेयम्। ज्ञानस्य चैतन्यरूपत्वप्रतिपादनात्(२)। तत्र जीवसाक्षिनिरूपणस्य जीवनिरूपणाधीनत्वाज्जीवस्वरूपनिरूपणपूर्वकं तत्साक्षिस्वरूपं लक्षयति–तत्रेति। जीवसाक्षीश्वरसाक्षिणोर्मध्ये। अन्तःकरणस्य विशेषणत्वे चैतन्यस्य जीवत्वं तस्योपाधित्वे तस्य तत्साक्षित्वमिति तयोर्भेदः, एतदेव स्फोटयति—अन्तःकरणस्येति। विशेषणोपाध्योर्वर्त्तमानत्वे सति व्यावर्त्तकत्वं यद्यपि समानम्, तथाऽपि कार्यान्वयित्वतदनन्वयित्वभेदात्तद्विशिष्टतदुपहितचैतन्ययोरपि भेद इत्याशयेनाह—विशेषणं चेति। कार्यान्वयि व्यावर्तकं वर्तमानं चेत्यपि बोध्यम्। तथा च कार्यान्वयित्वे सति वर्तमानत्वे सति व्यावर्तकत्वं विशेषणत्वम्। कार्यानन्वयित्वे सति यथोक्तत्वमुपाधित्वम्। कार्यपद-

(१) शिखामणिकारः।

(२) चैतन्यस्य च जन्यत्वायोगादिति शेषः। वस्तुतस्तु ज्ञानस्य स्वरूपतोऽजन्यत्वेऽपि वृत्तिरूपज्ञानस्य वृत्तिविशिष्टज्ञानस्य वा जन्यत्वं स्वीकृतमेव, तथा च जीवसाक्षिजन्यमीश्वरसाक्षिजन्यमिति भेदः साधीयान्। तथैव मणिप्रभाकारेण व्याख्यातम्—जीवस्य यः साक्षी तज्जन्यमित्यादि। तथात्वे एव 'एवं साक्षिद्वैविध्येन प्रत्यक्षज्ञानद्वैविध्य'मित्युत्तरग्रन्थसङ्गतिः। अन्यथा—जीवसाक्षि ईश्वरसाक्षि चेति वाक्येन साक्षिद्वैविध्यनिरूपणे प्रत्यक्षज्ञानद्वैविध्यं निरूपितमित्युत्तरग्रन्थसङ्गतिः स्फुटैव। तत्र च यत्तु पुनर्द्विविधमिति स्वशब्देन प्रक्रमणात् प्रस्माज्जीवेश्वरसाक्षिणो निरूपणं प्रत्यक्षज्ञानत्वनात्। अतः शिखामणिकारखण्डनेन स्वकौशलं प्रदर्शयता दीपिकाकृता नैते विषये ऽस्मिन्नी सम्यगिति दृश्यते।

मानश्च । रूपविशिष्टो घटोऽनित्य इत्यत्र रूपं विशेषणम् । कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रमित्यत्र कर्णशष्कुल्युपाधिः । अयमेवोपाधिर्नैयायिकैः परिचायक इत्युच्यते ॥

प्रकृते चान्तःकरणस्य जडतया विषयभासकत्वायो-

मन्नावच्छेद्यान्वययोग्यपरम् । विशेषणोदाहरणमाह—रूपेति । रूपस्य कार्यान्वयित्वादिसत्त्वाद्विशेषणत्वम् । उपाध्युदाहरणमाह—कर्णेति । कर्णशष्कुल्याः कार्यानन्वयित्वादिमत्त्वादुपाधित्वम् । स्वोक्तोपाधेर्नैयायिकैर्व्यवह्रियमाणां संज्ञामाह—अयमेवेति ॥

नन्वस्तु कर्णशष्कुल्यादेरुपाधित्वमन्तःकरणस्य तु (१)तत्त्वं प्रयोजनशून्यम् । न हि प्रमाता विषयभासनाय स्वसाक्षिणमपेक्षते चक्षुरादिजन्यवृत्त्यवच्छिन्नचैतन्येनैव विषयप्रकाशसम्भवादित्याशङ्क्य अन्तःकरणस्य जडतया विषयभासकत्वायोगाद्, वृत्तीनां नानात्वेन तदवच्छिन्नचैतन्यस्याप्यनेकतया समस्तविषयानुसन्धातृत्वानुपपत्तेः, प्रमातुश्चान्तःकरणावच्छिन्नत्वेन विषयानुसन्धानार्थमन्यापेक्षत्वात्तदन्वितस्य ब्रह्माभिन्नस्य साक्षिण आवश्यकत्वात्तदुपाधित्वमन्तःकरणस्यावश्यमभ्युपेयमित्याशयेनाह—प्रकृत इति । ननु जीवसाक्षिणो ब्रह्माभेदेन स्वयंप्रकाशत्वेन सर्वविषयानुसन्धातृत्वाभ्युपगमे ब्रह्मण एकत्वात्तदभिन्नसाक्षिणोऽपि एकत्वाच्चैत्रावगते मैत्रस्याप्यनुसन्धानप्रसङ्ग इत्याशङ्क्या-

---

(१) तत्त्वम्—उपाधित्वम् । अन्तःकरणस्य जीवसाक्षिचैतन्योपाधित्वं निष्प्रयोजनम् । यदि प्रमाता विषयभासनाय स्वसाक्षिणमपेक्षेत, स्यात् सप्रयोजनत्वम् । प्रमाता हि चक्षुरादिजन्यवृत्त्यवच्छिन्नचैतन्येनैव विषयं भासयिष्यति इति चेन्न । जडेनान्तःकरणेन विषयावभासायोगात्, नानावृत्त्यवच्छिन्ननानाचैतन्येन समस्तविषयानुसन्धातृत्वानुपपत्तेः, प्रमात्रा च । असहायेन विषयानुसन्धानं न स्यात् । अतः प्रमात्रन्वितो ब्रह्माभिन्नः अन्तःकरणोपहितः साक्षी स्वीकार्यः । तथा चान्तःकरणस्य जीवसाक्षिचैतन्योपाधित्वमावश्यकमिति तात्पर्यम् ।

गेन विषयभासकचैतन्योपाधित्वम्। (१)अयं च जीवसाक्षी प्रत्यात्म नाना। एकत्वे मैत्रावगते। चैत्रस्याप्यनुसन्धानप्रसङ्गः। ईश्वरसाक्षि तु मायोपहितं चैतन्यम्। तच्चैकम्। तदुपाधिभूतमायाया एकत्वात्। 'इन्द्रो मायाभिः पुरुरूप ईयते' इत्यादिश्रुतौ मायाभिरिति बहुवचनस्य मायागतशक्तिविशेषाभिप्रायतया मायागतसत्त्वरजस्तमोरूपगुणाभिप्रायतया वोपपत्ते ॥

पाधिभेदेन तस्य नानात्वस्वीकाराददोष इत्याह—अयं चेति। एवं जीवसाक्षिणं निरूप्येश्वरसाक्षिणं निरूपयति—ईश्वरसाक्षीति। तदपि जीवसाक्षिवन्नाना किं वैकमित्यपेक्षायामाह—तच्चैकमिति। तत्र हेतुमाह—तदिति। अनाद्यनिर्वचनीयत्वे सति विपर्ययोपादानभूता विक्षेपशक्तिप्रधाना माया। ननु तस्या एकत्वं मायाभिरिति श्रुतिविरुद्धमित्याशङ्क्याह—इन्द्र इति। इन्द्रो निरङ्कुशैश्वर्यः परमात्मा मायाभिः पुरुरूपो बहुरूप ईयते प्रतीयते, यथा वह्न्यादेर्दाहकत्वप्रकाशकत्वादिकार्यदर्शनात्तदनुकूला शक्तिविशेषाः कल्प्यन्ते तथा जगद्रूपविविधकार्यदर्शनान्मायायास्ते कल्प्यन्त इति तदभिप्रायतयेत्यर्थः ॥

ननु मुख्यार्थपरित्यागे किं कारणमित्यत आह—अनेकश्रुतिस्मृतिगतैक-

---

(१) अयञ्चेति। यद्यपि सर्वेषु पुस्तकेषु अयञ्च जीवसाक्षीति पुंलिङ्गप्रयोग उपलभ्यते। तथाऽपि इदञ्च जीवसाक्षि इति नपुंसकप्रयोगेण भाव्यम्, जीवसाक्षीश्वरसाक्षिणो प्रत्यक्षशोधेनान्वयोश्च निपतनपुंसकत्वात्। यद्यपि कथञ्चिदन्वयेऽप्युपपत्तिः शक्यते कर्तुं तथापि टीकायामपि जीवसाक्षिणं निरूप्येश्वरसाक्षिणं निरूपयतीति सर्वेषु पुस्तकेषूपलभ्यते, तत्तु पुस्तकान्तरेऽव मूले 'ईश्वरसाक्षि तु' इत्यत्र नपुंसकप्रयोगोपलम्भे। तथा च विशेष्याभिन्नस्य साक्षिणः स्थाने क्लीबे प्रयोग आवश्यकः। अथवा कालीनादिपदवत् पुंस्त्वमिति।

ईश 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।' श्वे० ४।१०। 'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजास्सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य' ॥' श्वे० ४।५। 'तरत्यविद्या विततां हृदि यस्मिन्निवेशिते। योगी मायाममेयाय तस्मै विद्यात्मने नमः ॥ १॥' इत्यादि श्रुतिस्मृतिषु एकवचनबलेन लाघवानुगृ-

वचनसिद्धतदेकत्वनिश्चय एवेत्याह—मायां त्विति। नन्विदमेकवचनं जात्यभिप्रायकं किं न स्यादित्याशङ्क्यैतच्छङ्कानिवर्तकैकपदयुक्तां श्रुतिं पठति—अजामिति। जन्मशून्यामनादिभूतां स्वसमानजातीयेतरप्रकृतिशून्यामेकां लोहितशुक्लकृष्णां रजःसत्त्वतमोमयीं बह्वीः प्रजाः समानरूपास्त्रिगुणात्मिकाः सृजमानाम् एकोऽजन्मा जीवो जुषमाणः सेवमानोऽनुशेते तत्तादात्म्यापन्नो भवति जहात्येनां भुक्तभोगामजोऽन्य ईश्वर इत्यर्थः। मायाया एकत्वं श्रुतितात्पर्यसिद्धमिति कथं ज्ञातं श्रुतितात्पर्यस्य दुरूहत्वादित्याशङ्क्य स्मृतिकारानुसारेणेत्याशयेन पराशरस्मृतिं पठति—तरतीति। यस्मिन् परात्मनि हृदि निवेशिते वृत्त्यारूढे धृते योगी अविद्यां तरति तस्मै ज्ञानस्वरूपायामेयाय वृत्त्यवच्छिन्नचैतन्यागोचराय नमः। अविद्यां विशिनष्टि-विततामिति। प्रपञ्चाकारेण परिणतत्वात् सर्वत्र व्याप्तामित्यर्थः। ननु तन्निवृत्तावपि नानर्थनिवृत्तिः, सर्वानर्थभूताया मायाया अनिवृत्तत्वादित्याशङ्क्याह—मायामिति। स्वाश्रयान्यामोहकत्वव्यामोहकत्वविशेषेऽपि वस्तुतो न(१)तयोर्भेद इत्याशयः। ननु स्मृतावपि जातावेकवचनस्य सम्भवादेकपदस्याप्युत्पर्यर्थकतया अपि सुवचत्वात्कथं तदेकत्वनिश्चय इत्याशङ्क्याह—लाघवेनेति। 'अविद्यायामन्तरे वर्तमाना' (का० १।२।५) 'मम माया दुरत्यया' (भ० गी० ७।१४) इत्यादिश्रुतिस्मृतीनाम् आदि-

(१) मायाविद्ययो।

हीतेन मायाया एकत्वं निश्चीयते । ततश्च
ईश्वरसाक्षि तच्चानादि तदुपाधेर्मायाया अनादित्वात् ॥

मायावच्छिन्नं चैतन्यं परमेश्वरः, मायाया विशेषणत्वे ईश्वरत्वमुपाधित्वे साक्षित्वमिति ईश्वरत्वसाक्षित्वयोर्भेदः

पदेन सङ्ग्रहः । उपसंहरति—ततश्चेति । यथोपाधिभूतमायाया एकत्वात्तस्यैकत्वं तथा तस्या अनादित्वात्तस्याऽनादित्वमपीत्याह-तच्चेति । तच्चैतन्यमनाद्यपीत्यर्थः ॥

ईश्वरसाक्षिज्ञानस्येश्वरज्ञानापेक्षत्वादाह-मायेति । पूर्ववदत्रापि । मायाया विशेषणत्वोपाधित्वाभ्यामीश्वरत्वसाक्षित्वयोर्भेद इत्याह—मायाया इति । तथा च यथा नास्ति (१)पाचकपाठकयोर्भेदः, किन्तु पाचकत्वपाठकत्वयोस्तद्वदीश्वरतत्साक्षिणोर्भेदोऽपि त्वीश्वरत्वसाक्षित्वयोरित्यर्थः ।

ननु मायाया एकत्वादीश्वरसाक्षिण एकत्वं तथा तदवच्छिन्नस्याप्येकत्वावश्यंभावात्कथं तस्य ब्रह्मादिरूपेण भेदः(२) । तथा च तस्य विशेषणभेदमूलत्वात्तद्भेदे च तस्या एवोपाधितया तदुपहितस्याप्ये-

---

(१) यथा यो हि पाचकः स एव पाठकश्चेत् पाचकव्यक्तेः पाठकव्यक्तिर्न भिन्ना, तथाऽपि तत्रत्ये पाचकत्वपाठकत्वे भिन्ने एव । एवमीश्वरत्वसाक्षिणोः जीवसाक्षिणोश्च न भेदः, किन्तु जीवत्वसाक्षित्वरूपयोर्धर्मयोरेव भेदः ।

(२) भेदः तस्येति पाठो गपुस्तके । खपुस्तके यद्यपि तथाऽपि तस्येति पाठः । परञ्च तदग्रवर्ती उत्तरस्य तु विगुणेत्यादि पाठः । सर्वेषु पुस्तकेषु-तस्यैवोपाधितया तदुपहितस्याप्यनेकत्वोपपत्त्यात् कथं तदेकता इति पाठः दृश्यते, तथाप्यसङ्गत एव सः प्रतिभाति । अस्मदुपन्यस्तपाठस्यायमर्थः—तथा च तस्य-ब्रह्मादिभेदस्य, विशेषणभेदमूलकत्वाभावात् तत्र च तस्या मायाया एव उपाधितया तदुपहितस्याप्येकत्वौचित्यात्कथं तदनेकता-ब्रह्माद्यनेकत्वा-नुपपत्त्यादिरर्थः ।

न तु धर्मिणोरीश्वरतत्साक्षिणोः ॥

स च परमेश्वर एकोऽपि स्वोपाधिभूतमायानिष्ठसत्त्वरजस्तमोगुणभेदेन ब्रह्मविष्णुमहेश्वर इत्यादिशब्दवाच्यतां लभते ॥

नन्वीश्वरसाक्षिणोऽनादित्वे 'तदैक्षत बहु स्यां प्रजायेय' छा० ६।२।१ इत्यादिना सृष्टिपूर्वसमये परमेश्वरस्या-

---

कत्वौचित्यात्कथं तदनेकतेत्याशङ्क्य यथा मायोपाधिगतगुणभेदाभिप्रायेण तदनेकत्वव्यपदेशस्तथा तद्गतगुणावच्छेदेनेश्वरभेदो, न तु वस्तुत इत्याशयेनाह—स चेति । उपाधिपदमत्र विशेषणपरम् । तथा च मायावच्छिन्नेश्वरचैतन्यमेवोद्भूतसत्त्वगुणमायावच्छिन्नं पालयितृ-विष्णु नारायणादिशब्दवाच्यतां भजते, तदेवोद्भूतरजोगुणमायावच्छिन्नं स्रष्टृ—ब्रह्म—विधात्रादिशब्दप्रतिपाद्यतां लभते, तदेवोद्भूततमोगुणमायावच्छिन्नं संहर्तृ-महेश्वर-रुद्रादिशब्दाभिधेयतामधिगच्छति। अथ योह खलु वा वास्य राजसोंऽशोऽसौ योऽयं ब्रह्मा, अथ योह खलु वा वास्य तामसोंऽशोऽसौ स योऽयं रुद्रो, अथ योह खलु वा वास्य सात्त्विकोंऽशोऽसौ स योऽयं विष्णुरिति मैत्रेयोपनिषदि तथैवावगतेरित्यर्थः । उपास्य तु त्रिगुणमायावच्छिन्नमेव विष्णुमहेशगणेशदिनेशदुर्गारूपेण स्थितं न त्वेकैकगुणप्रधानमायाविशिष्टमुपास्यं तस्य निरङ्कुशैश्वर्यवत्त्वाश्रवणादिति द्रष्टव्यम् ।

(१) नन्वीक्षणस्येश्वरसाक्षिणः सृष्टिपूर्वकालीनत्वप्रतिपादनात्तस्यानादित्वं बाधितम्, तस्य सादित्वे ईश्वरस्याप्यनादित्वं बाधितमिति शङ्कते—नन्विति । यथाऽभिव्यञ्जकान्तःकरणवृत्तेः सादित्वेन तत्प्रति-

---

(१) समानाधिकरणे षष्ठ्यौ। तथा च ईश्वरसाक्षिण ईक्षणस्य सृष्टिपूर्वकालिकत्वप्रतिपादनात् कालिकावधिरहितत्वस्यानादित्वस्याभाव ईश्वरसाक्षिणि तस्येक्षणस्य सादित्वे तद्विशिष्टस्येश्वरस्यापि सादित्वमिति शङ्कते—नन्विति ।

गन्तुकमीक्षणमुच्यमानं कथमुपपद्यते ? । उच्यते । यथा येन्द्रियसन्निकर्षादिकारणवशेन जीवोपाध्यन्तःकरणस्य भेदा जायन्ते, तथा सृज्यमानप्राणिकर्मवशेन परमेश्वरोपाधिभूतमायाया वृत्तिविशेषा(१) इदमिदानीं स्रष्टव्यमिदमिदानीं पालयितव्यमिदमिदानीं संहर्तव्यमित्याद्याकारा जायन्ते । तासां च वृत्तीनां सादित्वात्तत्प्रतिबिम्बितं चैतन्यमपि सादीत्युच्यते । एवं साक्षिद्वैविध्येन प्रत्यक्षज्ञानद्वैविध्यम् । प्रत्यक्षत्वं च ज्ञेयगतं ज्ञप्तिगतं चेति निरूपितम् ॥

तत्र ज्ञप्तिगतप्रत्यक्षत्वस्य सामान्यलक्षणं चित्त्व(२)मेव

बिम्बितजीवसाक्षिस्वरूपज्ञानस्यापि सादित्वं तथेक्षणाद्यभिव्यञ्जकमायावृत्तेः सादितया तत्प्रतिबिम्बितेश्वरसाक्षिचैतन्यस्येक्षणादिज्ञानस्वरूपस्यापि सादित्वमतो न तयो स्वतोऽनादित्वे बाधकमित्याशयेनाह-उच्यत इति । एवं साक्षिद्वैविध्यप्रतिपादनात्तस्यैव तत्तद्वस्त्वनुगतत्वेन ज्ञानत्वात्प्रत्यक्षज्ञानद्वैविध्यमपि सिद्धमित्याह-एवमिति । एवं साक्षिद्वैविध्यनिरूपणाज्जीवेश्वरसाक्षिजन्यप्रत्यक्षभेदेन प्रत्यक्षज्ञानस्य द्वैविध्यं सिद्धमिति तु न(२) रम्यं ज्ञप्तिगतं प्रत्यक्षत्वं चित्त्वमेवेत्युत्तरग्रन्थविरोधात् । कञ्चिद्विशेषमभिधातुं वृत्तमनुवदति-प्रत्यक्षत्वमिति ।

तत्र-ज्ञेयगतज्ञप्तिगतप्रत्यक्षत्वयोर्मध्ये । नन्वनुमित्यादावतिव्याप्ति-

(१) जायन्त इत्यनेनान्वयः ।

(२) वस्तुतस्त्विदमेव रम्यं तत्र मूलस्थ पुनर्द्विविधमिति मूलानुसारात् तत्र जीवसाक्षीति पदस्य जीवसाक्षिजन्यपरत्वे औचित्यं दर्शितमधस्तादस्माभिः । उत्तरग्रन्थविरोधविभीषिकाऽपि धूलिप्रक्षेपरूपैवेत्यपि दर्शितम् ।

(३) चित्त्व-स्वप्रकाशत्वम् । न चास्य स्वप्रकाशस्य प्रमेयत्वेनान्याप्तिः, प्रमेयज्ञानस्यापि स्वांशे (ज्ञानांशे) प्रत्यक्षतया सामान्यलक्षणस्य लक्ष्यत्वात् । विशेषलक्षणस्यातिव्याप्तिनिरासस्तु मूलकृतैव प्रत्यक्षविशेषनिरूपणेन करिष्यते ।

र्वतो वह्निमानित्यादावपि वह्न्याद्याकारवृत्त्युपहितचैतन्यस्य स्वात्मांशे स्वप्रकाशतया प्रत्यक्षत्वात्। तत्तद्विषयांशप्रत्यक्षत्वं तु पूर्वोक्तमेव। तस्य च भ्रान्तिरूपप्रत्यक्षे नातिव्याप्तिः, भ्रमप्रमासाधारणप्रत्यक्षत्वसामान्यनिर्वचनेन तस्यापि लक्ष्यत्वात्। यदा तु प्रत्यक्षप्रमाया एव लक्षणं वक्तव्यं तदा(१)पूर्वोक्तलक्षणेऽबाधितत्वं विषयविशेषणं देयम्। शुक्तिरूप्यादिभ्रमस्य

प्तिरित्याशङ्क्य सर्वत्रापि तत्तदाकारवृत्त्युपहितचैतन्यस्य स्वात्मांशे प्रत्यक्षत्वेन सर्वस्यापि ज्ञानस्य लक्ष्यत्वान्नातिव्याप्तिरित्याह-**पर्वत इति** 'यत्साक्षादपरोक्षाद् ब्रह्म' (बृ० ३-४-१) इत्यादिश्रुत्या चित्त्वस्यैव प्रत्यक्षत्वाभिधानाच्चिद्रूपस्य ज्ञानस्य स्वात्मांशे स्वप्रकाशतया सर्वस्यापि ज्ञानस्य प्रत्यक्षत्वादित्यर्थः। नन्वनुमित्यादौ प्रत्यक्षत्वव्यवहारः कुतो नास्तीत्याशङ्क्य तत्तद्विषयांशनिरूपितप्रत्यक्षत्वप्रयोजकस्य पूर्वोक्तस्याभावादित्याशयेनाह-**तत्तदिति**। ननु योग्यविषयस्य स्वगोचरवृत्त्युपहितप्रमातृचैतन्यसत्ताऽतिरिक्तसत्ताशून्यस्य(२)शुक्तिरूप्यादिज्ञानेऽतिव्याप्तिरित्याशङ्क्याह-**तस्येति**। प्रत्यक्षप्रमाणनिरूपणे भ्रमप्रमासाधारणप्रत्यक्षत्वसामान्यनिर्वचनमनुपपन्नं मत्वाऽऽह-**यदेति**। **प्रत्यक्षप्रमाया-** ज्ञेयगतस्य यथार्थप्रत्यक्षस्येत्यर्थः। नन्वबाधितत्वं पारमार्थिकत्वम्? उत सत्त्वमात्रम्? नाद्यः, घटादिज्ञानेऽव्या(३)प्तेः। न द्वितीयः, शुक्तिरूप्यादिज्ञानेऽतिव्याप्तेस्तादवस्थ्यादित्याशङ्क्य संसारदशायाम-

---

(१) खपुस्तके पूर्वोक्तमबाधितत्वमिति पाठः, स चायुक्तः अबाधितविशेषणस्य पूर्वमनुक्तत्वात्।

(२) शुक्तिरूप्यादिदर्शने इति पाठो गपुस्तके। अस्मिन् पाठे स्वगोचरेत्यादिशुक्तिरूप्यादेर्विशेषणम्। तथा च तत्र 'पूर्वोक्तलक्षणस्य' इति शेषः पूरणीयः। पूर्वोक्तलक्षणस्य अतिव्याप्तिरित्यर्थः।

(३) वेदान्तमते घटादीनामपि बाधितत्वात्।

लक्षणाभावान्नातिव्याप्तिः ॥

ननु (१)विसंवादिप्रवृत्त्या भ्रान्तिज्ञानसिद्धावपि प्रातिभासिकतत्कालोत्पन्नरजतादिविषयत्वे न प्रमाणम्. देशान्तरीयरजतस्य क्लृप्तस्यैव तद्विषयत्वसंभवादिति चेत् न । तस्यासन्निकृष्टतया प्रत्यक्षविषयत्वायोगात् । न च ज्ञानं

बाधितत्वं विवक्षितमित्याह-**शुक्तीति**। भ्रमस्य-भ्रान्तिज्ञानस्य। भासिकत्वं प्रतीतिकालमात्रवृत्तित्व(२)मनिर्वचनीयत्वमिति यावत्। तथा च तदानीमनिर्वचनीयं रजताद्युत्पद्यते तस्य शुक्तिज्ञानबाध्यत्वात् तज्ज्ञानस्य बाधितविषयकत्वमिति भावः ।

इदमसहमानोऽन्यथाख्यातिवादी शङ्कते-**नन्विति** । यद्यपि विसंवादिप्रवृत्त्या भ्रान्तिज्ञानं सिध्यति, तस्य च विषयं विनाऽनुपपत्तिस्तद्विषयं साधयति, तथाऽपि स विषयः प्रातिभासिकस्तत्कालोत्पन्न इत्यत्र नास्ति प्रमाणमित्याह-**विसंवादीति** । यद्विषयकप्रवृत्तिस्तस्य लाभे तस्याः संवादित्वमलाभे तु विसंवादित्वं, तत्र भ्रान्तिजन्यप्रवृत्तेरित्यर्थः ननु विषयान्तरानुपपत्तिस्तत्र प्रमाणमित्याशङ्क्याह-**देशान्तरीयेति** असन्निकृष्टदेशान्तरीयं वस्तु न प्रत्यक्षविषयत्वयोग्यमिति दूषयति-**नेति** । असन्निकृष्टस्य भ्रमे भानं नोपपद्यते प्रत्यक्षसामग्र्याः सन्निकर्षघटितत्वेन तद्रहितस्य प्रत्यक्षविषयत्वायोगादिति भावः । नन्वस्तु अलौकिकः सन्निकर्ष इत्याशङ्क्य स च किं सामान्यात्मक

---

(१) विफला प्रवृत्तिर्विसंवादिनी यथा तोयबुद्ध्या मरीचिषु प्रवृत्तस्य पिपासोः । सफला प्रवृत्तिः संवादिनी यथा गाङ्गे जले पिपासोरिति ।

(२) अनिर्वचनीयत्वमिति गपुस्तके नास्ति ।

तत्र प्रत्यासत्तिः, ज्ञानस्य प्रत्यासत्तित्वे तत एव वह्न्यादेः प्रत्यक्षत्वापत्त्यानुमानाद्युच्छेदापत्तेः ॥

किं वा ज्ञानरूप इति विकल्प्य नाद्य । तत्र प्रमाणाभा(१)वात् । सन्निकृष्टधूमादिकमेव प्रत्यक्षविषयीभूत न तु तन्मात्र येन सामान्य प्रत्यासत्तिरिति कल्पना स्यादिति प्रथमपक्षपरिहारं मनसि निधाय द्वितीयं पक्ष परिहरति–**न चेति** । **तत्र**–भ्रान्तिप्रत्यक्षविषये । ज्ञेयेन रजतादिना ज्ञानमेव सन्निकर्ष इति, न च प्रमाणाभावादिति भावः । विपक्षे बाधकं हेतुमाह–**ज्ञानस्येति** । **तत एव**–ज्ञानलक्षणप्रत्यासत्तेरेव ।

(१) तत्र प्रमाणाभावादिति । अयमाशय –महानसे वह्निधूमयोर्व्याप्तिग्रहसमये धूमत्वेन वह्नित्वेन च सकलधूमवह्निव्यक्तीनामुपस्थितिर्जायते, तत्याश्चोपस्थितौ सकलधूमवह्निव्यक्तीना व्याप्यव्यापकभावो गृह्यते नो चेन्म हानसीयधूमवह्निव्याप्त्या पर्वते धूमदर्शनानन्तरमनुमितिर्न स्यात्, अतो व्याप्तिग्रहसमये सकलव्यक्त्युपस्थितये सामान्यलक्षणा स्वीकार्येति तार्किका । अत्र वदाम –धूमत्वेन वह्नित्वेन च सकलधूमवह्न्युपस्थितिश्चेत् सामान्यलक्षणया स्यात् सर्वेषा सर्वज्ञत्वमयत्नलब्धम् । तथा हि, सामान्यलक्षणा नाम प्रत्यासत्ति सन्निकर्षविशेष, स चेदसन्निहितविषयेऽपि भवति अथ च भूतभाविवर्त्तमानयावद्वस्त्या आत्मान संयुनक्ति किमवशिष्टमसार्वज्ञप्रयोजकमिति । तथा चेश्वरोऽसीति दृष्टविरुद्धमपि कल्पय। कस्ते निवारक स्यात्। अस्माभिस्तु सन्निहितधूमादिसंयुक्तस्य चक्षुष अतीतानागतासन्निहितवर्तमानविषयसमर्पणे सामर्थ्यं नोपलब्धम् । दृष्टिविरुद्ध तत्कल्पयनस्ते साहसविजृम्भितमेतत्। कथ तर्हि वेदान्तनये महानसीयधूमवह्निव्याप्त्या पर्वते तदनुमानमिति। शृणु समाहित सन् । व्याप्तिग्रहकाले महानसे महानसीयधूमवह्न्यो गोष्ठे गोष्ठीययोश्च तयोरेव व्याप्यव्यापकभावो गृह्यते, गृहीते चैव धन्पृथग् व्याप्यव्यापकभावे सामान्यतो धूमवह्निविषय तमनुमिनोति । यथा धूमो वह्निव्याप्य महानसादिषु तथोपलम्भात् पृथिवीव्याप्यगन्धवत् इति । ननु महानसादिवृत्तिप्रत्यक्षधूमे वह्निसम्बन्धस्य गृहीतत्वात् देशान्तरीयकालान्तरीयस्यानुपस्थितत्वाच्च धूमो वह्निव्याप्यो न वेति संशयो न स्यात्, सामान्यलक्षणया च सकलव्यक्त्युपस्थितौ देशान्तरीयादिषु वह्निनिरूपितव्याप्तिसन्देहो भविष्यतीति

ननु रजतोत्पादकानां रजतावयवानामभावे शुक्तौ कथं तथापि रजतमुत्पद्यते इति चेत् । उच्यते । न हि लोकसिद्धसामग्री प्रातिभासिकरजतोत्पादिका, किन्तु विलक्षणैव । तथा हि काचकामलादिदोषदूषितलोचनस्य पुरोवर्तिद्रव्यसंयोगादिदमाकारा चाकचिक्याकारा काचिदन्तःकरणवृत्तिरुदेति तस्यां च वृत्ताविदमवच्छिन्नं चैतन्यं प्रतिबिम्बते । तत्र पूर्वोक्तरीत्या वृत्तेर्निर्गमनेनेदमवच्छिन्नं चैतन्यं वृत्त्यवच्छिन्नं चैतन्यं प्रमातृचैतन्यं चाभिन्नं भव-

---

अलौकिकाऽपि प्रत्यक्षसामग्री अनुमितिसामग्रीतो बलवती, लाघवादिति भावः ।

नन्वेवं तर्हि अपूर्वरजतोत्पत्तिपक्षोऽप्यसङ्गतो रजतोपादानलौकिकतदवयवाभावात् । अलौकिकानां तेषां तदुपादानत्वे प्रमाणाभावादिति शङ्कते—नन्विति । अन्यथा उपपत्त्यभावात्पारिशेष्याद्रजतोत्पत्त्यङ्गीकारस्यावश्यकत्वात्तदनुकूला तत्सामग्री कल्पनीयेति समाधानं प्रतिजानीते—उच्यते इति । लौकिकोपादानाभावात् रजतोत्पत्तिर्न सम्भवतीति न साम्प्रतम्, उपादानोपादेययोः सादृश्यावश्यम्भावादलौकिकरजतोत्पादने न लौकिकसामग्र्यपेक्षेत्याह—न हीति । तद्व्यतिरिक्तसामग्र्यभावात्पृच्छति—किन्त्विति । यथा प्रातिभासिकं रजतं लौकिकरजतविलक्षणं तथा तदुत्पादिका सामग्र्यपि लोकप्रसिद्धसामग्रीतो विलक्षणैवेत्युत्तरमाह—विलक्षणेति । तर्हि तत्स्वरूपं वक्तव्यमित्यपेक्षायां प्रतिज्ञातमर्थमुपपादयति—तथा हीति । तत्र—चैतन्ये प्रतिबि-

---

चेत् । समानप्रकारनिश्चयस्यैव संशयविरोधित्वात् । धूमो वह्निव्याप्यो न वेत्याकारकसंशयस्य वह्निव्याप्यो धूम इति निश्चय एव विरोधी । अत्र सामान्यलक्षणाऽस्वीकारेण महानसादौ तत्तद्धूमत्वेन सामानाधिकरण्यनिश्चये सत्यपि सामान्यतो धूमत्वेन निश्चयाभावान्न संशयानुपपत्तिरिति संक्षेपः ।

ति। ततश्च प्रमातृचैतन्याभिन्नविषयचैतन्यनिष्ठा (१)शुक्तित्वप्रकारिकाऽविद्या चाकचिक्यादिसादृश्यसन्दर्शनसमुद्बोधितरजतसंस्कारसध्रीचीना काचादिदोषसमवहिता रजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च (२)परिणमते॥

म्बिते सति। **पूर्वोक्तरीत्या**—तडागादकमित्याद्युक्तरीत्या। **ततश्च**—त्रिविधचैतन्याभेदसम्पत्त्यनन्तरञ्च। **अविद्या**—रजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च परिणमत इत्यन्वयः। ननु अविद्याया एवाकाशादिप्रपञ्चोपादानत्वाभ्युपगमात्प्रतिज्ञाहानिरित्याशङ्कानिरासाय प्रमातृचैतन्येत्यादिविशेषणद्वयम्। ननु यथोक्ताविद्या सर्वदा यथोक्ताकारेण कुतो न परिणमत इति चेन्, निमित्तकारणविरहादित्यभिप्रेत्य निमित्तकारणमाह—**रजतसंस्कारेति**। यद्यपि संस्कारोऽपि सर्वदा वर्त्तते, तथाऽप्युद्बोधितस्य निमित्तत्वेत्यभिप्रेत्योक्तम्—**चाकचिक्यादीति**। चाकचिक्यादेः सादृश्यस्य सन्दर्शनेन समुद्बोधितो रजतसंस्कारस्तल्लक्षणया सामग्र्या सहकृता। ननु चाकचिक्यादिसादृश्यसन्दर्शने नीलपृष्ठत्रिकोणताऽदर्शने च किं निमित्तमित्यपेक्षायामाह—**काचादीति**।

(१) वियदाद्युपादानाविद्यातो वैलक्षण्यं द्योतयितुं विषयचैतन्यनिष्ठा शुक्तित्वप्रकारिकेति विशेषणद्वयम्। वियदाद्युपादानमूलाविद्या तु चिन्मात्राश्रिता चिन्मात्रविषया निर्विकल्पकज्ञाननिवर्त्या च, इयन्तु तूलाविद्या शुक्त्यवच्छिन्नचैतन्याश्रितरजतभिन्ना या शुक्तिस्तन्निष्ठं यच्छुक्तित्वं तत्प्रकारिका सविकल्पकज्ञाननिवर्त्या चेति वैलक्षण्यम्।

(२) अविद्या प्रातिभासिकरजताकारेण—तज्ज्ञानाकारेण—रजताकारवृत्तिरूपेण च परिणमते इत्यर्थः। वृत्तेरेव ज्ञानशब्दवाच्यत्वादिति भावः। अविद्यायाः वृत्त्याकारपरिणामप्रयोजकस्तु, इन्द्रियाणामनिर्वचनीयरजतेन सन्निकर्षाभावात् करणासहकृतेन साक्षिणा तत्प्रकाशकत्वायोगात् तज्ज्ञानासम्भवो यतः अतः साक्षिणा प्रातिभासिकस्य भासनाय—साक्षिसम्बन्ध एवेति बोध्यम्।

(१) परिणामो नाम उपादानसमसत्ताककार्यापत्तिः। विवर्तो नाम उपादानविषमसत्ताककार्यापत्तिः। प्रातिभासिकरजतं चाविद्यापेक्षया परिणामः चैतन्यापेक्षया विवर्तं

नेत्रनिष्ठकाचादिदोषसंयुक्ता परिणमत इत्युक्तम्, तत्र किंलक्षणः परिणाम इत्यपेक्षायां तल्लक्षणमाह-परिणाम इति। यदभिन्नं कार्यमुत्पद्यते तदुपादानकारणम्। तेन समा सत्ता यस्य कार्यस्य तथा, भूतकार्यस्यापत्तिः यथोक्तकार्याकारेणोद्भवः, यथा व्यावहारिकसत्ताकदुग्धे तत्समसत्ताकदधिरूपकार्यापत्तिरित्यर्थः। विवर्तेऽतिव्याप्तिवारणाय **समसत्ताकेति**। समसत्ताकपदस्यावर्त्यत्वाद् वक्ष्यमाणेऽप्युक्तत्वाच्च। विवर्तं लक्षयति-**विवर्तो नामेति**। उपादानाद्विषमा सत्ता यस्य कार्यस्य तदापत्तिः। परिणामेऽतिव्याप्तिनिरासाय **विषमसत्ताकेत्युक्तम्**। प्रातिभासिकरजतादेः परिणामत्वं विवर्तत्वं चास्तीत्याह-**प्रातिभासिकेति**। नन्वविद्यापरिणामस्य रजतस्याविद्यायां तादात्म्यसम्बन्धेन वर्तमानस्य चैतन्ये तत्सम्बन्धेनावर्तमानत्वाच्चैतन्योपादानत्वासम्भवात् कथमुक्तविवर्तता (२)रजतस्य? इत्याशङ्क्य अविद्यापरिणामस्य तदधिष्ठानाश्रितत्वनियमात्तदपि इत्याह-**अविद्येति**।

(१) यादृशी सत्ता उपादानस्य तादृशसत्ताककार्यापत्तिः परिणाम इत्यर्थः। यथा व्यावहारिकसत्ताकानां तन्तूनां व्यावहारिकसत्ताकपटभावापत्तिः सा परिणामपदवाच्या। पारमार्थिकसत्ताकस्य ब्रह्मण उपादानरूपस्य सत्तायाः विषमा—व्यावहारिकी वियदादेः, प्रातिभासिकी शुक्तिरजतादेः—सत्ता येषां तानि उपादानविषमसत्ताकानि, तानि च कार्याणि चेति तेषामापत्तिरन्यथा। तथा च ब्रह्मणो वियदादिप्रपञ्चस्य विवर्तोपादानत्वं निमित्तत्वं चेति 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' ब्र० सू० १-४-२३ इति न्यायात्। परिणाम्युपादानन्तु मायैव, सा च कचित्तुन कचिन्मूलेऽस्त्यन्यदेतत्।

(२) कथमुक्ता चैतन्यविवर्तता रजतस्य इति पाठेन भाव्यम्। अथवा अस्यैव समासघटकतया रजतस्य-चैतन्यस्य विवर्तता उक्तविवर्तता सा कथमित्येकोऽर्थः कार्यः।

इति चोच्यते। (१) अविद्यापरिणामरूपं च तद्रजतमविद्याधिष्ठाने इदमवच्छिन्नचैतन्ये वर्तते। अस्मन्मते सर्वस्यापि कार्यस्य स्वोपादानाविद्याधिष्ठानाश्रितत्वनियमात्॥

(२) ननु चैतन्यनिष्ठस्य रजतस्य कथमिदं रजतमिति पुरोवर्तितादात्म्यम्? उच्यते। यथा न्यायमते आत्मनिष्ठस्य सुखादेः शरीरनिष्ठत्वेनोपालम्भः शरीरस्य सुखाद्यधिकरणतावच्छेदकत्वात्, तथा चैतन्यमात्रस्य रजतं प्रत्यधिष्ठानतया इदमवच्छिन्नचैतन्यस्य तदधिष्ठानत्वेन इदमोऽवच्छेदकतया रजतस्य पुरोवर्तिसंसर्गप्रत्यय उपपद्यते।

नन्वेवं तर्हि पुरोवर्तितादात्म्यप्रत्ययानुपपत्तिरिति शङ्कते—नन्विति। अविद्यापरिणामस्याविद्याधिष्ठानाश्रितत्ववच्चैतन्याध्यस्तस्य रजतादेः तदवच्छेदकपुरोवर्तितादात्म्यप्रत्ययोपपत्तिरित्याशयेन समाधत्ते—उच्यत इति। ब्राह्मणोऽहं सुखी मम देहः सुखीत्येवं शरीरनिष्ठत्वेन देहस्यात्मनि सुखाद्युपलब्ध्यवच्छेदकत्ववदिदमंशचैतन्ये रजताध्यासस्यावच्छेदकत्वादुक्तप्रत्यय उपपद्यत इत्याह—तथा चैतन्येति।

नन्विदमवच्छिन्नचैतन्याध्यस्तरजतादेः साक्षिण्यनध्यस्ततया तस्य केवलसाक्षिवेद्यता। सुखादेरिवानन्यवेद्यता च (३) साम्प्रदायिकैरुच्य-

---

(१) यथा तन्तुपरिणामस्य पटस्य तन्तुदेशत्वम्, तथा अविद्यापरिणामस्य शुक्तिरूप्यस्यापि अविद्यादेशत्वम्। अविद्या च चैतन्यनिष्ठा, तथा च शुक्तिरूप्यस्यापि चैतन्यनिष्ठत्वमुचितमिति भावः।

(२) ननु अग्रे भूतलस्थतन्तुषु विद्यमानस्य पटस्य प्रत्यक्षकाले इहेदानीं पट इत्याकारो यथा तथा चैतन्यनिष्ठाविद्यायां वर्तमानस्य शुक्तिरूप्यस्य चैतन्ये रजतम् इति प्रत्ययो भविष्यति, भवति तु इदं रजतमित्याशङ्कते—नन्विति। सर्वव्यापिनः चैतन्यस्य इहेति प्रादेशिकत्वञ्च युक्तमित्याशयः।

(३) पञ्चपादिकाचार्यैः।

तस्य च विषयचैतन्यस्य तदन्तःकरणोपहितचैतन्याभिन्नतया विषयचैतन्याध्यस्तमपि रजतं साक्षिण्यध्यस्तं केवलसाक्षिवेद्यं सुखादिवदनन्यवेद्यमिति चोच्यते।

ननु साक्षिण्यध्यस्तत्वेऽहं रजतमिति प्रत्ययः स्यात्, अहं सुखीतिवदिति चेत्। उच्यते। न हि सुखादीनामन्तःकरणावच्छिन्नचैतन्यनिष्ठाविद्याकार्यत्वप्रयुक्तम् अहं सुखीति ज्ञानम्। सुखादीनां घटादिवच्छुद्धचैतन्य एवाध्यासात्, किन्तु यस्य यदाकारानुभवाहितसंस्कारसहकृताविद्याकार्यत्वं तस्य तदाकारानुभवविषयत्वमित्यैवानुगतं नियामकम्।

तथा च इदमाकारानुभवाहितसंस्कारसहकृताविद्याकार्य-

मानां कथमुपपद्यत इत्याशङ्क्याह—तस्य चेति।

ननु सुखादीनामवच्छेदकशरीरनिष्ठत्वेनोपलम्भो न सर्वदा, अहं सुखीत्यात्मनिष्ठत्वेनाप्युपलम्भदर्शनात्। तथा रजतादेरप्यन्तःसाक्षिण्यध्यस्तत्वाभ्युपगमादहं मनुष्य इतिवदहं रजतम्, अहं सुखीतिवदहं रजतवान् इत्येव वा प्रत्ययः कदापि कुतो न भवति इत्याशङ्कते-नन्विति। न हि यत्र (१) यदध्यासस्तस्य तन्निष्ठाविद्याकार्यत्वप्रयुक्तं तन्निष्ठतयैव भानमिति नियमः सम्भवति, सुखादेर्घटादिवत् शुद्धचैतन्यध्यस्तत्वेऽप्यहं सुखीति प्रत्ययदर्शनाद् इत्याशयेन समाधत्ते-उच्यत इति। तर्हि घटादेः सुखादेः शुक्तिरूप्यादेश्च तत्तत्प्रतीतिविषयत्वे पृथक्पृथक् नियामकमनुगतैकमिति पृच्छति-किन्त्विति। नाना नियामकाभ्युपगमे गौरवादनुगतैकनियामकस्वीकार उचित इत्युत्तरमाह यस्येति।

उक्तनियामकं सर्वत्र योजयति-तथा चेति। निरुक्तानुगतनि-

(१) यदध्यासस्तस्य इति पाठो ग पुस्तके।

त्वात् घटादेरिदमाकारानुभवविषयत्वम् । अहमाकारानुभवाहितसंस्कारसहिताविद्याकार्यत्वादन्तःकरणादेरहमाकारानुभवविषयत्वम् । शरीरेन्द्रियादेरुभयविधानुभवसंस्कारसहिताविद्याकार्यत्वादुभयविधानुभवविषयत्वम् । तथा चोभयविधोऽनुभवः इदं शरीरमहं देहोऽहं मनुष्योऽहं ब्राह्मण इदं चक्षुरहं काण इदं श्रोत्रमहं बधिर इति ॥

प्रकृते च प्रातिभासिकरजतस्य प्रमातृचैतन्याभिन्नेदमंशावच्छिन्नचैतन्यनिष्ठाविद्याकार्यत्वेऽपि इदं रजतमिति सत्यस्थलीयेदमंशाकारानुभवाहितसंस्कारजन्यत्वादिदमाकारानुभवविषयता, न त्वहं रजतमित्यहमाकारानुभवविषयतेत्यनुसन्धेयम् ॥

यामके सति अयं घट अहम्, इतीदमाकारानुभवस्याहमाकारानुभवस्य च स्पष्टत्वमभिप्रेत्योभयविधाकारानुभवमावेदयति–तथा चेति । यस्योभयविधानुभवस्य विषयत्वं देहेन्द्रियादेः स चोभयविधोऽनुभव एवमित्यर्थः ।

निरुक्तनियामकं प्रकृते योजयति–प्रकृते चेति । यद्यपि शुक्तिरूप्यादेः प्रमातृचैतन्याभिन्नेदमंशावच्छिन्नचैतन्यनिष्ठाविद्याकार्यत्वमस्ति तथाऽपि तत्सहकारिकारणम् इदं रजतमित्यादिसत्यरजतस्थलीयेदमाकारानुभवाहितसंस्कार (१), अतः तस्येदमाकारानुभवविषयत्वं न त्वहमनुभवविषयत्वमिति भावः ।

नन्वस्तु शुक्तिरूप्यस्येदमाकारानुभवविषयत्वं तथाऽपि न तद्विषयाऽविद्यावृत्तिराश्रयणीया, (२) तस्य साक्षादनावृत्तसाक्षिसम्बन्धि-

---

(१) संस्कारः तत्सहकारिकारणमित्यन्वयः ।

(२) शुक्तिरूप्यस्य ।

नन्वेवमपि मिथ्यारजतस्य साक्षात्साक्षिसम्बन्धितया भानसंभवे रजतगोचरज्ञानाभासरूपाया अविद्यावृत्तेरभ्युपगमः किमर्थः ? इति चेत्। (१)न। रजगोचरवृत्त्युपहितचैतन्यभिन्नसत्ताकत्वाभावस्य विषयापरोक्षरूपतया रजतस्यापरोक्षत्वसिद्धये तदभ्युपगमात् ॥

तयाऽपरोक्षभानसम्भवादिति स्वयूथ्यः (२)शङ्कते-नन्वेवमपीति। यद्यपि शुक्त्यध्यस्तरजतस्य साक्षिचैतन्याभिन्नसत्ताकत्वमस्ति, तथाऽपि न तस्यापरोक्षत्वं सम्भवति साक्षिचैतन्यस्य रजतगोचरवृत्त्युपहितत्वाभावात् तस्मात्तदपरोक्षतार्थमविद्यावृत्तेरावश्यकतेति समाधत्ते-नेति। चैतन्यभिन्नसत्ताकत्वाभावस्य—चैतन्याभिन्नसत्ताकत्वस्य।

नन्वेवमेकं सन्धातुं प्रवृत्तस्यापरं च्यवत इति न्यायापात, रजतापरोक्षतासिद्धयेऽविद्यावृत्त्यभ्युपगमे प्राभाकरमतवद्विशिष्टज्ञानानभ्युपगमप्रसङ्गेन रजतज्ञानस्य भ्रमत्वहानात्। प्राभाकरमते हि इदं रजतमित्यत्र ज्ञानद्वयमङ्गीकृतम्। तत्रेदमिति पुरोवर्तिविषयमनुभवात्मकं ज्ञानं रजतमित्यसन्निकृष्टरजतविषयं स्मरणात्मकम्, अतो वस्तुद्वयतादात्म्यावगाहिविशिष्टज्ञानं क्वापि नास्तीति सर्वमपि ज्ञानं यथार्थमेवेति भ्रमज्ञानासिद्धिः, तद्वद्वचनमतेऽपि (३)वृत्तितद्विषयभेदाभ्युपगमे वस्तु-

---

(१) गपुस्तके न इति पदं नास्ति। टीकाऽनुरोधादपि स्थेयमेव।

(२) कखपुस्तकयोः स्वयूथी इति पाठः, गपुस्तके स्वयूथ्यमिति पाठश्च। स्वयूथ्यः सिद्धान्त्येकदेशीत्यर्थः।

(३) तस्या वृत्तेर्विषयः तद्विषयः वृत्तिश्च तद्विषयश्च वृत्तितद्विषयौ तयोर्भेदाभ्युपगमः तस्मिन्। वृत्तिभेदो यथा एका इदमाकारा अपरा रजतज्ञानाकारा। विषयभेदो यथा मायायाः पुरोवर्ति वस्तु विषयः अन्यस्या अविद्यापरिणामरूपं प्रातिभासिकं रजतमिति।

(१)नन्विदंवृत्ते रजताकारवृत्तेश्च प्रत्येकमेकैकविषयत्वे गुरुमतवद् विशिष्टज्ञानानभ्युपगमे कुतो भ्रमज्ञानसिद्धिरिति चेत् । न(२) । वृत्तिद्वयप्रतिबिम्बितचैतन्यस्यैकस्य सत्यमिथ्यावस्तुतादात्म्यावगाहित्वेन (३)भ्रमत्वस्य स्वीकारात् । अत एव साक्षिज्ञानस्य सत्यासत्यविषयतया प्रामाण्यानियमाद् अप्रामाण्योक्तिः साम्प्रदायिकानाम् ॥

द्वयतादात्म्यावगाह्येकज्ञानानभ्युपगमाद् भ्रमज्ञानं न सिध्यतीति स एव शङ्कते—**नन्विदमिति** । वृत्तिभेदेऽपि नास्ति ज्ञानभेदस्तयोरेकदेशस्थत्वेन तत्प्रतिबिम्बितचैतन्यस्यैकत्वान्नैवमित्याह–**नेति** । यत एकस्यैव साक्षिज्ञानस्य सत्यासत्यवस्तुविषयत्वमत एव तस्याप्रामाण्योक्तिः साम्प्रदायिकानां सङ्गता इत्याह–**अत एवेति** ।

---

(१) इदमाकारा पुरोवर्तिविषयाऽन्तःकरणवृत्तिरेका प्रातिभासिकरजतविषयाऽविद्यावृत्तिरपरा । तथा च यथा व्यस्ताश्रयेषु पत्र-शुष्कपत्र-भ्रमर-जपाकुसुमेषु गृह्यमाणैर्हरित-पीत-नील-रक्तवर्णैर्न जात्वपि भ्रमरे चित्ररूपी भ्रमर इति विशिष्टबुद्धिः, तथैव इद रजतमिति विशिष्टबुद्धिर्भिन्नविषयाभ्यां वृत्तिभ्यां नैव भविष्यतीत्याक्षेप्तुरभिप्रायः ।

(२) न इति पद गपुस्तके नास्ति । टीकायान्त्वास्त्येव ।

(३) ननु इदं रजतमित्यत्र वृत्तिद्वयं स्वीकृतं पूर्वग्रन्थे तत्रेदमाकाराऽन्तःकरणवृत्तिरेका तया च पुरोवर्ति वस्तु गृह्यते, इदमवच्छिन्नचैतन्यनिष्ठशुक्तित्वाविद्यायाः परिणामरूपा वृत्तिर्द्वितीया तया च रजत गृह्यत इति वृत्तिद्वयेन विषयद्वये गृहीते ज्ञानद्वयमेवेद तथा च रजतमिदमित्येक ज्ञान भ्रमात्मकमिति सिद्धान्तो भज्येत प्राभाकरमतप्रवेशश्च स्यादिति चेन्न । भिन्नविषयकवृत्त्योर्भेदेऽपि तयोः प्रतिबिम्बितस्य चैतन्यस्यैक्यात् । प्रत्यक्षस्थले सर्वत्र वृत्ति-प्रमातृविषयावच्छिन्नचैतन्यानां पूर्वोक्तप्रणाल्या ऐक्यावश्यम्भावात् तस्य च प्रत्यक्षज्ञानस्य व्यावहारिकसत्येन पुरोवर्तिवस्तुना प्रातिभासिकेन रजतवस्तुना च तादात्म्यावगाहितया विशिष्टज्ञानत्व भ्रमत्वं च सिद्धमिति ।

ननु सिद्धान्ते देशान्तरीयरजतमप्यविद्याकार्यमध्यस्तं चेति कथं शुक्तिरूप्यस्य ततो वैलक्षण्यमिति चेत् । न । त्वन्मते सत्यत्वाविशेषेऽपि केषाञ्चित्क्षणिकत्वं केषाञ्चित्स्थायित्वमित्यत्र यदेव नियामकं तदेव स्वभावविशेषादिकं ममापि । यद्वा घटाद्यध्यासे अविद्यैव दोषत्वेनापि हेतुः, शुक्तिरूप्याद्यध्यासे तु काचादयो दोषा अपि । तथा चागन्तुकदोषजन्यत्वं प्रातिभासिकत्वे प्रयोजकम् । अत एव स्वप्नोपलब्धरथादीनामागन्तुकनिद्रादिदोषजन्यत्वात्प्रातिभासिकत्वम् ॥

ननु स्वप्नस्थले पूर्वानुभूतरथादेः स्मरणमात्रेणैव व्यव-

नन्वेवं महता प्रयासेन शुक्तिरूप्यस्याविद्याकार्यत्वाध्यस्तत्वसाधनं देशान्तरीयरजताद्वैलक्षण्यसिद्ध्यर्थम्(१)तच्च न संभवति, भवत्सिद्धान्ते देशान्तरीयरजतादेरपि तथात्वाभ्युपगमात्(२)। तथा चोपलभ्यमानवैलक्षण्ये को हेतुरिति नैयायिकः शङ्कते-ननु सिद्धान्त इति । त्वन्मते सत्यत्वाविशेषेऽपि शब्दज्ञानेच्छादीनां क्षणिकत्वं घटादीनां स्थायित्वमिति वैलक्षण्ये यन्नियामकं तदेव ममाप्यस्त्विति परिहरति-नेति । कालान्तरोपलम्भानुपलम्भ दिक्रमादिपदेन गृह्यते । तथा च पक्षद्वयेऽपि दोषपरिहारयोः समत्वादेकस्य नियोगोऽनुपपन्न(३)इति भावः । मम त्वन्यदपि वैलक्षण्यं नियामकमित्याशयेनाह-यद्वेति । अत एव—आगन्तुकदोषजन्यत्वस्य प्रातिभासिकत्वप्रयोजकत्वादेव ।

ननु स्वप्नोपलब्धरथादीनां प्रातिभासिकत्वाभ्युपगमे तेषां तात्कालिकोत्पत्तिरावश्यकी सा चानुपपन्ना स्मरणमात्रेण तद्व्यवहारोपपत्त्या सृष्टिकल्पनानौचित्यादित्यसत्ख्यातिवादी शङ्कते-ननु स्वप्नेति । प्रती-

---

(१) कृत्यमिति शेषः । (२) अविद्याकार्यत्वाध्यस्तत्वाभ्युपगमादित्यर्थः ।
(३) 'यत्रोभयोः समो दोषः परिहारस्तयोः समः' इति न्यायात् ।

हारोपपत्तौ न रथादिसृष्टिकल्पनं गौरवादिति चेत्। न। रथादेः स्मरणमात्राभ्युपगमे रथं पश्यामि स्वप्ने रथमद्राक्षमित्याद्यनुभवविरोधापत्तेः, 'अथ रथान् रथयोगान् पथः सृजते' बृ० ४।३।१० इति रथादिसृष्टिप्रतिपादकश्रुतिविरोधापत्तेश्च। तस्माच्छुक्तिरूप्यवत् स्वप्नोपलब्धरथादयोऽपि प्रातिभासिकाः यावत्प्रतिभासमवतिष्ठन्ते॥

तिविरोधान्नैवमित्याह-**नेति**। स्वप्ने रथादेः स्मरणमात्रमस्तीत्ययुक्तं, रथं पश्यामि गीतं शृणोमीत्याद्यनुभवविरोधात्। ननु दोषवशात् स्मरामीत्यस्य (१) प्रमोषात्पश्यामीत्याद्याकारा प्रतीतिरित्याशङ्क्याह-**स्वप्न इति**। दोषनिवृत्तिकालेऽपि स्वप्ने रथमद्राक्षमित्येव प्रतीतिर्न तु स्मृतवानिति प्रतीतिरत उक्तप्रत्ययव्यवहारस्य न स्मृतिमात्रादुपपत्तिरिति भावः। अत्रानुभवपदं प्रतीतिपरम्। ननु जाग्रत्कालीनप्रतीतिरपि न विरुध्यते, स्वप्ने स्मृतेरनुभवाकारतयोत्पन्नत्वेन तथैव परामर्शौचित्यात्, तस्माद्गौरवग्रस्तरथादिसृष्टिर्न कल्पनीयेत्याशङ्क्याह-**अथेति**। जाग्रद्भोगप्रदकर्मोपरमे स्वाप्नभोगप्रदकर्माभिव्यक्त्यनन्तरम्। **रथान्**-रथयोगान् तदुपकरणभूतानश्वादीन्, तद्योग्यमार्गांश्च सृजत इति तत्सृष्टिप्रतिपादकश्रुत्या गौरवस्य प्रामाणिकतया उक्तप्रतीतेरन्यथानयनमयुक्तमिति भावः। उक्तश्रुतिविरोधादन्यथाख्यातिरप्ययुक्तेति मनसि निधायोपसंहरति-**तस्मादिति**। प्रातिभासिकपदविवरणं यावत्प्रतिभासमवतिष्ठन्त इति-प्रतिभासनियतसत्ताका-इति यावत्।

ननु शुक्तिरूप्यादेर्यथा पुरोवर्ति वस्त्वधिष्ठानं तथा स्वप्नरथादेरप्यधिष्ठानं वक्तव्यम्। तत्किं चैतन्यम्? उत देशविशेषः? आद्येऽपि

---

(१) प्रमोषादिति। मुष् स्तेये इत्यस्य रूपम्, अभावादित्यर्थः।

ननु स्वप्नरथाद्यधिष्ठानतयोपलभ्यमानदेशविशेषस्यापि तदाऽसन्निकृष्टतयाऽनिर्वचनीयप्रातिभासिकदेशोऽभ्युपगन्तव्य तथा च रथाद्यध्यासः (१) कुत्रेति चेत्। न। चैतन्यस्य स्वयंप्रकाशस्य रथाद्यधिष्ठानत्वात्प्रतीयमाने रथादस्तीत्येव

तत्किं शुद्धमुतान्तःकरणावच्छिन्नम्? नोभयमपि, तयोरधिष्ठानत्वेना प्रतीतेः। द्वितीयेऽपि स किं प्राच्य उत स्वाप्निकः?। नाद्यः, तस्य सन्निकृष्टतया प्रत्यक्षज्ञानविषयत्वायोगात्। न द्वितीयः, (२) अधिष्ठानतयोपलभ्यमानस्यापि तस्य सन्निकृष्टतया प्रातिभासिकत्वावश्यम्भावेनाधिष्ठानसापेक्षतया तस्यायोगादित्याशयेन शङ्कते–ननु स्वप्नेति तदा स्वप्नावस्थायां रथाद्यधिष्ठानतयोपलभ्यमानदेशविशेषस्यापि सन्निकृष्टतयाऽनिर्वचनीयप्रातिभासिकदेशोऽभ्युपगन्तव्य इत्यन्वयः प्रथमपक्षमप्यलम्ब्य परिहरति–नेति। ननु चैतन्यस्य पुरोवर्तित्वपरिच्छिन्नज्ञानविषयत्वाभावात् कथमधिष्ठानता इत्याशङ्क्याह–स्वयंप्रकाशेति। स्वप्रकाशपरप्रकाश्यसाधारणं ज्ञायमानत्वमेवाधिष्ठानत्वप्रयोजकं लाघवादिति भावः। ननु स्वयंप्रकाशस्यापि तस्य तदा चिद्रूपेण भानं (३) रथादिजडाद्यधिष्ठानत्वनिर्वाहकं प्रतिकूलरूपत्वात्। नाप्यानन्दरूपेण, तस्य मूलाज्ञाननिवृत्तिमन्तरा भानासम्भवादित्याशङ्क्याह–प्रतीयमानेति। अत्रायं रथ इत्यधिष्ठानतया प्रतीय

(१) कुत्रेति। निरधिष्ठानभ्रमायोगात् अधिष्ठानत्वेन प्रतीयमानस्य देशविशेषस्यापि प्रातिभासिकत्वेन रथभ्रमात् पूर्वमभावात् रथाद्यधिष्ठानाभावादेव रथाध्यासाभाव इत्याक्षेप्तुरभिप्रायः।

(२) अधिष्ठानतयेति। स्वाप्नरथाद्यधिष्ठानतया उपलभ्यमानस्य तस्य स्वाप्नदेशस्य पुरोवर्तित्वेन प्रतीयमानस्य प्रातिभासिकस्य पुनः अधिष्ठानसापेक्षत्वनियमात्तस्याप्यधिष्ठानं किञ्चिदभ्युपगन्तव्यमतोऽनवस्थैव भविष्यतीति भावः।

(३) चिद्रूपेण भानमिति कर्तृपदम्। चिद्रूपेण भानमधिष्ठानत्वनिर्वाहकं न

प्रतीयते इति सद्रूपेण प्रकाशमानं चैतन्यमेवाधिष्ठानम् । देशविशेषोऽपि चिदध्यस्तः प्रातिभासिकः । रथादीनिन्द्रियग्राह्यत्वमपि प्रातिभासिकम्, तदा सर्वेन्द्रियाणामुपरमात् । 'अहं गजः' इत्यादिप्रतीत्यापादनन्तु पूर्ववन्निरसनीयम् ॥

स्वप्नगजादयः साक्षान्मायापरिणामा इति केचित् ।

मानस्यापि देशविशेषस्य प्रातिभासिकत्वान्नाधिष्ठानतेत्याह—**देशविशेषोऽपीति** । किं च इन्द्रियग्राह्यत्वमपि तत्र कल्पितमित्याह—**रथादाविति** । तत्र हेतुमाह—**तदेति** । ननु स्वप्नगजाद्यधिष्ठानं यद्यपि चैतन्यं, तथाऽपि तस्यान्तःकरणावच्छिन्नत्वमस्त्येव 'सधीः स्वप्नो भूत्वेमं लोकमनुसंचरेत्' इत्यादिश्रुतेः । तथा चाहं गज इति प्रतीत्यापत्तिरित्याशङ्क्याह **अहं गज इति** । **पूर्ववदिति** । यथा शुक्तिरजतादेरिदमाकारानुभवाहितसंस्कारसहकृताविद्याजन्यत्वादहं रजतमिति प्रतीत्यापादानमयुक्तं तद्वदहं गज इति प्रतीत्यापादानमपीत्यर्थः ।

ननु स्वप्नगजादेस्तत्कालोत्पन्नत्वमनुपपन्नं तेषामुपादानासम्भवात् । न तावच्चैतन्यं तदुपादानं तस्यापरिणामित्वात् । नापि मूलाविद्या, तस्यास्तत्तदवयवसापेक्षाया साक्षात्तदुपादानत्वासम्भवात् । नापि तूलाविद्या(१), तस्या बाह्यदेशावच्छिन्नचैतन्याश्रितायास्तत्त्वादित्याशङ्क्याह—**स्वप्नगजादय इति** । **मायापरिणामाः**—मूलाविद्योपादानकाः । न चैवं सुषुप्तौ तत्प्रतिभासापत्तिरिति वाच्यम् । रागद्वेषादि

भवति आनन्दरूपेण मानमपि नाधिष्ठानत्वनिर्वाहकमित्यन्वयः ।

(१) तूलाविद्या हि बाह्यदेशावच्छिन्नचैतन्याश्रिता स्वप्नाधिष्ठानम्? उत अन्तःकरणावच्छिन्नचैतन्याश्रिता? नाद्य, बाह्यदेशस्यापि प्रातिभासिकत्वात् । नान्त्यः, अन्तःकरणस्य गजाद्युपादानाविद्याधिष्ठानत्वे प्रमाणाभावात् । इदं सर्वमभिप्रेत्योक्तं नापीत्यादिना तत्त्वादित्यन्तेन । तत्त्वादित्यस्य उपादानत्वादित्यर्थः ।

अन्तःकरणद्वारा तत्परिणामा इत्यन्ये ।

ननु गजादेः शुद्धचैतन्याध्यस्तत्वे इदानीमधिष्ठानसाक्षात्काराभावेन जागरणेऽपि स्वप्नोपलब्धगजादयोऽनुवर्तेरन् । उच्यते । कार्यविनाशो हि द्विविधः—कश्चिदुपादानेन सह, कश्चिद्विद्यमान एवोपादाने । आद्यो बाधः । द्वितीयस्तु निवृत्तिः । आद्यस्य कारणमधिष्ठानतत्त्वसाक्षात्कारः तेन विनोपादानभूताया अविद्याया अनिवृत्तेः । [illegible] विरोधिवृत्त्युत्पत्तिर्दोषनिवृत्तिश्च । तदिह महासाक्षात्का

यन्निमित्तकारणस्यान्तःकरणस्य(१) तदानीमभावात् । अन्तःकरणस्य निमित्तकारणत्वकल्पनापेक्षया तद्द्वाराऽविद्यापरिणामित्वकल्पने लाघवम् इत्यभिप्रायवतां पक्षमाह—अन्तःकरणेति ।

नन्वध्यस्तस्याधिष्ठानसाक्षात्कारनिवर्त्यत्वनियमात् तत्साक्षात्काराभावाज्जागरणे तेषामनुवृत्तिप्रसङ्गो दुर्वार इति शङ्कते ननु गजादेरिति । यद्यप्यधिष्ठानसाक्षात्कारं विनाऽध्यस्तस्य बाधो न सम्भवति तथाऽपि तं विनाऽपि तन्निवृत्तिसम्भवान्न तदनुवृत्तिप्रसङ्ग इति समाधानं प्रतिजानीते—उच्यते इति । बाधरूपनाशाभावेऽपि निवृत्तिरूपनाशं प्रकृते दर्शयितुं नाशद्वैविध्यमाह—कार्यविनाशो हीति । उपादानेन—कारणेन । आद्यस्य बाधसंज्ञस्य उपादानेन सह नाशस्य । तत्—तस्मान्नाशस्य द्वैविध्याद्धेतोः । इह—जागरणे । महासाक्षात्काराभावात् स्वप्नप्रपञ्चमायाविगजादिनिवृत्तौ को विरोध इत्यन्वयः । तत्र हेतुमाह—विरोधीति । यथोपादानसत्त्वेऽपि मुद्गरप्रहारेण घटादिनिवृत्तिर्भवति तथा विरोधिवृत्त्युदयेन गजादेरपि निवृत्तिरुपपद्यते, स्वप्न एव भयादिप्रत्यये गजादिनिवृत्तिदर्शनात् । विरोधिवृत्त्य

(१) यथा शुक्तिरजतस्य रागादयो निमित्तं, तथैव स्वाप्नगजाद्यवन्तःकरणं निमित्तं सुषुप्तौ तस्याभावान्नानुवृत्तिः स्वाप्नगजादीनामिति ।

राभावात् स्वप्नप्रपञ्चो माबाधि(१) । मुसलप्रहारेण घटादेरिव विरोधिप्रत्ययान्तरोदयेन स्वप्नजनकीभूतनिद्रादिदोषनाशेन वा गजादिनिवृत्तौ को विरोधः ॥

एवं च शुक्तिरूप्यस्य शुक्त्यवच्छिन्नचैतन्यनिष्ठतूलाविद्याकार्यत्वपक्षे(२) शुक्तिरिति ज्ञानेन तदज्ञानेन(३)सह-

---

न्तरनिवृत्तौ पुनरुपत्तिमाशङ्क्य हेत्वन्तरमाह-**स्वप्नजनकीभूतेति** । स्वप्नप्रतीतिजनकीभूतेत्यर्थः । आदिपदेनादृष्टादिसङ्ग्रहः ।

ननु शुक्तिरूप्यस्य बाधो निवृत्तिर्वेत्यपेक्षायामाह-**एवं चेति** । कार्यनाशस्य द्वैविध्ये सिद्धे सति । **शुक्तिरिति ज्ञानेनेति** । नेदं रजतमिति ज्ञानं त्वनुवाद' शुक्तिविषयकारकज्ञानस्य रजतादिभेदाज्ञाननिवर्तकत्वात् । तदुक्तं पञ्चपादिकायाम्-'शुक्तित्वज्ञानमेव बाधकं नेदं

---

(१) यद्यपि लब्धेषु सर्वपुस्तकेषु 'स्वप्नप्रपञ्चो मा बाधिष्ट' इत्येव पाठ उपलभ्यते, तथाऽपि माङुपपदस्य बधे कर्मणि लुङि 'चिण्भावकर्मणोः' इत्यनेन माबाधि इति 'स्वप्नप्रपञ्च मावाधिष्ट' इति वा प्रयोगेण भाव्यम् । जागरणवृत्त्येत्यध्याहारः । तथा च जागरणवृत्ति स्वाप्नप्रपञ्च माबाध्यताम्, परन्तु त निवर्तयतीत्यभ्युपगमे को विरोधः ? विरोधो नास्तीत्यर्थः । कर्मण एव कर्तृत्व विवक्षया यथाश्रुतपाठस्य उपपत्तिः कर्तुं शक्यते, तथाऽपि क्लिष्टकल्पनया अपेक्षितस्यार्थस्यानुपलब्धेश्च 'माबाधि' इति पाठः स्थापित इति । वेङ्कटेश्वरीय मुद्रितयोः पुस्तकयोः तट्टीकयोश्च मा बाधिष्ठ इति ठकारान्तः पाठः, स चाति स्थवीय इति विभावनीय सुधीभिः ॥

(२) प्रातिभासिकाः पदार्थाः तूलाविद्याकार्या इति पद्मपादाचार्याः । तन्मते शुक्तिरियमित्यादिज्ञानेन शुक्तित्वाज्ञानरूपया तूलाविद्यया प्रातिभासिकोपादानभूतया सह रजतादेर्बाधः । मूलाविद्याकार्या इति मिश्रादिमते मूलाविद्याया ब्रह्मज्ञानमात्रबाध्यायास्तस्याः शुक्तिरित्याकारकज्ञानेन बाधाभावेऽपि मुसलप्रहारेण विद्यमाने एवोपादाने मृदि घटनिवृत्तिवद् रजतस्य निवृत्तिरेवेति ।

(३) शुक्तित्वाज्ञानेन तूलाविद्यारूपेण ।

रजतस्य बाधः। मूलाविद्याकार्यत्वपक्षे तु मूलाविद्याया ब्रह्मतत्त्वसाक्षात्कारमात्रनिवर्त्यतया शुक्तित्वज्ञानेनानिवर्त्यतया रजतस्य तत्र शुक्तिज्ञानान्निवृत्तिमात्रं, मुसलप्रहारेण घटस्येव।

ननु शुक्तौ रजतस्य प्रतिभाससमये प्रातिभासिकसत्त्वाभ्युपगमे नेदं रजतमिति त्रैकालिकनिषेधज्ञानं न स्यात्, किन्त्विदानीम् इदं न रजतमिति (१), इदानीं घटः श्यामो यदिति चेत्। न। न हि तत्र रजतत्वावच्छिन्नप्रतियोगिताकाभावो निषेधधीविषयः, किन्तु(२) लौकिकपारमा

रजतमित्यनुवाद' इति। रजतस्य बाधः–उपादानेन सह नाशः, तूलाविद्याया मूलाज्ञानस्यैवावस्थाविशेषः। तदुक्तं विवरणे–'मूलाज्ञानस्यैवावस्थाभेदा रजताद्युपादानानि शुक्तिकादिज्ञानैः सहाध्यासेन निवर्तन्ते' इति। मूलाविद्याकार्यत्वपक्षे तु स्वप्नगजादिवन्निवृत्तिरित्याह–मूलाविद्येति। नन्वस्मिन् पक्षे शुक्तिरूप्यज्ञाने प्रमात्वप्रसङ्गः, संसारदशायामबाधितत्वघटितस्य लक्षणस्य सत्त्वादिति चेन्न। अबाधितपदेनाज्ञानदोषाजन्यत्वस्य विवक्षितत्वात्।

ननु शुक्तिरजतस्याविद्याकार्यत्वात् प्रतिभाससमये सत्त्वस्वीकारे नेदं रजतमिति त्रैकालिकनिषेधानुपपत्तिरिति शङ्कते–ननु शुक्ताविति। विषयभेदादविरोध इति परिहरति–नेति। हि–यस्मात्, तत्र नेदं रजतमिति त्रैकालिकनिषेधज्ञाने रजतत्वावच्छिन्नप्रतियोगिताकाभावो निषेधज्ञानविषयो न भवति। तर्हि कीदृशोऽभावस्तद्विषय इति पृच्छति–किन्त्विति। व्यावहारिकत्वावच्छिन्नप्रातिभासिकरजतप्रतियोगिताके·

(१) इति ज्ञानं स्यादिति ख.।

(२) लौकिकपारमार्थिकत्वेन सर्वत्र व्यावहारिकेत्यर्थो बोध्यः। नेदं रजतमित्यत्र इदं(प्रातिभासिकम्) लौकिकपारमार्थिकम् (व्यावहारिकम्) नासीदि

र्थकत्वावच्छिन्नप्रातिभासिकरजतप्रतियोगिताकः, व्यधिकर-ाधर्मावच्छिन्नप्रतियोगिताकाभावाभ्युपगमात् ।

ननु प्रातिभासिके रजते पारमार्थिकत्वमवगतम् ? न ा ? अनवगमे प्रतियोगितावच्छेदकावच्छिन्नरजतत्वज्ञा-ाभावादभावप्रत्यक्षानुपपत्तिः(१), अवगमेऽपरोक्षावभासस्य त्कालीनविषयसत्तानियतत्वाद् रजते पारमार्थिकत्वमप्य-निर्वचनीयं रजतवदेवोत्पन्नमिति तदवच्छिन्नरजतसत्त्वे तद-च्छिन्नाभावस्तस्मिन् कथं वर्तते ? इति चेत् । न । ारमार्थिकत्वस्याधिष्ठाननिष्ठस्य रजते प्रतिभाससम्भवेन

ऽभावो निषेधबुद्धिविषय । तत्र हेतुमाह—व्यधिकरणेति । विरुद्धं व्यावहारिकं रजताद्यधिकरणं यस्य स व्यधिकरणः, स चासौ धर्मश्च लौकिकपारमार्थिकत्वं–तदवच्छिन्ना प्रातिभासिकरजते प्रतियोगिता यस्य तादृशाभावस्याभ्युपगमात् ।

नन्विदमनुपपन्नं व्यधिकरणधर्मस्यावगमेऽनवगमे चानुपपत्तेरिति-शङ्कते–नन्विति । अवगमपक्षमवलम्ब्य परिहरति–नेति । नन्वत्र

प्रातिभासिकरजतप्रतियोगिताको व्यावहारिकत्वावच्छिन्नोऽभावो निषेधधी-विषयः । यथा नैयायिकैः कपालेऽपि पटत्वेन घटाभावोऽङ्गीकृतस्तद्वद् व्यधि-करणाभावोऽस्माभिरपि स्वीक्रियत इत्यर्थः ।

(१) यत्र शुक्तिकादौ 'इदं रजतम्' इत्याकारा बुद्धिर्जायते तत्र रजते पारमार्थिकत्वम् (अत्र पारमार्थिकत्वमिति मूलेन लौकिकपारमार्थिकत्व विवक्षित तच्च व्यावहारिकत्वमेव) अवगतम् ? न वा ? नान्त्यः, रजतनिष्ठव्यावहारि-कत्वानवगमे 'नेदं रजतम्' इत्यभावप्रत्यक्षानुपपत्तेः । तथा हि–अभावीया प्रतियोगिता रजते तदवच्छेदकं रजतत्वं तस्य तत्त्वज्ञानाभावेन–यथार्थज्ञाना-भावेन–अभावप्रत्यक्षानुपपत्तिरिति । ननु प्रतियोगिनि रजते वर्तमानं प्राति-भासिकं रजतत्वमेव प्रतियोगितावच्छेदकं भवतु तद्विहाय कुतो व्यावहारिकं रजतत्वमन्विष्यत इति चेन्न । अभावज्ञाने येन रूपेण प्रतियोगिनि विषयी-

रजतनिष्ठपारमार्थिकत्वोत्पत्त्यनभ्युपगमात् । यत्रारोप्यमसन्निकृष्टं तत्रैव प्रातिभासिकवस्तूत्पत्तेरङ्गीकारात् ।

अत एवेन्द्रियसन्निकृष्टतया जपाकुसुमगतलौहित्यस्य स्फटिके भानसंभवाद् न स्फटिकेऽनिर्वचनीयलौहित्योत्पत्तिः । नन्वेवं यत्र जपाकुसुमं द्रव्यान्तरव्यवधानादसन्निकृष्टं तत्र लौहित्यप्रतीत्या प्रातिभासिकलौहित्यं स्वीक्रियतामिति चेत् । न । इष्टत्वात् । एवं प्रत्यक्षभ्रमान्तरे

लौकिकपारमार्थिकत्वोत्पत्तिः कुतो नाभ्युपगम्यत इत्याशङ्क्याह-यत्रेति

यत एवमत एव यत्रारोप्यं सन्निकृष्टं न तत्र प्रातिभासिकवस्तूत्पत्तिः स्वीक्रियत इत्याह-अत एवेति । ननु यत्र सन्निकृष्टमपि जपाकुसुमं हस्तादिद्रव्यान्तरव्यवधानादसन्निकृष्टं तत्र स्फटिकेऽनिर्वचनीयलौहित्योत्पत्तिरङ्गीकार्येति शङ्कते-नन्विति । इष्टापत्त्या परिहरति-नेति । नन्विन्द्रियसन्निकृष्टप्रभाया स्फटिके भानसम्भवादनिर्वचनीयलौहित्योत्पत्तिरनुपपन्नेति चेन्न । अस्वच्छद्रव्यस्य जपाकुसुमस्य प्रभाया एवासिद्धेः । तदुक्तं पञ्चपादिकायाम्-'यथा पद्मरागादिप्रभा निराश्रयाऽप्युपलभ्यते न तथा जपाकुसुमादेः' इति । तथा चासन्निहितस्य परत्रावभासोऽध्यास इत्यध्यासलक्षणं न क्वापि व्यभिचरितमिति भावः । ननु

करोति नियमेन तद्रूपमेव प्रतियोगितावच्छेदकं भवति नेदं रजतमित्यत्र अभावज्ञाने रजतं व्यावहारिकं नारोपयति प्रतियोगिनि व्यावहारिकत्वेन विषयीकरोतीति व्यावहारिकत्वमेव प्रतियोगितावच्छेदकं तद्धानतानेऽभावस्य धानुपलब्धिरिति । नाद, अध्यासावभासो हि सन्निकृष्टरजत एव भवतीति नियमात् । तथा च यथा रजतं प्रातिभासिकं तत्काले तत्पन्नमङ्गीकृतं तथैव तद्वृत्तिव्यावहारिकत्वस्यापि व्यपदिष्टीकार्यं । अङ्गीकारे व्यावहारिकत्वेऽसत्त्वो नेदं रजतमिति निषेधो न स्यात् । यतः व्यावहारिकत्वावच्छिन्ने रजते व्यावहारिकत्वावच्छिन्नं रजतं नास्तीति तदा स्यात् । तथ व्यावहारिकमिति आक्षेपुराशयः । उपरमन्यः स्पष्टार्थः ।

शुक्त्यादौ रजताध्याससम्भवेऽप्यहङ्कारादेरात्मनि स न सम्भवति, तस्याधिष्ठानत्वानुपपत्तेः । अधिष्ठानं ह्यध्यस्यमानसदृशमवयववत्परिच्छिन्नमध्यस्यमानेन सहैकज्ञानविषयत्वयोग्यं च दृष्टमिति चेत् । उच्यते । अहङ्कारादिकार्य्यं ह्यज्ञानविकल्पित(१) एवाध्यस्यते कार्य्यस्य कारणावच्छिन्न एवाध्यासौचित्यात् । न चैतावता समानाश्रयत्वभङ्गः, बिम्बप्रतिबिम्बयोरेकत्वेन तद्भङ्गाभावात् । तस्मादहङ्काराद्यधिष्ठानचैतन्यस्याभिधेयत्वासम्भवात्, प्रतीतितो घटादिव्यावृत्ताकारेणाप्यहङ्कारादिभिरात्मनः सादृश्यसम्भवादविद्यया साशत्वविषयत्वपरिच्छिन्नत्वानामपि सम्भवादात्मा अधिष्ठानं भवत्येव । नापि प्रमाणदोषाभावः, अविद्याया एव दोषत्वात् । न चात्मनो विषयत्वादिसमाश्रयणेऽपसिद्धान्तः शङ्क्यः, अमुख्यस्य तस्य 'न तावदयमेकान्तेनाविषयोऽस्मत्प्रत्ययविषयत्वात्' इत्यादि वदद्भिर्भाष्यकारैरेव(२) समाश्रितत्वात् । किञ्चाव्यवधानेन प्रकाशमानत्वमेवाधिष्ठानत्वप्रयोजकं न त्वधिष्ठानस्य विषयत्वमपि गौरवात् । न च विषयत्वं विनाऽधिष्ठानस्याव्यवधानेन प्रकाशमानत्वमेव न दृष्टमिति वाच्यम्, यथाऽधिष्ठानस्यापरोक्षत्वं परमते क्वचिन्मनसा क्वचिन्नेत्राभ्यां तथाऽस्मन्मते स्वतोऽपीत्यत्र बाधकाभावात् । ननु स्वतोऽपरोक्षे कस्याध्यासो दृष्ट इति चेदज्ञानशोकमोहस्वप्नादेरिति गृहाण । तथा च परैर्यथाऽक्षिगम्ये शुक्त्यादौ रजतादिभ्रमः स्वीकृतस्तथा स्वतोऽपरोक्षे आत्मन्यहङ्कारादिविभ्रमेऽपि नास्ति बाधकम् । ननु स्वप्रकाशस्यात्मनो ज्ञाताज्ञातांशासम्भवात्कथमधिष्ठानतेति चेदुच्यते । दूरस्थयोर्वृक्षत्वेन प्रतीयमानयोरपि तावन्मात्ररूपो भेदो न ज्ञायत इत्यङ्गीकार्यम्, अन्यथा भेदभ्रान्त्यनुदयापाताद् एवं ज्ञानेऽप्यात्मन्यज्ञा

(१) अज्ञानप्रतिबिम्बिते । कार्य्यस्य-अहङ्कारादेः । कारणावच्छिन्ने-अहङ्कारस्य कारणमज्ञानं तदवच्छिन्नमिति ।

(२) नित्यज्ञानस्वरूपस्यात्मनोऽविषयत्वेऽपि बुध्याद्युपहितस्यात्मनो विषयत्वस्य भाष्यकारैः समाश्रितत्वादित्यर्थः ।

ष्वपि प्रत्यक्षसामान्यलक्षणाऽनुगमो(१) यथार्थप्रत्यक्षलक्षण-सद्भावश्च दर्शनीयः।

उक्तं प्रत्यक्षं प्रकारान्तरेण द्विविधम्, इन्द्रियजन्यं तदजन्यं चेति। तत्रेन्द्रियाजन्यं सुखादिप्रत्यक्षम्, मनस

तत्वसम्भवात्तस्याधिष्ठानत्वमुपपद्यते। भेदो हि वस्तुनः स्वरूपं न धर्मः, अन्योन्याश्रयापातादित्यन्यत्र(२)विस्तरः। उक्तमर्थमन्यत्राप्यतिदिशति-एवमिति। प्रत्यक्षभ्रमान्तरेषु पीतः शङ्खस्तिक्तो गुड इत्यादिषु। प्रत्यक्षसामान्यलक्षणं चित्त्वम्। प्रमाणचैतन्यस्याबाधितयोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं यथार्थप्रत्यक्षलक्षणम्।

उक्तप्रत्यक्षं पुनर्विभजते-उक्तमिति। तथा चेन्द्रियजन्यमित्यत्रेन्द्रियशब्देन ज्ञानेन्द्रियाणि पञ्च गृह्यन्ते, न तु नैयायिकवत् षट्। नापि

---

(१) प्रत्यक्षसामान्यलक्षण 'चित्त्वम्' तस्य भ्रमप्रमासाधारणप्रत्यक्षलक्षणत्वात् भ्रमेऽतिव्याप्तिः, तस्यापि लक्ष्यत्वात्। यथार्थप्रत्यक्षलक्षणम् 'प्रमाणचैतन्यस्य अबाधितयोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वम्' तस्य भ्रमे नातिव्याप्तिः, विषयस्य बाधितत्वाद् इति तात्पर्यम्।

(२) अन्यत्र-सङ्क्षेपशारीरकप्रथमाध्याये तत्र हि—

अपरोक्षरूपविषयभ्रमधीरपरोक्षमास्पदमपेक्ष्य भवेत्।

मनसः स्वतो नयनतो यदि वा स्वपनभ्रमादिषु तथा प्रमितेः॥ ४१॥

स्वपनेऽपरोक्षमधितिष्ठति विभ्रमरूपधीरपि रूपाकृतिरेव जायते।

मनोनिमित्तं स्वपने मुहुर्मुहुर्विनाऽपि चक्षुर्विषयं रसनादरम्॥ ४२॥

मनोऽवगम्येऽप्यपरोक्षताबलात्तथाऽम्बरे रूपमुपोहितं भ्रमः।

सितादिभेदैर्बहुधा समीक्ष्यते यथाऽग्निगर्भे रजतादिविभ्रमः॥ ४३॥

ज्ञातेऽपि धावति तनोऽनतिरिक्तरूपेऽप्यज्ञानतः स्फुरणमस्फुरणं च दृष्टम्।

दूरस्थयोर्नेनु वनस्पतिवस्तुनोस्तद्भेदो न दृष्टि ...योऽवगते च ते नः॥४४

इत्यादिकमुक्तमत्र टीकाकृता सर्वमर्थं उपनिबद्धमिति।

इन्द्रियत्वनिराकरणात्। इन्द्रियाणि पञ्च-घ्राणरसनचक्षुःश्रोत्रत्वगात्मकानि। सर्वाणि चेन्द्रियाणि स्वस्वविषयसंयुक्तान्येव प्रत्यक्षज्ञानं जनयन्ति। तत्र घ्राणरसनत्वगिन्द्रियाणि स्वस्थानस्थितान्येव गन्धरसस्पर्शोपलम्भाञ्जनयन्ति। चक्षुःश्रोत्रे तु स्वत एव विषयदेशं गत्वा स्वस्वविषयं गृहीतः। श्रोत्रस्यापि चक्षुरादिवत् परिच्छिन्नतया भेर्यादिदेशगमनसम्भवात्। अत एवानुभवो भेरीशब्दो मया श्रुत इति। वीचीतरङ्गादिन्यायेन कर्णशष्कुलीप्रदेशेऽनन्तशब्दो-

---

दश कर्मेन्द्रियाणां ज्ञानाजनकत्वादित्याशयेनाह-**इन्द्रियाणि पञ्चेति**। तान्यपि कानीत्यपेक्षायामाह-**घ्राणेति**। तत्सद्भावे च रूपादिज्ञानानि सकरणकानि क्रियात्वाच्छिदिक्रियावद् इत्यनुमानं प्रमाणम्। 'तमुत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इत्याद्या श्रुतिश्च मानम्। इन्द्रियाण्यप्राप्यकारीणीति सौगतास्तान्निराकर्तुमाह-**सर्वाणि चेति**। तत्रापि फलबलकल्प्यस्वभावविशेषमाश्रित्याह-**तत्रेति**। ननु चक्षुष्यनुसंभवेऽपि कर्णशष्कुल्यवच्छिन्ननभोरूपश्रोत्रस्य विषयदेशगमनं न सम्भवति इत्याशङ्क्याह-**श्रोत्रस्यापीति**। आकाशादुत्पन्नं श्रोत्रमपि चक्षुरादिवत्परिच्छिन्नमिति भावः। यतः श्रोत्रस्य शब्ददेशगमनमत एव नैयायिकप्रक्रिया तु गौरवग्रस्तत्वादुपेक्ष्येत्याह-**वीचीति**। यथा वीचेस्तरङ्गस्ततोऽपि वीच्यन्तरं ततोऽपि तरङ्गान्तरमिति न्यायः। तथा भेरीदण्डसंयोगाज्जन्यमुत्पन्नाच्छब्दादसमवायिकारणाच्छब्दान्तरस्योत्पत्तिस्ततोऽन्यस्येति परम्परयाऽन्यशब्दस्य श्रोत्रसम्बन्धकल्पनागौरवम्। कदम्बमुकुलन्याय आदिपदाज्ज्ञेयः। (१) **प्रदेशे-प्रदेशसम्बन्धा-**

---

(१) कखपुस्तकयोः अप्रदेशे प्रदेशसम्बन्धायमित्यादिः पाठः, गपुस्तके तु प्रदेशो सम्बन्धार्थमित्यादिः पाठः, तयोरनुपपत्तिशालीत्वय अस्माभिरेषः कल्पितः। अस्यार्थस्तु-मूले वीचीतरङ्गन्यायेन कर्णशष्कुलीप्रदेशे अनन्तशब्दोत्पत्तिकल्पना-

त्पत्तिकल्पनागौरवम् (१), भेरीशब्दो मया श्रुत इति प्रत्यक्षस्य भ्रमत्वकल्पनागौरवं च स्यात्। तदेवं व्याख्यातं प्रत्यक्षम् ॥

इति प्रत्यक्षं प्रमाणम् ॥



अथानुमानपरिच्छेदः २

अथानुमानं निरूप्यते। अनुमितिकरणमनुमानम्।

र्थम्। परमप्रकृतमुपसंहरति–तदेवमिति।

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिसूरिसुतशिवदत्तविरचितायां वेदान्तपरिभाषार्थदीपिकायां प्रत्यक्षपरिच्छेदः समाप्तः ॥ १ ॥



एवं सर्ववादिसंमतं ज्येष्ठं प्रत्यक्षप्रमाणं प्रथमं निरूप्य बहुवादिसम्मतत्वात्तदनन्तरमनुमाननिरूपणं प्रतिजानीते–अथेति। (२) अनुमीयतेऽनेनेत्यनुमानमनुमितिकरणमिति व्युत्पन्नमनुमानपदं लक्षणमव्युत्पन्नं लक्ष्यमित्याशयेनानुमानं लक्षयति–अनुमितीति। अनु-

---

गौरवमुक्तं तत्रत्यप्रदेशे इति पदं मनीकल्पनेनोपादाय प्रदेशासम्बन्धार्थं निरुक्तम्। कर्णशष्कुलीप्रदेशे नानन्तशब्दोत्पत्तिः, परन्तु भेरीदेशे जातस्य शब्दस्य कर्णशष्कुल्या सह सम्बन्धाभावाद् भेरीदेशे आद्यशब्दाच्छब्दान्तरं ततोऽपि शब्दान्तरमिति कर्णशष्कुलीपर्यन्तमनन्तशब्दोत्पत्तौ वीचीतरङ्गन्यायेन कल्प्यते तत्र गौरवमिति ध्येयः।

(१) यद्यपि सर्वेषु पुस्तकेषु भ्रमत्वकल्पनागौरवमिति पाठः, तथाऽप्यत्र 'कल्पनायान्तु गौरवम्' इति पाठो ग्रन्थानुगुण इति प्रतिभाति।

(२) अनुमीयते–अनुमितिप्रमा उत्पाद्यते अनेन तद्–व्याप्तिज्ञानमनुमानम्, (अनुमानशब्दव्युत्पत्तिनिमित्तम्) अर्थात् व्याप्तिज्ञानमनुमितिप्रमाकरणमिति

अनुमितिश्च व्याप्तिज्ञानत्वेन(१)व्याप्तिज्ञानजन्या ।

मानलक्षणघटकानुमितेर्लक्षणमाह—अनुमितिश्चेति । व्याप्तिज्ञानत्वेन न तु विषयत्वादिना । व्याप्तिश्च वक्ष्यमाणा तज्ज्ञानं च व्यभिचारज्ञानविरोधिज्ञानमिति पर्यवस्यति । नन्वत्र व्याप्तिपदं व्यभिचारज्ञानविरोधिपरं न तु प्रत्यक्षदभिमतव्याप्तिपरं, तेन तज्जनके(२) अत्यन्ताभावगर्भसाध्याभाववदवृत्तित्वादिरूपव्याप्तिज्ञाने(३)ऽन्योन्याभावगर्भसाध्यवत्प्रतियोगिकान्यान्याभावासामानाधिकरण्यादिरूपव्याप्तिज्ञाने च (४)कारणतावच्छेदकसत्त्वादनुमितिर्भवति इदानीं तु न स्यादिति चेन्न । व्याप्तिज्ञाने प्रयुज्यमानस्य अनुमानपदस्य करणव्युत्पत्त्याऽऽश्रयणे अनुमानलक्षणस्य व्युत्पत्त्यनाश्रयणे केवलसङ्केतमात्राश्रयणे लक्ष्यपरत्वमिति भावः ।

(१) व्याप्तिज्ञानत्वेनेति। धूमो वह्निव्याप्य इत्याद्यात्मकव्याप्तिप्रकारकज्ञानत्वेनेत्यर्थो विवक्षितः। अन्यथा–व्याप्तिज्ञानत्वेन व्याप्तिज्ञानस्य अनुमितिं प्रति करणत्वस्वीकारे तु व्याप्तिरिति ज्ञानादपि पर्वतो वह्निमानित्यनुमित्यापत्तिः। व्याप्तिप्रकारकज्ञानत्वविवक्षणे तु धूमो वह्निव्याप्य इत्यस्यैव व्याप्तिप्रकारकज्ञानत्व व्याप्तिरिति ज्ञानस्य तु व्याप्तित्वप्रकारकज्ञानत्वमिति नापत्तिः काचिदिति। वह्निव्याप्य धूमवन्त पर्वतं जानामीत्यनुव्यवसायस्यापि व्याप्तिज्ञानजन्यत्वं, तथाऽपि अनुव्यवसायनिष्ठजन्यतानिरूपितजनकत्व व्याप्तिज्ञानस्य विषयत्वेन भवति न व्याप्तिज्ञानत्वेनेति । एव व्याप्तिज्ञानजन्यस्मृतिशाब्दज्ञानव्याप्तिज्ञानध्वंसादिष्वपि बोध्यम्। अत्रेदं तत्त्वम्—अयं घट इत्याकारकज्ञाने विषयो घटः सोऽपि विषयत्वेन ज्ञानजनको भवति यथा तथैवोक्तानुव्यवसायादीनि ज्ञानानि व्याप्तिज्ञानजन्यानि तेषु उक्तानुमितिलक्षणस्यातिव्याप्तिः स्यादतो व्याप्तिज्ञानत्वेनेति लक्षणे निवेशितमिति ।

(२) तज्जनके–अनुमितिजनके । अत्यन्ताभावो गर्भे मध्ये यस्य तच्च साध्याभाववदवृत्तित्वादिरूपव्याप्तिज्ञान च तस्मिन्निति विग्रहः। इद पूर्वपक्षव्याप्तिलक्षणेषु प्रथमव्याप्तिलक्षणम्।

(३) इदञ्च पूर्वपक्षव्याप्तिलक्षणेषु तृतीय लक्षणम्।

(४) कारणता व्याप्तिज्ञाने तदवच्छेदक व्याप्तिज्ञानत्व तस्य पञ्चस्वपि लक्षणेषु सत्त्वाद् अनुमितित्व भवतीत्यर्थः।

व्याप्तिज्ञानानुव्यवसायादेस्तत्त्वेन तज्जन्यत्वाभावादनुमितित्वम्।

अनुमितिकरणं च व्याप्तिज्ञानं तत्संस्कारोऽवान्तरव्यापारः, न तु तृतीयलिङ्गपरामर्शोऽनुमितौ करणम्।

अत्यन्ताभावादिगर्भव्याप्तिज्ञानस्यापि व्यभिचारज्ञानविरोधित्वेन एव पर्यवसानात्, वस्तुतो व्यतिरेकव्याप्तिज्ञानस्यानुमित्यहेतुत्वस्य वक्ष्यमाणत्वाच्च। तादृशावच्छेदकविवक्षाया फलमावेदयति व्याप्तिज्ञानेति। तत्त्वेन—व्याप्तिज्ञानत्वेन। आदिपद तज्जन्यस्मृतिशाब्दज्ञानादिसंग्रहार्थम्। अनुव्यवसायस्मृतिशाब्दज्ञानादिषु विषयत्वस्वसमानविषयानुभवत्वपदार्थज्ञानत्वादिना हेतुत्वात्तत्त्वेनाहेतुत्वमित्यर्थः।

ननु व्याप्तिज्ञानस्य किमनुमितिजनकत्वमात्रमुत तत्करणत्वमित्यपेक्षायामाह—अनुमितिकरणं चेति। एतेन व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिस्तत्करणमनुमानं तच्च लिङ्गपरामर्श इति प्रत्युक्तम्, व्याप्तिज्ञानस्यैव तत्करणत्वसम्भवे तदतिरिक्तपरामर्शाङ्गीकारस्यानौचित्यात्। नाप्यनुमितौ लिङ्गं करणमयोग्यलिङ्गकानुमितौ परामर्शस्य व्यापारत्वासम्भवेन तत्करणत्वासम्भवतया व्यभिचारात्। तस्मादनुमितिकरणत्वाद् व्याप्तिज्ञानमेवानुमानशब्दाभिधेयं, न तु लिङ्गतत्परामर्शाविति भावः। ननु व्याप्तिज्ञानस्य करणत्वे तद्व्यापारो वक्तव्यः, व्यापारवदसाधारणकारणस्य करणत्वादित्यपेक्षायामाह—तत्संस्कार इति। व्याप्तिज्ञानसंस्कार इत्यर्थः। ननु महानसादौ धूमादिज्ञानं प्रथमम्, पक्षे ततो द्वितीयम्, ततो व्याप्तिं स्मृत्वा पक्षे धूमादिपरामर्शात्मकं तृतीयम्, ततो वह्न्याद्यनुमितिरिति तृतीयलिङ्गपरामर्शात्मकं ज्ञानमनुमितिकरणमिति वदन्ति नैयायिकाः। अतो भाट्टैरपि तथैव किमिति नाभ्युपगम्यत इत्यत आह—न तु तृतीयेति। व्याप्तिविशिष्टपक्ष-

तस्यानुमितिहेतुत्वासिद्ध्या तत्करणत्वस्य दूरनिरस्तत्वात् ।

न च संस्कारजन्यत्वेनानुमितेः स्मृतित्वापत्तिः, स्मृति-

धर्म्मताज्ञानं परामर्शः । प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः (१)। व्याप्यस्य पक्षवृत्तित्वं पक्षधर्म्मता। तथा च वह्निव्याप्यधूमवानयमित्यादिज्ञानमुक्तलक्षणपरामर्शात्मकं, तत्तु नानुमितिकरणमित्यर्थः। तत्र हेतुमाह–**तस्यानुमितीति** । पक्षधर्म्मताज्ञानद्वारोद्बुद्धे संस्कारे व्याप्तिज्ञानस्यान्वयव्यतिरेकाभ्यामनुमितिजनकत्वाभ्युपगमस्यावश्यकतया (२)तद्रहितस्य परामर्शस्य तद्धेतुत्वासिद्ध्या तत्करणत्वस्य दूरनिरस्तत्वमित्यर्थः। उपलक्षणमिदम् । अनुमितिकरणं लिङ्गम्, तत्परामर्शोऽवान्तरव्यापार इति वैशेषिका मन्यते। तन्न साधु, विनष्टस्यानागतस्य च लिङ्गस्य तदानीमभावेन ततोऽनुमित्यनापत्तेरित्यपि द्रष्टव्यम् ।

ननु संस्कारजन्यं ज्ञानं हि स्मृतिरिति स्मृतिलक्षणं तस्य चानुमितावप्यनुगमात् तस्यापि स्मृतित्वापत्तिरित्याशङ्क्य परिहरति–**न चेति** । तत्र हेतुमाह–**स्मृतीति** । नन्वेव तर्हि तत्तत्प्रागभावजन्यत्वरूपप्रयोजकस्य सर्वत्र सुलभत्वात् तत्र तत्र प्रयोजकान्तराभ्युपगमोऽनर्थकः

---

(१) इयं सिद्धान्तलक्षणव्याप्तिः। पर्वतो वह्निमान् धूमाद् इत्यत्र लक्षणसमन्वयः। यथा लक्षणघटकोऽभावो घटाभावः, स च प्रतियोगिनो घटस्यासमानाधिकरणोऽथ च हेतोर्धूमस्याधिकरण पर्वतस्तत्समानाधिकरणश्च तादृशाभावीया प्रतियोगिता घटे प्रतियोगितावच्छेदक घटत्वम् अनवच्छेदक वह्नित्वं तदवच्छिन्नो वह्निस्तेन वह्निना समं तस्य हेतोर्धूमस्य सामानाधिकरण्यं पर्वतादाविति।

(२) संस्कारे उद्बुद्धे सति व्याप्तिज्ञानसत्त्वेऽनुमितिस्तदभावेऽनुमित्यभाव इत्यन्वयव्यतिरेकाभ्यां व्याप्तिज्ञानस्यावश्यकतया तद्रहितस्य–अन्वयव्यतिरेकरहितस्य–परामर्शस्य अनुमितिहेतुत्वासिद्ध्या, तत्करणत्वस्य—अनुमितिकरणत्वस्य दूरनिरस्तत्वात्। कारकविशेषः करणं कारकसामान्यत्वरूपहेतुत्वासिद्ध्या तद्विशेषरूपकरणत्वस्य अत्यन्तमसम्भावितत्वादित्यर्थः।

प्रागभावस्य संस्कारमात्रजन्यत्वस्य वा स्मृतित्वप्रयोजकतया(१) संस्कारध्वंससाधारणसंस्कारजन्यत्वस्य तदप्रयोजकत्वात्।

न च यत्र व्याप्तिस्मरणादनुमितिस्तत्र कथं संस्कारो हेतुरिति वाच्यम्। व्याप्तिस्मृतिस्थलेऽपि तत्संस्कारस्यैवानुमितिहेतुत्वात्(२)। न हि स्मृतेः संस्कारनाशकत्वनियमः(३), स्मृतिधारादर्शनात्। न चानुद्बुद्धसंस्कारादप्यनु-

---

स्यादित्यत उक्तं पक्षान्तरमाह–संस्कारमात्रेति।

ननु व्याप्तिस्मरणादनुमितिस्थले संस्कारजन्यत्वं व्यभिचरितं व्याप्तिस्मृत्या संस्कारनाशादित्याशङ्क्य परिहरति–न चेति। व्याप्तिस्मृतिजन्यानुमितिस्थलेऽपि संस्कारनाशानभ्युपगमेन व्यभिचाराभावादित्याह–व्याप्तिस्मृतीति। स्मृतिधारादर्शनात्स्मृतेः संस्कारनाशकत्वनियमो नास्तीत्याह–न हीति। ननु संस्कारस्यैवानुमितिहेतुत्वे अनु-

---

(१) तथा च स्मृतिप्रागभावजन्यं ज्ञानं स्मृतिरिति संस्कारमात्रजन्यं ज्ञानं स्मृतिरिति वा स्मृतिलक्षणे सति संस्कारध्वंससाधारणसंस्कारजन्यानुमितौ न स्मृतित्वापत्तिरिति।

(२) व्याप्तिस्मृतिजन्यानुमितिस्थलेऽपि व्याप्तिसंस्कारस्यैव अनुमितिहेतुत्वं लाघवादनुभवानुरोधाच्चेति भावः।

(३) योग्यविभुविशेषगुणानां स्वोत्तरवर्तिविशेषगुणनाश्यत्वम् इति तार्किकाः। तथा च संस्कारात्स्मृत्युत्पत्तौ संस्कारस्य नाशोऽवश्यम्भावीति। तथा संस्कारनाशाभ्युपगमे स्मृतिधारास्थले द्वितीयस्मृत्यादिकोत्पत्तिः अकारणिका स्यात्। न च एकसंस्कारध्वंसेऽपि संस्कारान्तरवत्त्वात् स्मृत्युत्पत्तिरिति वाच्यम्, संस्कारानन्त्यकल्पने गौरवात्प्रमाणाभावाच्च। ननु संस्कारस्य स्मरणानन्तरं मास्तु परमेतेन संस्कारेण उद्बोधकसहकृतेन वा स्मृतिर्जनिष्यत इत्यादिरिति चेत् स्वयं

मिन्यापत्तिः, तदुद्बोधस्यापि सहकारित्वात्।

एवं च अयं धूमवानिति पक्षधर्मताज्ञानेन, धूमो वह्निव्याप्य इत्यनुभवाहितसंस्कारोद्बोधे च सति, वह्निमानित्यनुमितिर्भवति, न तु मध्ये व्याप्तिस्मरणं तज्जन्यवह्निव्याप्यधूमवानित्यादिविशेषणविशिष्टं ज्ञानं वा हेतुत्वेन कल्पनीयम्, गौरवात् मानाभावाच्च।

तत्र व्याप्तिज्ञानं वह्निविषयकज्ञानांश एव करणम्, न तु

दुद्बोधादिति(१) तस्मान्नानुमितिरत्र इत्याशङ्क्य परिहरति—न चेति। तदुद्बोधस्य पक्षधर्मताज्ञानजन्यस्य संस्कारोद्बोधस्य।

फलितमाह—एवञ्चेति। व्याप्तिज्ञानस्य करणत्वे व्याप्तिज्ञानसंस्कारस्य तद्व्यापारत्वे पक्षधर्मताज्ञानजन्यसंस्कारोद्बोधस्य सहकारित्वे च सिद्धे सति।

पर्वतो वह्निमानित्येकमेव ज्ञानमनुमित्यात्मकमिति येऽभिमन्यते तान्निराकर्तुमाह—तत्रेति। सन्निकृष्टपक्षकानुमितिस्थले ज्ञानद्वयस्यो-

---

-विनश्यन्ती संस्कारमप्युत्पाद्य विनश्येद् उत्पन्नश्च संस्कारोऽन्यां स्मृतिमिति धारावाहिकः स्मृतिसन्तानः स्यादिति चेन्न। अन्यदृष्टकल्पनाऽपेक्षयाऽपि येनानुभवेन यः संस्कारो जनितः, तेन च संस्कारेण उद्बोधकसहकारिणा स्मृतिजनने जनितया स्मृत्या स्वजनकसंस्कारस्य नाशमनुर्वत्या तस्यैव संस्कारस्य दृढीकरणकल्पनाया लाघवात्। तथा चानुभवोऽप्यत्रानुगुणः, यथा पूर्वेद्युः श्रुतः शास्त्रार्थोऽद्य स्मृतो दृढीभूत इति तेनैव शास्त्रार्थं दृढीभूतमादर्शयति। अन्यथा श्रुतशास्त्रार्थसंस्कारस्य स्मृतिजननानन्तरं विनाशे तया च स्मृत्या संस्कारजनने दृढत्वं कथं स्यात्। किञ्च संस्कारेण स्मृत्युत्पत्तिः स्मृत्युत्तरं जायमानेन तेनैव स्मृतिनाशः, यदि संस्कारस्यैव स्मृतिजनकत्वविनाशकत्वे तदैव पुनः स्मृतेरुत्पत्तेः स्मृतिसन्तानापत्तिरित्यादिबहुविरुद्धपदार्थकल्पनापत्तेन, तस्मात् स्मृतेः संस्कारनाशकत्वमिति पक्षः श्रेयान्।

(१) अनुद्बोधादिति इति पाठः—पुस्तके। अग्रेऽपि तदुद्बोधस्य इत्यस्य स्थाने तदुद्बुद्धस्य इति पाठश्च।

पर्वतविषयकज्ञानांश इति पर्वतो वह्निमानिति ज्ञानस्य वह्न्यंश एवानुमितित्वं न पर्वतांशे, तदंशे प्रत्यक्षत्वस्योपपादितत्वात्।

व्याप्तिश्च अशेषसाधनाश्रयाश्रितसाध्यसमानाधिकरण्य

पपादितत्वादित्याह—**पर्वत इति**। पर्वतं पश्यामि वह्निमनुमिनोमीत्यनुभवबलाज्ज्ञानद्वयस्यावश्यकतया जातित्वोपाधित्वपरिभाषायाश्चाप्रामाणिकत्वाद् ज्ञानस्यांशभेदेन परोक्षत्वापरोक्षत्वयोरुपपादितत्वादित्यर्थः ।

नन्वनुमितिकरणव्याप्तिज्ञाने (१)का व्याप्तिरित्यपेक्षायां व्याप्तिस्वरूपमाह—**व्याप्तिश्चेति**। अशेषं च तत्साधनं च तस्याश्रयस्तदाश्रितं यत्साध्यं तेन समं हेतोः सामानाधिकरण्यं रूपं यस्याः सा, (२)साधनतावच्छेदकावच्छिन्नसाधनाश्रयाश्रितसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यरूपेति यावत्। एवं च यत्किञ्चिद् धूमादिसाधनाश्रयाश्रितयत्किञ्चिद्धूमादिसाध्यसामानाधिकरण्यमादाय पर्वतो धूमवान् वह्नेरित्यासद्धेतौ नातिप्रसङ्गः। नन्वेवंभूता व्याप्तिः केन गृह्यते? न तावत्सर्वेण, व्याप्यारोपेण व्यापकारोपरूपस्य तर्कस्य व्याप्त्यधीनत्वात्। नापि सह

---

(१) ज्ञाने स्वीकृते का व्याप्तिरिति पाठः—नपुस्तके।

(२) वह्निमान् धूमाद् इत्यत्र साधनं धूमः साधनता धूमनिष्ठा तदवच्छेदकं धूमत्वं तदवच्छिन्ना पर्वतीयचत्वरीयादिधूमव्यक्तयः साधनरूपाः तदाश्रयाः पर्वतादयः, तन्निष्ठाश्रिता या साध्यव्यक्तयः—ताश्चापि साध्यतावच्छेदकं वह्नित्वं तदवच्छिन्ना एव तासां धूमत्वावच्छिन्नधूमव्यक्तीनां वह्नित्वावच्छिन्नवह्निव्यक्तीनां यत् समानाधिकरण्य-समानाधिकरणे पर्वतादौ वृत्तित्वं 'यत्र यत्र धूमस्तत्र तत्र वह्निः' इत्यादिरूपं—तदेव रूपं यस्याः व्याप्तेः सा तथा। धूमवान् वह्नेरित्यादौ यथा यत्किञ्चित् महानसीयवह्निव्यक्त्या महानसीयधूमव्यक्तेः साधनेऽपि नातिप्रसङ्गः। यद्यपि तत्र महानसीयधूमवह्न्योः सामानाधिकरण्यं दृष्टं तथाऽप्ययोगोलके व्यभिचारात् साधनतावच्छेदकावच्छिन्नेन वह्निना सामानाधिकरण्यं नास्तीति भावः।

रूपा। सा च व्यभिचारादर्शने सति सहचारदर्शनेन गृह्यते। तच्च सहचारदर्शनं भूयो दर्शनं सकृद्दर्शनं वेति विशेषो नादरणीयः। सहचारदर्शनस्यैव प्रयोजकत्वात्।

तच्चानुमानमन्वयिरूपमेकमेव। न तु केवलान्वयि। सर्वस्यापि धर्मस्यास्मन्मते ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वेन

चारदर्शनेन, सकृद्दर्शने भूयोदर्शने च तस्मिन् क्वचिद्व्यभिचारोपलम्भा दित्याशङ्कयाह—**सा चेति**। तच्च सकृद्दर्शनं भूयोदर्शनं वा इत्यपेक्षायामाह—**तच्चेति**। गृहीतसहचारस्य व्याप्तिग्रहदर्शनादगृहीतसहचारस्य व्याप्तिग्रहादर्शनाच्चेत्यन्वयव्यतिरेकाभ्यां सहचारदर्शनस्य हेतुत्वसिद्धया लाघवात् तस्यैव प्रयोजकत्वं, न तु तद्विशेषस्येत्याह—**सहचारेति**।

एवं व्याप्तिज्ञानस्यानुमितिकरणत्वेनानुमानत्वं प्रसाध्येदानीमनुमानत्रैविध्यमपि नैयायिकादिवदस्मन्मते नास्तीत्याशयेनाह—**तच्चानुमानमिति**। न तु केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात्रिविधमित्यर्थः। **अन्वयिरूपम्**—अन्वयमुखव्याप्तिज्ञानरूपम्। ननु परोक्तभेदानां जागरूकत्वे कथमनुमानस्यैकरूपत्वमित्याशङ्कयाद्यमेदं निराचष्टे—**न त्विति**। (१)तद्धि अत्यन्ताभावाप्रतियोगिसाध्यकम्। न चास्मन्मते ब्रह्मातिरिक्तं किञ्चिदप्यत्यन्ताभावाप्रतियोगि 'नेह नानास्ति किञ्चन' क० २-१० इत्यादिश्रुत्या सर्वस्यापि ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वावधारणादिति तथाभूतकेवलान्वयित्वस्यासिद्धेरित्याह—**सर्वस्यापीति**।

---

(१) तद्धीति। केवलान्वय्यनुमानं हि अत्यन्ताभावस्य प्रतियोगि साध्यं यस्य तद् अत्यन्ताभावाप्रतियोगिसाध्यकम्। यथा वाच्यं ज्ञेयत्वादित्यादि। नैयायिकमते वाच्यत्वज्ञेयत्वयोः कुत्रापि विरहाभावेन लक्षणसमन्वयः।

अत्यन्ताभावाप्रतियोगिसाध्यकत्वरूपकेवलान्वयित्वस्यासिद्धेः।

नाप्यनुमानस्य व्यतिरेकिरूपत्वम्(१)। साध्याभावे साधनाभावनिरूपितव्याप्तिज्ञानस्य साधनेन साध्यानुमि

एवं प्रथमभेदं निराकृत्य केवलव्यतिरेकिरूपं द्वितीयभेदं निराचष्टे **नाप्यनुमानस्येति**। **व्यतिरेकिरूपत्वं**—केवलव्यतिरेकिरूपत्वम् साधनेन हि साध्यमनुमीयते, तत्र च सा [illegible] नद् युज्यते, न तु साध्याभावसाधनाभावयोरित्याह—**साध्याभावे इति**। तथा च पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वाद् यदितरेभ्यो न भिद्यते न तद्गन्धवद् यथा जलादीत्याद्युदाहरणानि स्वर्थापत्तेर्गन्धवत्त्वस्येतरभेदोपपादकत्वादिति भावः। नन्वन्वयव्याप्तिज्ञानरहितस्य व्यतिरेकव्याप्ति

---

(१) व्यतिरेकव्याप्तिज्ञानजन्यानुमितिकारणत्वमनुमानस्य व्यतिरेकित्वम्। साध्याभावव्यापकीभूताभावप्रतियोगित्वं व्यतिरेकव्याप्तिः। अन्वयव्याप्तौ हि धूमत्वे वह्निसत्त्वमिति व्याप्येन धूमेन व्यापकस्य वह्नेरारोपो भवति, अभावयोस्तु तद्विपरीतः कार्यकारणभावः, यथा यत्र यत्र वह्न्यभावस्तत्र तत्र धूमाभाव इति। तथा च साध्यस्य वह्नेरभावेन साधनस्याभावः साध्यते तस्य कुत्रोपयोगः? साधनस्य धूमस्य प्रत्यक्षसिद्धत्वात् अनुमानोपयोगाभावात्। पृथ्वी इतरेभ्यो भिद्यते गन्धवत्त्वाद् इत्यत्रान्वयदृष्टान्ताभावाद् यत्र गन्धवत्त्वं तत्र पृथिवीतरभिन्नम् इति साधनाभावेन साध्याभावसाधनपुरःसरं पृथिव्यामितरभेदः साध्यते। तस्या व्यतिरेकव्याप्त्याः साध्यस्यानुमितिमात्रायामनुपयोग एव, अन्वयव्याप्तिज्ञानस्यापि अन्यलिङ्गकानुमितिहेतुत्वेऽतिप्रसङ्गात्। तथा हि, साध्याभावनिष्ठा या साधनाभावनिरूपिता व्याप्तिः, यथा गन्धाभावव्याप्य इतरभेदाभाव इति, तया चेत् पृथिव्यां गन्धवत्त्वं साध्यते तर्ह्यन्वयगतेन अभावगतेन—व्याप्तिज्ञानेन अन्यस्याः पृथिव्याः गन्धवत्त्वं साध्यत इत्यापद्यत्। तथा च कृतकत्वमनित्यत्वव्याप्यम् इति कृतकत्वनिष्ठानित्यत्वनिरूपितव्याप्तिज्ञानेन धूमाद् वह्न्यनुमित्यापत्तिः स्यात्। भवति हि धूमो वह्निव्याप्य इत्यस्मादेव व्याप्तिज्ञानाद् वह्न्यनुमितिरिति, न तु कृतकत्वनिष्ठानित्यत्वनिरूपितव्याप्तिज्ञानेनेति दिक्।

तावनुपयोगात्। कथं तर्हि धूमादावन्वयव्याप्तिमविदुषोऽपि (१)व्यतिरेकव्याप्तिज्ञानादनुमितिः? अर्थापत्तिप्रमाणादिति वक्ष्यामः।

अत एवानुमानस्य नान्वयव्यतिरेकिरूपत्वं व्यतिरेकव्याप्तिज्ञानस्यानुमित्यहेतुत्वात्।

ज्ञानादनुमितिर्भवति, भवन्मते सा कथमुपपद्यते इति शङ्कते-**कथं तर्हीति**। तस्यार्थापत्तिप्रमाणाद् वह्न्यादिज्ञानं, न त्वनुमानादतो नोक्तदोष इत्याह **अर्थापत्त्येति**। वक्ष्यमाणरीत्या अर्थापत्तिप्रमाणस्यावश्यकतया व्यतिरेक्यनुमानस्य तदन्तर्भावसम्भवे तत्पृथक्त्वस्याभ्युपगमो न युक्त इति भावः।

तृतीयभेदं निराकरोति-**अत एवेति**। यतो व्यतिरेकव्याप्तिज्ञानस्य नानुमितिजनकत्वमत एवेत्यर्थः। अन्वयव्यतिरेकिरूपे त्वन्वयव्याप्तिज्ञानस्यैवानुमितिजनकत्वे व्यतिरेकव्याप्तिज्ञानस्य तज्जनकत्वाभ्युपगमाय वैयर्थ्यादित्याह-**व्यतिरेकेति**। अत्र केचित् (२)स्ववृत्तिविरोधि

---

(१) व्यतिरेकव्याप्तिज्ञानादनुमितिर्जायते। यथा वह्न्यभावव्याप्यो धूमाभाव इति व्यतिरेकमात्रव्याप्तिज्ञानवत पुरुषस्यापि पर्वतेऽविच्छिन्नमूलधूमदर्शनेन धूमाभावाभावरूपस्य धूमस्य विद्यमानतया वह्न्यभावव्याप्यस्य धूमाभावस्य च अविद्यमानतया व्यापकस्य वह्न्यभावस्याप्यभावः, अर्थाद् 'वह्निमान् पर्वत' इत्याकाराऽनुमितिरुत्पद्यते। व्यतिरेकव्याप्त्यस्वीकारे कथमुत्पत्तिरस्या अनुमितेरित्याक्षेप्तुरभिप्रायः। अर्थापत्तिप्रमाणादिति समाधातुर्ग्रन्थकारस्याशयः। एतादृशस्थले वह्निमनुमिनोमीत्यनुव्यवसायाभावान्नास्माभिरनुमितिः स्वीक्रियते, किन्तु वह्निं कल्पयामीत्यनुव्यवसायबलादर्थापत्तिरेवेति धर्मराजाध्वरीन्द्रः। विवरणकारानुयायी रामकृष्णाध्वरिमखोऽपि मिश्रा खण्डित व्यतिरेक्यनुमानं पुनरुज्जीवयति शिखामण्यामिति द्रष्टव्यम्। अनेन शिवदत्तेन मूलकारग्रन्थसमर्थनं कृतमिति संक्षेपः।

(२) अत्र केचिदित्यस्य (८९) पृष्ठस्थेन वदन्तीत्यनेन दूरव्यवहितेन

वृत्तिमदत्यन्ताभावाप्रतियोगित्वं साध्यस्य केवलान्वयित्वम् । तत्साधकत्वं(१) केवलान्वयिलिङ्गलक्षणं (२)प्रमेयत्वादेश्च स्वसमानाधिकरणपारमार्थिकत्वावच्छिन्नात्यन्ताभावप्रतियोगित्वेऽपि स्ववृत्तिविरोधिवृत्तिमदत्यन्ताभावाप्रतियोगित्वात्केवलान्वयित्वम् । न च (३)श्रुतिविरोधशङ्कः, तस्या अपि पारमार्थिकत्वावच्छिन्नद्वैताभावपरत्वात् । तदुक्तं विवरणे–'आगमेन च द्वैतस्य तत्त्वांशबाधात्' इति । न च ... स्ववृत्तिविरोधीति व्यर्थं, तस्यान्याप्यवृत्तिकस्यापि ... संग्रहार्थत्वात् । न च ब्रह्मणः (४)स्वप्रकाशत्वेन तत्र स्वरूपेणापि प्रमेयत्वाभावात्कथं केवलान्वयित्वमिति वाच्यम्, ब्रह्मणोऽपि वृत्तिलक्षणप्रमाविषयत्वात् । न चैतावता स्वप्रकाशत्वविरोधः, अनुपहितस्यैव तथात्वात् । न चैवमपि नाभिधेयत्वं केवलान्वयि, ब्रह्मणोऽनभिधेयत्वादिति वाच्यम्

सबन्धः । येचित् शिरसामभिकाराः । स्ववृत्तिरित्यादेरयमर्थः । ... आधेयता प्रायः स्वशब्देन घटादयो ग्राह्याः, न प्रमेयत्वादीनि, ... विरोधिवृत्तिमदत्यन्ताभावस्याप्रसिद्धत्वात् । तथा च घटादिनिष्ठा या आधेयता तद्विरोध्याधेयतावान् यो घटशून्यदेशस्थो घटात्यन्ताभावस्तत्प्रतियोगित्व घटादौ अप्रतियोगित्व प्रमेयत्वादाविति लक्षणसमन्वयः ।

(१) तस्य–केवलान्वयिसाध्यस्य–साधकं तत्साधकं तस्य भावस्तत्साधकत्वम् । केवलान्वयिसाध्यविषयानुमितिजनकत्वं केवलान्वयिलिङ्गस्य लक्षणम् ।

(२) प्रमेयत्वादेश्च केवलान्वयित्वन्वयः । यद्यप्यत्र अत्यन्ताभावाप्रतियोगित्व केवलान्वयित्वमिति लक्षणस्य प्रमेयत्वाधिकरणे प्रमेये घटे प्रमेयः पारमार्थिको न इत्याकारकस्यात्यन्ताभावस्य प्रतियोग्येव प्रमेयो घट इत्यव्याप्तिः, तथाऽपि स्ववृत्तिविरोधिवृत्तीत्यादेरेव केवलान्वयिलक्षणत्वेन नाव्याप्तिरिति भावः ।

(३) 'नेह नानास्ति' इत्यादिश्रुतिः ।

(४) इतराप्रकाश्यत्वे सति प्रकाशमानत्वं स्वप्रकाशत्वम्, अपराधीनप्रकाशत्वमित्यर्थः । तत्र–ब्रह्मणि । स्वरूपेणापि–प्रमेयत्वेनापि । कथं केवलान्वयित्वं प्रमेयत्वादीनामित्यर्थः । न कथमपि संभवतीत्याक्षेपार्थः किंशब्दः ।

ब्रह्मणो लक्ष्यतया वाच्यत्वाभावेऽपि पदजन्यज्ञानविषयत्वात्, वाच्यत्वस्यापि ग्रन्थकृता वक्ष्यमाणत्वाच्च। न चैवं प्रमेयत्वादिविरोधिवृत्तिमदत्यन्ताभावस्याप्रसिद्धत्वात्तत्र लक्षणाव्याप्तिः, स्ववृत्तिविरोधिवृत्तिमदत्यन्ताभावप्रतियोगिनो घटादयः प्रसिद्धास्तदन्यत्वस्य प्रमेयत्वादावपि सत्त्वात्। एवं धूमादावन्वयव्याप्तिमविदुषोऽपि (१)व्यतिरेकव्याप्तिज्ञानाद्वह्निज्ञानमित्यविवादम्। तच्चानुमितिरेव वह्निमनुमिनोमीत्यनुव्यवसायात्। न च क्लृप्तकारणव्याप्तिज्ञानस्याभावात् कथमनुमितिरित्युक्तमिति वाच्यम्, व्यतिरेकव्याप्तिज्ञानस्य सत्त्वात्। न चैतदनुमित्यकरणमिति वाच्यम्, स्वव्यभिचारधीविरोधिधीविषयव्याप्तिज्ञानत्वेन व्याप्तिज्ञानस्यानुमितिहेतुत्वात्, अस्य च व्यतिरेकव्याप्तिज्ञानसाधारणत्वात् (२)।

(३)नन्वनुमानस्य व्यतिरेकितयाऽपि प्रामाण्याभ्युपगमे तत्रैवार्थापत्तेरन्तर्भावापत्तौ सा पृथक्प्रमाणमिति राद्धान्तो भज्येतेति चेत्तर्ह्यनुमानस्य प्रामाण्ये संशयाद्युत्तरप्रत्यक्षस्थले चक्षुरादेः प्रामाण्यं न स्यात्, तत्रानुमितिसामग्रीसत्त्वेनानुमितेरेवोत्पत्तेः। तथा शाब्दस्थलेऽपि शब्दो न प्रमाणं स्यात्, एते पदार्थास्तात्पर्यविषयपरस्परसंसर्गवन्त आकाङ्क्षादिमत्पदकदम्बस्मारितत्वादित्यनुमानेनैव क्लृप्तप्रमाणाभावेन तात्पर्य-

---

(१) यत्र यत्र धूमस्तत्र तत्र वह्निरित्यन्वयव्याप्तिः। यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति, यथा जलह्रद इति व्यतिरेकव्याप्तिः। यस्य पुंसोऽन्वयव्याप्तिज्ञानं तस्य व्यतिरेकव्याप्त्याऽपि पर्वते धूमदर्शनानन्तरं प्रमा जायते, सा यथार्था प्रत्यक्षशब्दोपमानार्थापत्त्यनुपलब्ध्यजन्या अतोऽनुमितिरेव। अनुमिनोमीत्यनुव्यवसायेनाप्यस्या अनुमितित्वमुररीकार्यमिति भावः।

(२) व्यतिरेकव्याप्तिज्ञानमपि अनुमितिकरणमित्यर्थः।

(३) व्यतिरेक्यनुमानस्वीकारे अर्थापत्तेः पृथक् प्रमाणाभ्युपगमो व्यर्थश्चेद् अनुमानेनैव प्रत्यक्षादिप्रमोत्पत्तेः सम्भवेन तेषां पृथक्करणानर्थक्यं स्यादिति प्रतिबन्द्याशङ्कते-नन्विति।

विषयससर्गप्रतीते सम्भवात्। यदि स्थाणुं साक्षात्करोमि शब्दात्तु
मर्थं जानामीत्यनुव्यवसायात्प्रत्यक्षशब्दयो पृथक् प्रामाण्यम्, तद
व्यतिरेकव्याप्तिज्ञानादिघटितायामनुमितिसामग्र्यां सत्यामपि वह्नि
ज्ञानानन्तरं धूमेन वह्निं कल्पयामीति यदाऽनुव्यवसाय, तदा धूम
स्यार्थापत्तिविषया प्रामाण्यमिति तुल्यम्।

यद्वा, (१)निरुपाधिव्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते इति
व्यतिरेकिण्यप्यन्वयव्याप्तिज्ञानमेवानुमितिहेतु। न चैवं सत्यन्वयव्य
तिरेकिणोर्भेदो न स्यादिति वाच्यम्, व्यतिरेकसहचारमात्रज्ञानजन्या
न्वयव्याप्तिधीर्यत्रानुमितिहेतु स व्यतिरेकी, यत्रान्वयसहचारमात्रज्ञा
नजन्यान्वयव्याप्तिधीरनुमितिहेतु सोऽन्वयव्यतिरेकीति विभागोपपत्ते।
अस्मिंश्च पक्षे यदा अन्वयसहचारेणैवान्वयव्याप्तिस्फुरणं, तदा धूमस्य
केवलान्वयितया गमकत्वम्। यदा व्यतिरेकसहचारेणैवान्वयव्याप्ति
स्फुरणम्, तदा केवलव्यतिरेकितया। यदाऽन्वयव्यतिरेकसहचारेणान्वय
व्याप्तिस्फुरणं, तदाऽन्वयव्यतिरेकितया। यदा व्यतिरेकसहचारेण व्यति

(१) साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधि। निरुपाधि –उपाधि
शून्य, यत्र वह्न्यभावस्तत्र धूमाभाव इत्याकारको यो व्यतिरेकयो वह्न्यभाव
धूमाभावयो सहचार स निरुपाधिव्यतिरेकसहचारस्तेन। धूमवान् वह्ने
रित्यादौ धूमाभाववह्न्यभावयोर्यं सहचार, स तु उपाधिव्यभिचारितासम्बन्धेन
वह्निसंयोगाभावाद्युपाधिविशिष्ट। साध्यव्यापकत्वे सति साधनाव्यापकस्वरूप
स्योगस्य व्यापकव्यापकत्वे सति व्याप्याव्यापकत्वमित्यर्थकत्वम्। तथा च यत्र
वह्न्यभावो जलह्रदे तत्र वह्निसंयोगाभावरूपस्य उपाधे सत्वाद् व्यापकवह्न्य
भावव्यापकत्वेन साध्यव्यापकत्वम्। यत्र धूमाभावस्तत्र वह्निसंयोगाभावाभावो
यथाऽयोगोलके इति साधनाव्यापकत्वम्। व्यापकाभावाद् व्याप्याभाव व्याप
कोपाधेरयोगोलकेऽभावात् व्याप्यस्य वह्न्यभावस्य अभाव। वह्न्यभावाभावो
वह्निरूप। एवं चायोगोलके वह्न्यभावो नास्ति धूमाभावोऽस्ति, इति व्यभिचारो
भावस्तया व्यतिरेकसहचार उपाधिव्यभिचारितासम्बन्धेन उपाधिमानित्यर्थ।

रेकव्याप्तेरेव ज्ञानं तदाऽर्थापत्तिविषया धूमस्य प्रामाण्यम्। न च व्यतिरेक्यनुमानस्य पृथक्प्रमाणत्वेऽपसिद्धान्तः, मूलग्रन्थेषु(१)शुक्तिरूप्यमिथ्यात्वादौ तत्र तत्र व्यतिरेक्यनुमानस्यापि प्रमाणत्वेनोपन्यासात्। तस्मात्त्रिविधं वानुमानमिति युक्तमिति(२)वदन्ति। तत्रेदं वक्तव्यम्—न तावदौपनिषदमतेऽनुमानस्य केवलान्वयित्वं सम्भवति, सर्वस्य प्रपञ्चस्य ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वाभिधानात्। ब्रह्मणि प्रपञ्चात्यन्ताभावो व्यावहारिक इति पक्षे स्ववृत्तिविरोधिवृत्तिमदत्यन्ताभावप्रतियोगित्वं प्रमेयत्वादेरायाति, न तु तदप्रतियोगित्वम्(३):

(४) नन्वेवं तर्हि निषेधस्य बाध्यत्वेन पारमार्थिकसत्त्वाविरोधित्वा(५)दर्थान्तरमिति चेद्, न। स्वाप्नार्थस्य स्वाप्ननिषेधेन बाध्येनापि बाधदर्शनात्। न च निषेधस्य बाध्यत्वं पारमार्थिकसत्त्वाविरोधित्वे तन्त्रम्, किं तु निषेध्यापेक्षया न्यूनसत्ताकत्वम्। प्रकृते च तुल्यसत्ताकत्वाद्विरोधित्वमविरुद्धम्। तत्र हि निषेधस्य निषेधे प्रतियोगिसत्त्वमायाति यत्र निषेधस्य निषेधबुद्ध्या प्रतियोगिसत्त्वं व्यवस्थाप्यते निषेधमात्रं तु निषिध्यते, यथा रजते नेदं रजतमिति प्रतीत्यनन्तरमिदं नारजतमिति ज्ञानेन रजतं व्यवस्थाप्यते निषेधमात्रं तु निषिध्यते। यत्र तु प्रतियोगिनिषेधयोरुभयोरपि निषेधस्तत्र न प्रतियोगिसत्त्वम्; यथा

(१) शुक्तिरूप्यमिथ्यात्वादुरयत्वाद् यत्रैव तत्रैव यथा ब्रह्म इति विवरणादौ।

(२) वदन्तीत्यस्य (८५)पृष्ठस्थेन अत्र केचिदित्यनेन दूरव्यवहितेन सम्बन्धः।

(३) अतो न केवलान्वयित्वमिति शेषः।

(४) एषा शङ्का तत्परिहारश्चेति सर्वं द्वितीयमिथ्यात्वनिरूपणेऽद्वैतसिद्धाववसेयम्।

(५) अर्थान्तरम्—अनभिप्रेतपदार्थप्रतिपादनम्। घटः सन् इत्यादिप्रत्यक्षं नेह नानेत्यादिश्रुत्या प्रबाध्य घटादीनां सत्यत्वाभावरूपं मिथ्यात्वं सिसाधयिषितम्, स चेन्निषेधोऽपि बाध्यस्तर्हि न तेन घटादीनां पारमार्थिकसत्त्वं बाधयितुं शक्यते, तच्चानभिप्रेतं वेदान्तिनस्तवेत्यर्थान्तरम्।

ध्वंससमये प्रागभावप्रतियोगिनोरुभयोर्निषेधः । तथा च प्रकृतेऽपि निषेधस्य बाध्यत्वेऽपि प्रपञ्चस्य तात्त्विकत्वं निषेधबाधकेन प्रतियोगिनः प्रपञ्चस्य तन्निषेधस्य च बाधनात्, उभयोरपि निषेध्यतावच्छेदकस्य दृश्यत्वादेस्तुल्यत्वात् । न चातात्त्विकनिषेधबाधकत्वाच्छ्रुतेरप्रामाण्यं शङ्क्यं, ब्रह्मभिन्नस्यातात्त्विकत्वं बोधयतः शास्त्रस्याप्रामाण्यायोगात् । एतन्निषेधप्रतियोगित्वं च स्वरूपेणैव, न तु सद्विलक्षणस्वरूपानुपमर्दितपारमार्थिकत्वाकारेण, स्वरूपेण त्रैकालिकनिषेधप्रतियोगित्वस्य प्रपञ्चे शुक्तिरजतादौ चाभ्युपगमात् । रजतभ्रमानन्तरमधिष्ठानसाक्षात्कारे सति रजतस्य रजतं नास्ति नासीद् न भविष्यतीति स्वरूपेणैव 'नेह नाना' क० २-१० इति श्रुत्या च प्रपञ्चस्य स्वरूपेणैव निषेधप्रतीतेः । न च तत्र लौकिकपारमार्थिकरजतमेव स्वरूपेण निषेधप्रतियोगीति वाच्यम्, भ्रमबाधयोर्वैयधिकरण्यापत्तेः, अप्रसक्तप्रतिषेधापत्तेश्च । न चैवं विवरणाचार्य्यवाक्यविरोध इति वाच्यम्, तस्य मतान्तरपरत्वात्, अन्यथाऽबाध्यस्वरूपपारमार्थिकत्वस्य बाध्यस्वरूपमिथ्यात्वनिरूप्यत्वेनान्योन्याश्रयापातात् ।

किञ्च नात्र रजतमिति प्रतीतौ, यथा रजतस्य स्वरूपेण पारमार्थिकत्वेन च निषेधो विषयस्तथा 'नेह नानास्ति किञ्चन' क० २-१० इत्यत्रापि प्रपञ्चस्य स्वरूपेण पारमार्थिकत्वेन च निषेधो विषयः । भिन्नविभक्त्यन्तोपस्थापिते धर्मिणि प्रतियोगिनि च नञः संसर्गाभावबोधकत्वनियमस्य व्युत्पत्तिसिद्धत्वात् । अस्तु वा पारमार्थिकत्वाकारेणैव निषेधस्तथाऽपि प्रमेयत्वादेर्ब्रह्मधर्मिन्यूनसत्ताकत्वे कथं केवलान्वयित्वम् ? तत्त्वे च (१)ब्रह्मसत्ताकत्वावश्यंभावात् कथं बाध्यत्वम् ? तस्माद्ब्रह्मातिरिक्तं सर्वं मिथ्येतिवादिनः केषांचिद्धर्माणां केवलान्वयित्वकथनं केवलसाहसविजृम्भितम् ।

---

(१) तत्त्वे च—केवलान्वयित्वे च, प्रमेयत्वादेः ब्रह्मसत्तासमानसत्ताकत्वावश्यम्भावाद् बाध्यत्वायोग इत्याशयः ।

एतेन ब्रह्मणि अभिधेयत्वस्थापनमपि निरस्तम्। 'यद्वाचाऽनभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि' के०-१-४ 'अविज्ञातं विजानताम्' के० २-१-१ 'प्रतिबोधविदितं मतम्' के० २-२ इत्यादिश्रुत्या ब्रह्मणि वाच्यत्वादेर्निषिद्धत्वात्। न च मन्त्रकृता तत्र वाच्यत्वं वक्ष्यमाणमिति भणितव्यम्, लक्षणां विना शक्त्याऽपि महावाक्ये-नाखण्डार्थौ बोधयितुं शक्यते इत्येतत्परत्वान्मन्त्रस्य ब्रह्मणि वाच्यत्व-मस्तीत्येवंकथनपरत्वाभावात्। यदपि व्यतिरेक्यनुमानोपपादनं तद-प्यसङ्गतम्। (१)अर्थापत्त्यादिना तदावश्यकत्वे तद्वादिनामर्थापत्तेरा-वश्यकत्वापत्तेः।

यत्तु प्रत्यक्षशब्दयोर्यथा पृथक् प्रामाण्यं तथाऽर्थापत्तेरपीत्यादि, तदपि न। व्यतिरेकव्याप्तेरेवार्थापत्तिप्रमाणत्वेन द्वयोः सामग्रीभेदाभा-वेन वैरूप्यात्। तथा च व्यतिरेकव्याप्तिज्ञाने यत्र वह्न्यादिज्ञानं तत्र वह्निं कल्पयामि इत्याकारकानुव्यवसायोपलम्भात् तत्करणमर्थापत्तिरेव न त्वनुमानं तस्यानुमित्यहेतुत्वात्।

यत्तु व्यतिरेकसहचारमात्रज्ञानजन्यान्वयव्याप्तिबोधोऽप्यनुमितिहेतुः स व्यतिरेकीत्यादि, तदपि न। अन्वयसहचारदर्शनस्यान्वयव्याप्तिज्ञा-नजनकतया व्यतिरेकसहचारदर्शनस्य व्यतिरेकव्याप्तिज्ञानजनकतायाः सर्वैरनुभवसिद्धतया तद्विपरीतकार्यकारणभाववर्णनानौचित्यात्। तथा च नास्त्यर्थापत्त्यतिरिक्तं व्यतिरेक्यनुमानम्। (२) एतेन तस्यान्व-यव्यतिरेकित्वमपि प्रत्युक्तम्। तस्मादनुमानमन्वयिरूपमेवेति सूक्तं मूलकृद्भिः। अन्यथाऽपसिद्धान्तपातः, साम्प्रदायिकग्रन्थेषु केवलान्वयि-केवलव्यतिरेक्यन्वयव्यतिरेक्यनुमानानां क्वाप्यनुपन्यासात्। कश्चित्प्र-योगस्तु परमतानुसारेण दृष्टश्च इत्यास्तां तावत्।

(१) अर्थापत्तिवादिनां पूर्वोत्तरमीमांसकानां तस्या व्यतिरेकव्याप्त्या आव-श्यकत्वे। तद्वादिनाम् व्यतिरेक्यनुमानवादिनाम् अर्थापत्तेरप्यावश्यकत्वापत्तेः।
(२) व्यतिरेकिनिराकरणेन तस्य-अनुमानस्य।

तथानुमानं स्वार्थपरार्थभेदेन द्विविधम् । तत्र स्वार्थं तूक्तमेव, परार्थं तु न्यायसाध्यम् । न्यायो नामावयवसमुदायः । (१)अवयवाश्च त्रय एव प्रसिद्धाः—प्रतिज्ञाहेतूदाह

यथोक्तानुमानस्य द्वैविध्यमाह-तच्चेति । तत्र-द्विविधे । स्वार्थं स्वविवादगोचरार्थसाधकम् । उक्तमेव-व्यभिचारादर्शने सति सहचारदर्शनेन गृह्यते इत्युक्तया निरुक्तव्याप्तेर्ज्ञानमेव । **परार्थन्तु**(२)-परविवादविषयार्थसाधकम् । **न्यायसाध्यं**-न्यायप्रयोज्यम् । न्यायशब्दार्थमाह—**न्यायो नामेति** । वक्ष्यमाणावयवघटितवाक्यम् अवयवसमुदायः । तथा चानुमानप्रयोजकवाक्यार्थज्ञानजनकवाक्यत्वं न्यायत्वं तादृशन्यायजन्यज्ञानप्रयोज्यं व्याप्तिज्ञानं परार्थानुमानमित्यर्थः । अवयवाश्च कतीत्यपेक्षायामाह—**अवयवाश्चेति** । साध्यतावच्छेदकावच्छिन्नसाध्यविषयताविलक्षणविषयताकबोधाजनकत्वे सति प्रकृतपक्षे प्रकृतसाध्यबोधजनकमहावाक्यैकदेशत्वं प्रतिज्ञाऽवयवत्वम् , यथा पर्वतो वह्निमानित्यादि । साध्यतावच्छेदकावच्छिन्नसाध्यान्वितस्वार्थकनामैकदेशत्वं हेत्ववयवत्वम् , यथा धूमादित्यादि । साधनवत्ताप्रयुक्तसाध्यवत्तानुभावकबोधावयवत्वमुदाहरणावयवत्वं, यथा यो यो धूमवान् स सोऽग्निमान् यथा महानस इत्यादि । प्रकृतोदाहरणोपदर्शितव्याप्तिविशिष्टपक्षबोधजनकन्यायैकदेशत्वमुपनयावयवत्वं, यथा वह्निव्याप्यधूमवा-

---

(१) अनुमितिचरमकारणपक्षधर्मताज्ञानप्रयोजकशाब्दज्ञानजनकवाक्यत्वम् अवयवत्वम् । वह्निमानित्याकारिकाऽनुमितेश्चरमकारणं यद् धूमवानयमित्याकारकं पक्षधर्मताज्ञानं, तस्य प्रतिज्ञाहेतूदाहरणाः अवयवास्तु इति पक्षे—परम्परया साक्षाद्वा जनकानि यानि—वह्निसम्बन्ध्यभिन्नः पर्वतः, धूमसम्बन्ध्यभिन्नः धूमव्यापकवह्निसम्बन्ध्यभिन्नः पर्वतः-इत्याकारकाणि शाब्दज्ञानानि, तज्जनकत्वे सति वाक्यत्वं प्रतिज्ञाऽऽद्यवयवेषु इति लक्षणसमन्वयः । एवमुदाहरणादिपक्षेऽपि ज्ञेयम् ।

(२) रागपुस्तकयोः तु शब्दो न दृश्यते, मूलानुरोधादावश्यकः ।

रणरूपाः, उदाहरणोपनयनिगमनरूपा वा, (१) न तु पञ्चावयवरूपाः । अवयवत्रयेणैव व्याप्तिपक्षधर्मतयोरुपदर्शनसम्भवेनाधिकावयवद्वयस्य व्यर्थत्वात् ।

एवमनुमाने निरूपिते तस्माद् ब्रह्मभिन्ननिखिलप्रपञ्चस्य मिथ्यात्वसिद्धिः । तथा हि, ब्रह्मभिन्नं सर्वं मिथ्या,

---

वायम्, तथा चायमिति वा । व्याप्तिविशिष्टपक्षधर्महेतुज्ञाप्यसाध्यविशिष्टपक्षबोधकन्यायैकदेशत्वम्, तादृशज्ञाप्यबोधकन्यायैकदेशत्वं वा निगमनावयवत्वं यथा तस्मादिमानित्यादि । ननु प्रतिज्ञाहेतूदाहरणोपनयनिगमनरूपाः पञ्चावयवा इति वदता नैयायिकाना पञ्चमनादृत्याध्वरमीमांसकाना पञ्चाभ्युपगमे को हेतुरित्यत आह—अवयवत्रयेणैवेति । तथा च प्रथमपक्षे उपनयनिगमनकृत्यं हेतुप्रतिज्ञाभ्यां द्वितीयपक्षे हेतुप्रतिज्ञाकृत्यं ताभ्यां कर्तुं शक्यम् । अनुमित्युपयोगिज्ञानं च सर्वावयवकृत्यमिति भावः ।

निरूपितानुमानस्य प्रकृते उपयोगमाह–एवमिति । तस्माद्—अनुमानात् । कीदृशं तदनुमानमित्यपेक्षायामाह–तथा हीति । पूर्वोक्तपक्षद्वये प्रथमपक्षोऽस्मत्संमत इति द्योतयितुं प्रतिज्ञाद्यवयवत्रयात्मकं वाक्यमाह–ब्रह्मेति । शुक्तिरूप्यादौ सिद्धसाधनवारणाय–सर्वमिति । ब्रह्मणि बाधनिरासाय–ब्रह्मभिन्नमिति । रज्जुसर्पादौ साध्यसिद्धावपि न सिद्धसाधनम् (२), अनित्ये वाङ्मनसे इत्यत्र अंशतःसिद्धसाधनस्य

---

(१) किमुपनयादेः व्याप्तिप्रदर्शनं प्रयोजनम् ? उत पक्षधर्मताप्रदर्शनम् ? आहोस्विद् व्याप्तिविशिष्टपक्षधर्मताज्ञानप्रदर्शनम् ? नान्त्यः, लिङ्गपरामर्शकारणत्वस्य निराकृतत्वेन व्याप्तिविशिष्टपक्षधर्मताप्रतिपादनस्य व्यर्थत्वात् । नाद्यद्वितीयौ, तयोरवयवत्रयेणैव सम्पत्तेरित्यभिसन्धायाह–न त्विति ।

(२) न सिद्धसाधनं, पक्षतावच्छेदकनानात्वाभावात् । पक्षतावच्छेदकनानात्वे एव तदभ्युपगमात् । अत एव, अनित्ये० इत्यादिपाठः । गपुस्तके उपलभ्यते स च टिप्पणीरूपटीकायां गत इति लक्ष्यते, मूलपुस्तके तदभावान्न निवेशितोऽत्र ।

ब्रह्मभिन्नत्वाद्यदेवं तदेवं यथा शुक्तिरूप्यम्। न च दृष्टान्तासिद्धिः, तस्य साधितत्वात्। न (१) चाप्रयोजकत्वं शुक्तिरूप्यरज्जुसर्पादीनां मिथ्यात्वे ब्रह्मभिन्नत्वस्यैव लाघवेन प्रयोजकत्वात्।

मिथ्यात्वं (२) च स्वाश्रयत्वेनाभिमतयावन्निष्ठात्यन्ता

परैरभ्युपगतत्वात्। नन्वसिद्धोऽयं दृष्टान्तः, तन्मिथ्यात्वे प्रमाणाभावात्। अनुमानान्तरस्य तत्र प्रमाणत्वेऽनवस्थापातादित्याशङ्क्य ९ न चेति। तस्य-दृष्टान्तस्य। साधितत्वात्-प्रत्यक्षपरिच्छेदे साधितत्वात्। नन्विदमनुमानमप्रयोजकं सत्यत्वेऽपि ब्रह्मभिन्नत्वे बाधकाभावादित्याशङ्क्य परिहरति—न चेति। शुक्तिरजतादीनां मिथ्यात्वे नाविद्याऽतिरिक्तदोषजन्यत्वं प्रयोजकम् अपि तु ब्रह्मभिन्नत्वं, लाघवात्। तथा च लाघवरूपानुकूलतर्कसत्त्वान्नाप्रयोजकत्वमिति भावः।

ननु शुक्तिरूप्यादौ किं लक्षणं मिथ्यात्वं प्रत्यक्षसिद्धं यदनुमानेन प्रपञ्चे साध्यते? इत्यपेक्षायां मिथ्यात्वलक्षणमाह—मिथ्यात्वं चेति।

---

(१) साध्याभाववद्वृत्तिर्हेतुर्व्यभिचारी, तेन हेतुना तत्र अनुमितिर्न जायते। यथा धूमवान् वह्नेरित्यत्र वह्निरूपहेतुना नानुमितिः। इतो साध्याभाववद्वृत्तित्वरूपव्यभिचारज्ञाने अनुमितिर्न भवति, यथा धूमोऽस्तु वह्निर्मास्त्विति। अनुकूलतर्केण व्यभिचारशङ्कानिवृत्तौ तु प्रतिबन्धकाभावे पुनरनुमितिः, यथा यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यात्, धूमस्य वह्निव्याप्यत्वात्। अस्ति चात्र धूमो वह्निनाऽपि भाव्यमिति। तथा प्रकृते ब्रह्मभिन्नत्वमस्तु मिथ्यात्वं माऽस्त्विति व्यभिचारशङ्का अनुमितिप्रतिबन्धकीभूता लाघवेनानुकूलतर्केण न चेन्निरस्यते। प्रकृते च ब्रह्मभिन्नत्वमस्तु मिथ्यात्वं माऽस्त्विति व्यभिचारशङ्का निरासार्थं दीकायां स्पष्टम्।

(२) घटादीनां मिथ्यात्वसिद्धिप्रकार इत्थम्—घटादीनां प्रकाशादिदोष भ्रम सकलादेव सिद्धिर्नाङ्गीक्रियते चेदिति वदन्ति। ते केवलादावपि च सन्तीति भ्रमत्वेनाद्वैतेऽत्र च मायया तत्र एव मिथ्याभूतास्ते सिद्धयेत्।

भावप्रतियोगित्वम् । अभिमतपदं वस्तुतः स्वाश्रयाप्रसिद्ध्या असंभववारणाय । यावत्पदमर्थान्तरवारणाय । तदुक्तम्—

सर्वेषामेव भावानां(१) स्वाश्रयत्वेन सम्मते ।
प्रतियोगित्वमत्यन्ताभावं प्रति मृषात्मता ॥ इति ।चि० ७।

स्वाश्रयत्वेनाभिमते यावति स्थितोऽत्यन्ताभावस्तत्प्रतियोगित्वम् । ननु स्वाश्रययावन्निष्ठात्यन्ताभावप्रतियोगित्वमित्येतावदेवास्त्वित्याशङ्क्याह—अभिमतेति । यावति स्वाश्रये स्वात्यन्ताभावासम्भवस्तद्वारणाय तदावश्यकम् । तथा च वस्तुतोऽस्वाश्रयेऽपि शुक्त्यादौ स्वाश्रयत्वेनाभिमते वर्तमानो योऽत्यन्ताभावस्तत्प्रतियोगित्वं शुक्तिरूप्यादेरस्तीति तत्सार्थक्यमिति भावः । ननु एतावतैव निर्वाहे यावत् पदं व्यर्थमित्यत आह—यावदिति । तथा च यावत्पदाभावे कपिसंयोगाश्रयत्वेनाभिमते वृक्षे मूलावच्छेदेन वर्तमानो यस्तदत्यन्ताभावस्तत्प्रतियोगित्वं शाखावच्छेदेन स्थितस्य कपिसंयोगस्यास्तीति सामानाधिकरण्यरूपार्थान्तरसिद्धिस्तद्वारणाय तदावश्यकम् । तद्दाने तु स्वाश्रयत्वेनाभिमते यावति शाखादौ तदत्यन्ताभावासत्त्वान्न दोष इत्यर्थः । अस्मन्मते 'तस्माद्वा एतस्मादात्मन आकाशः संभूत' (तै० २।१) इत्यादिश्रुत्या आकाशादेरपि जन्यत्वावगमात्तस्यापि स्वकारणाधितत्वावश्यम्भावाद् न तत्रांश्याप्तिः । स्वोक्तलक्षणे विद्वदाचार्यसम्मतिमाह—तदुक्तमिति ।

यथाहुः 'यदसद् भासमानं तन्मिथ्या स्वप्नगजादिवत्' इति । मिथ्यात्वे चानुमानप्रमाणमुपन्यस्त तस्य च न प्रत्यक्षेण बाधः शङ्कनीयः, चन्द्रप्रादेशिकत्वग्राहकप्रत्यक्षवद् आगमेनैर्बाधात् । आगमास्तु नेह नानाऽस्ति किञ्चनेत्याद्या अनुसन्धेया इति दिक् ।

(२) भावत्वेन स्वोक्तानां घटादीनाम् आश्रयत्वेनाभिमते कपालादौ विद्यमानस्य घटो नेत्याकारकस्याभावस्य प्रतियोगित्वं घटादेर्मिथ्यात्वमित्यर्थः।

यद्वा(१) अयं पट एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी पटत्वात् पटान्तरवदित्याद्यनुमानं मिथ्यात्वे प्रमाणम्। तदुक्तम्—

अंशिनः स्वांशगात्यन्ताभावस्य प्रतियोगिनः ।
अंशित्वादितरांशीव दिगेषैव गुणादिषु ॥ इति । चि ८।

एवं प्राचीनोक्तमनुमानप्रयोगमुपपाद्य नवीनोक्तमनुमानप्रयोगमाह—यद्वेति। तादात्म्यसम्बन्धेनैकावच्छेदेनेत्यपि द्रष्टव्यम्। तथा च पूर्ववदर्थान्तरता। एवं व्यधिकरणधर्मानवच्छिन्नप्रतियोगिताकत्वमत्यन्ताभावविशेषणं देयं तेन तमादाय नार्थान्तरम्। तथा एतद्दोषवारणाय एतत्कालीनत्वमपि तद्विशेषणं देयम्। न चैतत्तन्तुषु पटसमवाय इति प्रत्यक्षबाध इति वाच्यम्। तस्य प्रत्यक्षस्य भ्रमप्रमासाधारणतया चन्द्रप्रादेशिकत्वप्रत्यक्षवदप्रामाण्यशङ्काऽऽस्कन्दितत्वेन बाधितत्वात्। अत्रापि चित्सुखाचार्यसम्मतिमाह तदुक्तमिति। दिगेषैव—एष एव मार्गः। रूपं रूपिनिष्ठात्यन्ताभावप्रतियोगि, गुणत्वात् स्पर्शवदित्येवं क्रियादिष्वप्यूहनीयम्।

---

(१) पटमात्रं पक्षीकृत्य एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वे साध्येऽर्थान्तरता स्यात्, पटान्तरस्य एतत्तन्तुनिष्ठत्वाभावादिति हेतो अयमिति पक्षविशेषणम्। तन्तुनिष्ठात्यन्ताभावप्रतियोगीत्युक्ते एतत्पटस्यापि तन्त्वन्तरनिष्ठात्यन्ताभावप्रतियोगित्वेन पुनरर्थान्तरतेति एतदिति साध्यविशेषणम्। तन्तु पटो नेत्यन्योन्याभावेन सिद्धसाधनवारणायात्यन्तेतिपदम्। तार्किकाणामेषा प्रणाली, दृष्टान्ते साध्यहेत्वोर्व्याप्यव्यापकभावो गृहीतो चेत् सन्दिग्धसाध्ये पक्षे हेतुं दृष्ट्वा साध्यमनुमेयम्। व्याप्यारोपेण व्यापकारोपस्तर्क इति तेषामभिमानः। तेन च धूमाग्निमत्त्वमनुमितं। तेषामेव प्रक्रियया पटान्तरे दृष्टान्ते पटत्वरूपहेतोः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वरूपस्य साध्यस्य च व्याप्यव्यापकभावेन प्रसिद्धयोरुपलब्धौ पक्षे चास्मिन् पटे साध्यसन्देहेऽपि पटत्वरूपस्य हेतोर्विद्यमानत्वादनुमानेन तत्सिद्धौ को विरोधस्तार्किकाणां पटादिमिथ्यात्वे इति भावः।

न च घटादेर्मिथ्यात्वे सन् घट इति प्रत्यक्षेण बाधः । अधिष्ठानब्रह्मसत्तायास्तत्र विषयतया घटादेः सत्यत्वासिद्धेः । न च नीरूपस्य ब्रह्मणः कथं चाक्षुषादिज्ञानविषयतेति वाच्यम् । नीरूपस्यापि रूपादेः प्रत्यक्षविषयत्वात् । न च नीरूपस्य द्रव्यस्य चक्षुराद्ययोग्यत्वमिति नियमः । मन्मते ब्रह्मणो द्रव्यत्वासिद्धेः । गुणाश्रयत्वं समवायिकारणत्वं वा द्रव्यत्वमिति ते(१)ऽभिमतम् । न हि निर्गुणस्य ब्रह्मणो गुणाश्रयता नापि समवायिकारणता, समवायासिद्धेः । अस्तु वा द्रव्यत्वं ब्रह्मणः, तथाऽपि नीरूपस्य कालस्येव चाक्षुषादिज्ञानविषयत्वेऽपि न विरोधः ।

ननूक्तं मिथ्यात्वानुमानं सन्घट इत्यादि प्रत्यक्षबाधितमित्याशङ्क्य परिहरति-**न चेति** । ननु रूपादिहीनस्य ब्रह्मणश्चाक्षुषादिज्ञानविषयत्वमनुपपन्नमित्याशङ्क्य निषेधयति—**न च नीरूपस्येति** । नीरूपस्य प्रत्यक्षविषयत्वं नास्तीति नियमस्य व्यभिचारमाह – **नीरूपस्यापीति** । विशेषनियममाशङ्क्य परिहरति—**न चेति** । नियमशरीरस्योपरूपत्वेऽपि नास्त्यस्माकं क्षतिरित्याह—**मन्मत इति** । ननु कथं ब्रह्मणो द्रव्यत्वं नास्तीति चेत्तत्र तल्लक्षणद्वयाननुगमादित्याह-**गुणेति** । **निर्गुणस्य**-'साक्षी चेता केवलो निर्गुणश्च' (श्वे० ६।११) इत्यादिश्रुत्या निर्गुणत्वेन बोधितस्य । अस्तु यथा कथंचिद् ब्रह्मणोऽपि द्रव्यत्वं तथाऽपि न दोष इत्यभ्युपेत्याप्याह—**अस्तु वेति** । अस्मिन्काले घटो नास्तीति प्रतीतिबलात्कालस्येन्द्रियवेद्यत्वं यथा स्वीकृतमध्वरमीमांसकैस्तथा तदनन्यथासिद्धप्रतीतिबलाद् ब्रह्मणश्चाक्षुषत्वमस्माभिरप्यङ्गीक्रियते । तथा च ब्रह्मव्यतिरिक्तचाक्षुषतायामेव महत्त्वे सत्युद्भूतरूपवत्त्वं प्रयोजकमिति भावः ।

---

(१) तार्किकस्य मते ।

यद्वा, त्रिविधं सत्त्वम्—पारमार्थिकं व्यावहारिकं प्रातिभासिकं च । पारमार्थिकं सत्त्वं ब्रह्मणः, व्यावहारिकं सत्त्वमाकाशादेः, प्रातिभासिकं सत्त्वं शुक्तिरजतादेः । तथा च घटः सन्निति प्रत्यक्षस्य व्यावहारिकसत्त्वविषयत्वेन प्रामाण्यम् । अस्मिन्पक्षे च घटादेर्ब्रह्मणि निषेधो न स्वरूपेण, किन्तु पारमार्थिकत्वेनैवेति न विरोधः । अस्मिन्पक्षे च मिथ्यात्वलक्षणे पारमार्थिकत्वावच्छिन्नप्रतियोगिताकत्वमत्यन्ताभाव(१)विशेषणं द्रष्टव्यम् । तस्मादुपपन्नं मिथ्यात्वानुमानमिति ।

इत्यनुमानपरिच्छेदः समाप्तः ॥ २ ॥

नन्वेवं तर्ह्याकाशो बलाकेति प्रतीतिबलादाकाशस्यापि चाक्षुषत्वं स्यादित्यत आह—**यद्वेति** । पारमार्थिकत्वव्यावहारिकत्वप्रातिभासिकत्वभेदात्त्रिविधम् । विषयभेदान्नविरोध इत्याह—**तथा चेति** । सत्त्वत्रैविध्ये सतीत्यर्थः । ननु अस्मिन्पक्षे निषेधप्रतियोगिनोः सामानाधिकरण्यं सिद्ध्यति, न तु घटादिमिथ्यात्वमित्याशङ्क्याह—**अस्मिन्निति** । स्वरूपेण—व्यावहारिकत्वेन रूपेण । तथा चैतत्पक्षे मिथ्यात्वलक्षणे इदं विशेषणं देयमित्याह—**अस्मिन्निति** । मिथ्यात्वानुमानोपपादनमुपसंहरति—**तस्मादिति** ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिसूरिसुतशिवदत्तविरचितायां परिभाषार्थदीपिकायामनुमानपरिच्छेदः समाप्तः ॥ २ ॥

---

(१) मात्र इति विशेषणमिति पाठः गपुस्तके ।

अथोपमानपरिच्छेदः ३

(१) अथोपमानं निरूप्यते । तत्र सादृश्यप्रमाकरणमु-

अथ क्रमप्राप्तमुपमाननिरूपणं प्रतिजानीते—अथेति । अनुमाननिरूपणानन्तरमित्यर्थः । तत्रेति । अनुमाननिरूपणानन्तरनिरूपणविषयीभूतोपमाने सतीत्यर्थः । अत्राप्युपमीयतेऽनेनेत्युपमानमिति व्युत्पन्न उपमानशब्दो लक्षणम् , अव्युत्पन्नस्तु लक्ष्यमित्याशयेनाह—सादृश्येति । सादृश्यप्रमाया—उपमितिप्रमायाः करणमाधारणकारण-

---

(१) प्रत्यक्षमेवैकं प्रमाणमिति चार्वाकाः, अनुमानमपीति वैशेषिकाः, आगमेन सह त्रीणीति शाङ्ख्याः, उपमानेन सह चत्वारीति नैयायिकाः, अर्थापत्त्या सह पञ्चेति प्राभाकराः, अनुपलब्ध्या सह षडिति भाट्टवेदान्तिनौ, सम्भवैतिह्याभ्यामष्टाविति पौराणिकाः, चेष्टया सह नवेत्यालङ्कारिकाः, 'इति सन्ति तत्तत्तीर्थकराणां विप्रतिपत्तयः । तत्र साङ्ख्यान्तानां मतनिरासपूर्वकं स्वसिद्धान्तं प्रतिजानीते—अथेति ।

अत्र सादृश्यज्ञानमेव प्रमाणं सादृश्यप्रमैव च प्रमितिरिति भवति विपठीषूणां प्रातिकूल्यमिति किञ्चिद्विचारयामः । ग्रामे दृष्टगुः पुरुषः कदाचिद्वनं गतः गवये नेन्द्रियसन्निकर्षे जाते प्रत्येति अयं पशुः गोसदृश इति । पश्चादुपमिनोति—अनेन सदृशी मदीया गौरिति । तत्र द्वितीयं ज्ञानं उपमितिप्रमेति व्यवदिश्यते, तदुत्पादकं प्रथमं सादृश्यज्ञानम् 'अयं पशुः गो सदृश' इति तत्तु उपमान प्रमाणमिति । (उपमितिप्रमा सादृश्यप्रमेति पर्यायान्तरम्) इयं सादृश्यप्रमा नेन्द्रियादिजन्या, अतस्तस्याः प्रत्यक्षादितोऽतिरिक्तत्वमेव । एवञ्च तस्याः करणं सादृश्यज्ञानमपि पृथक् प्रमाणमिति सिद्धम् । उपमितिश्च सादृश्यज्ञानत्वेन सादृश्यज्ञानजन्येति न उपमितिजन्यानुव्यवसायादावतिव्याप्तिरित्यनुसन्धेयम् । उपमितिकरणत्वं च सादृश्यज्ञाने असाधारणकारणत्वेन विवक्षितं न तु व्यापारवत्त्वघटितमिति बोध्यम् । गवयनिष्ठसादृश्यज्ञानस्योपमितौ जनयितव्यायां व्यापाराभावाद् इत्येके ।

पमानम्। तथा हि; नगरेषु दृष्टगोपिण्डस्य पुरुषस्य वनं गतस्य गवयेन्द्रियसन्निकर्षे सति भवति प्रतीतिः, अयं पिण्डो गोसदृश इति। तदनन्तरं भवति निश्चयः, अनेन सदृशी मदीया गौरिति। तत्रान्वयव्यतिरेकाभ्यां गवयनिष्ठ-

मुपमानमित्यर्थः। ननूपमानस्य प्रत्यक्षाद्यन्तर्भावात् पृथक्प्रमाणतेति साङ्ख्यादिभिरुक्तत्वात्कथमुपमानस्य सादृश्यज्ञानकरणतेत्याशङ्क्याह—तथा हीति। यथोपमानस्य सादृश्यप्रमाकरणत्वं तथा प्रदर्श्यते इत्यर्थः। गोसदृशः—गोभिन्नत्वे सति गोगतभूयोधर्मवान्। तत्र-निश्चयद्व-

---

विश्वनाथस्तु—

ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम्।
सादृश्यधीर्गवादीनां या स्यात्सा करणं मतम्॥

गोसदृशो गवयपदवाच्य इति श्रुत्वा वनं गतस्य दृष्टे गवयपिण्डे तत्र गोसादृश्यदर्शनं जातं तदुपमितिकरणम्। तदनन्तरं गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थस्मरणं जायते तदेव व्यापारः। तदनन्तरं गवयो गवयपदवाच्य इति ज्ञानं यज्जायते तदुपमितिः, न त्वयं गवयपदवाच्य इति, गवयान्तरे शक्तिग्रहाभावप्रसङ्गादिति जगाद। परन्तु दृष्टगोपिण्डस्य गवयो गोसदृशो भवतीत्यश्रुतातिदेशवाक्यस्यापि वनं गतस्य गवयेनेन्द्रियसंयोगानन्तरं भवति प्रतीतिः अयं पिण्डो गोसदृश इति, अनेन सदृशी मदीया गौरिति चोपमितिः। तथा चातिदेशवाक्यार्थस्मरणरूपा मध्ये व्यापारकल्पना निष्प्रयोजना। गवयान्तरे शक्तिग्रहोऽपि सादृश्यज्ञानादेव सादृश्यविशिष्टशक्तिग्रहाद् भविष्यतीति न मध्ये व्यापारापेक्षेति। तथा च विश्वनाथमते अनुभवापलापोऽपि दृश्यते। अनुभवस्तु अयं पिण्डो गोसदृश इत्येव भवति, न तु गवयो गवयपदवाच्य इति। यथा गोगवयगजाश्वादिषु पुरः स्थितेषु कोऽपि पृच्छेद् गवयपदवाच्यः क इति, तत्र गवयो गवयपदवाच्य इति प्रतिवक्ता उन्मत्तवदुपेक्ष्येतैव, अयं गवयपदवाच्य इत्येव तत्र प्रतिवक्तव्यं भवति। तथैव गोनिष्ठसादृश्यज्ञानोत्तरमपि अयं गवय इति, अयं मदीयगोसदृश इति वा प्रमा उत्पद्यत इति संक्षेपः।

गोसादृश्यज्ञानं करणं गोनिष्ठगवयसादृश्यज्ञानं फलम्।

न चेदं प्रत्यक्षेण सम्भवति, गोपिण्डस्य तदेन्द्रियासन्निकर्षात्। नाप्यनुमानेन, (१) गवयनिष्ठगोसादृश्यस्यातल्लिङ्गत्वात्।

मध्ये। अयं पिण्डो गोसदृश इति गोनिरूपितगवयपिण्डनिष्ठसादृश्यज्ञानं करणम्। अनेन सदृशी मदीया गौरिति गवयपिण्डनिरूपितगोनिष्ठसादृश्यज्ञानं फलम्। प्रथमज्ञाने जाते सति द्वितीयज्ञानस्योपदर्शनात्तद्विना तदभावादित्यन्वयव्यतिरेकाभ्यां प्रथमज्ञानस्योपमानत्वं द्वितीयज्ञानस्योपमितित्वमित्यर्थः।

न चास्य प्रत्यक्षेण गतार्थतेत्याह—न चेति। इदं-गवयप्रतियोगिकगोनिष्ठसादृश्यज्ञानम्। तदा-गवयपिण्डेनेन्द्रियसन्निकर्षसमये। तथा चेन्द्रियासंनिकृष्टगोपिण्डनिष्ठसादृश्यज्ञानं न प्रत्यक्षप्रमाणफलमित्यर्थः। एतेन यत्तु(२) गवयस्य चक्षुःसन्निकृष्टस्य गोसादृश्यज्ञानं तत्प्रत्यक्षमेव अत एव स्मर्यमाणायां गवि गवयसादृश्यज्ञानं प्रत्यक्षम्, न ह्यन्यद्गवि सादृश्यमन्यच्च गवये भूयोऽवयवसामान्ययोगो जात्यन्तरवर्ती जात्यन्तरसादृश्यमुच्यते सामान्ययोगश्चैकः स चेद्गवये प्रत्यक्षो

---

(१) नवयेति। दृष्टान्ते साध्यहेत्वोः सहचारदर्शनेन व्याप्तिग्रहे सति पक्षे हेतुदर्शनेन साध्यविषयाऽनुमितिरुत्पद्यतेऽनुमानेन। प्रकृतेऽत्र साध्यहेत्वोः साहचर्यग्रहाभावान्नास्त्यनुमानानवकाशः। सादृश्यं हि प्रतियोग्यनुयोगिसापेक्षो धर्मविशेषः। ततो गवयनिष्ठगोसादृश्यं गवये तद् गवि नास्ति, गोनिष्ठं गवयसादृश्यं गवि वर्तते तद् गवये नास्तीति साहचर्याभावादेव गवयनिष्ठगोसादृश्यस्य तल्लिङ्गत्वाभावाच्चानुमानावकाश इति भावः। अनुमानप्रकारस्तु टीकायां द्रष्टव्यः।

(२) यत्त्विति। ईश्वरकृष्णीयपद्यकारिकायाः साङ्ख्यतत्त्वकौमुद्यां वाचस्पतिमिश्रोक्तिरियम्।

नापि मदीया गौरेतद्गवयसदृशी, एतन्निष्ठसादृश्यप्रतियोगित्वाद्, *यो यद्गतसादृश्यप्रतियोगी, स तत्सदृशः*, यथा मैत्रनिष्ठसादृश्यप्रतियोगी चैत्रः मैत्रसदृश इत्यनुमानात्तत्संभव इति वाच्यम् । एवं विधानुमानानवतारेऽप्यनेन सदृशी मदीया गौरिति प्रतीतेरनुभवसिद्धत्वात् । उप

गव्यपि तथेति नोपमानस्य प्रमाणान्तरत्वमस्तीति(१)प्रयुक्तम्, प्रत्येकविधया सादृश्यैक्येऽपि प्रतियोगिधर्मिभेदेन भेदाभ्युपगमादिन्द्रियसन्निकृष्टगवयनिष्ठसादृश्यज्ञानस्य प्रत्यक्षत्वेऽपि तदसन्निकृष्टगोनिष्ठस्य तस्य प्रत्यक्षत्वासम्भवात् । नाप्यनुमानेनास्य गतार्थतेत्याह—नापीति । न हि मदीया गौरेतन्निरूपितसादृश्यवती गोनिरूपितसादृश्यवत्त्वादस्येत्यनुमातुं शक्यं, गोनिरूपितगवयनिष्ठसादृश्यस्य गव्यवर्तमानत्वेन पक्षावृत्तितया तल्लिङ्गत्वाभावादित्याह—गवयनिष्ठेति ।

अनुमानान्तरेण तत्सम्भवमाशङ्क्य परिहरति—नापीति । तत्सम्भवः—गवयनिरूपितगोनिष्ठसादृश्यप्रमासम्भवः । अस्त्वेव यथाकथञ्चिदनुमानोत्थानं तथाऽपि गोनिष्ठं सादृश्यं नानुमानप्रमेयं तथा भूतानुमानानुत्थानेऽपि निरुक्तज्ञानस्य सर्वानुभवसिद्धत्वादनुमानस्यान्वयव्यतिरेकाभ्यां तत्कारणतासिद्धेः । अन्यथा यत्र यत्रानुमानावतरणसम्भवस्तस्य तस्यानुमानप्रमेयत्वे प्रत्यक्षसिद्धस्य घटादेरपि तत्प्रमेयतया तत्सिषाधयिषया सर्वत्रायं घटः कम्बुग्रीवादिमत्त्वाद् घटान्तरवदित्येवमादिनाऽनुमानसम्भवात्प्रत्यक्षप्रमाणस्याप्यनुमानेऽन्तर्भावः स्यादित्याशयेनाह—एवंविधेति । अनुव्यवसायादपि सादृश्यज्ञानमुपमानफलमित्याह—उपमिनोमीत्यनुव्यवसायाच्चेति । एतेन

(१) इति तत्त्वचिन्तामणिः । अत्र यत्तु इत्यनुरोधात् तद् [illegible] पाठेन भाव्यम् । अथवा अध्याहार्यं तत् पदम् ।

मिनोमीत्यनुव्यवसायाच्च । तस्मादुपमानं मानान्तरम् ।
इत्युपमानपरिच्छेदः ॥ ३ ॥

अथागमपरिच्छेदः ४

(१) अथागमो निरूप्यते । यस्य वाक्यस्य तात्पर्य-

योऽप्ययं गोसदृशस्य गवयशब्दो वाचक इति प्रत्ययः सोऽप्यनुमानमेव । यो हि शब्दो यत्र वृद्धैः प्रयुज्यते सोऽसति वृत्त्यन्तरे तस्य वाचको यथा गोशब्दो गोत्वस्य, प्रयुज्यते चैवं गवयशब्दो गोसदृश इति तस्यैव वाचक इति प्रत्युक्तम् । अत एव न तज्ज्ञानमागमस्यापि फलं गवयसदृशी मदीया गौरिति वाक्यमश्रुतवतोऽपि तथाभूतज्ञानोत्पत्तिदर्शनात्तस्मादुपमानं न प्रत्यक्षाद्यन्तर्गतमित्युपसंहरति-**तस्मादिति**।

इति श्रीपरमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तावतंसरामकुमारसूनुधनपतिसूरिसुतशिवदत्तकृतायां वेदान्तपरिभाषाऽर्थदीपिकायामुपमानपरिच्छेदः समाप्तः ॥ ३ ॥

क्रमप्राप्तमागमनिरूपणं प्रतिजानीते—**अथेति** । उपमाननिरूपणानन्तरं शब्दो निरूप्यत इत्यर्थः । तत्रागमप्रमाणं लक्षयति—**यस्येति** । मानान्तराबाधिततात्पर्यगोचरीभूतपदार्थसंसर्गबोधकवाक्यं शब्दप्रमाणमित्यर्थः । शब्दसमानार्थके प्रमाणान्तरेऽतिव्याप्तिवारणायोक्तं **वाक्यस्येति** । वह्निना सिञ्चेदिति वाक्यस्य प्रमाणत्वनिरासायोक्तं-

---

(१) अत्र आगमप्रमाप्रमाणविषयमधिकृत्य विपठीषूणामुपकाराय किञ्चिद्विचारयामः । केचनान्तेवासिनः 'वरसम्बन्धान' इत्यादिवाक्यश्रवणजन्यज्ञानं तदेव शब्दज्ञानमिति, तथा श्रुतं वाक्यमेव शब्दप्रमाणमिति चावगच्छन्ति । परन्तु तदुभयमपि भ्रम एव । तस्य श्रवणस्य श्रोत्रजस्य प्रत्यक्षप्रमात्वात् तत्करणमपि

विषयीभूतसंसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणम्। वाक्यजन्यज्ञाने च आकाङ्क्षा योग्यताऽऽसत्तयस्तात्पर्यज्ञानं चेति चत्वारि कारणानि।

मानान्तरेण न बाध्यते इति। स प्रजापतिरात्मनो वपामुदखिददि त्यादावव्याप्तिवारणाय—तात्पर्यविषयीभूतेत्युक्तम्। मानान्तरेण इत्यस्य सजातीयप्रमाणान्तरेणेत्यर्थः। साजात्यं च व्यावहारिकतत्त्वावेदकत्वेन बोध्यम्, तेन पारमार्थिकतत्त्वावेदकैः 'नेह नानास्ति किंचन' (क०२-१) इति वेदान्तैः घटानयनादिसंसर्गस्य यागस्वर्गादि साध्यसाधनभावस्य(१)च बाधेऽपि न क्षतिः। एतेनानुमानात्पृथक्शब्दमनङ्गीकुर्वन्तो वैशेषिका परास्ता वेदितव्याः। ते हि लौकिकानि गामानयेत्यादीनि, वैदिकानि 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादीनि तात्पर्यविषयपदार्थसंसर्गप्रमापूर्वकाणि योग्यतासत्तिमत्पदकदम्बकत्वात्पटमानयेत्यादिवदित्याद्यनुमानेनैव शब्दार्थसिद्धेः शब्दो न पृथक् प्रमाणमिति वदन्ति। कथमागमोऽनुमानात्पृथक् प्रमाणमित्याशङ्क्य योग्यतादिसहकारजनितज्ञानस्यानुमानफलत्वाभावात्तथाभूतज्ञानजनकं वाक्यं पृथक् प्रमाणमवश्यमभ्युपेयमित्याशयेनाह—वाक्य

श्रोत्रमेव तत्तु प्रत्यक्षप्रमाणमेवेति। शाब्दी प्रमा तु मानान्तराबाधिततात्पर्यविषयीभूतस्य संसर्गस्य या प्रमा सैव। तथा च वाक्यश्रवणानन्तरम्—अमन्दस्सरूपप्रतिपदिकस्य आख्यातान्तस्येव 'वत्सस्य गर्भः बन्धनक्रियाबोधकत्वम् इत्येवंरूपा वाक्यार्थवाक्ययोः बोध्यबोधकभावरूपा या सा शाब्दीप्रमा। तस्याः करणमपि उक्तसंसर्गबोधकवाक्यज्ञानमेव। तस्मिन् ज्ञाने च आकाङ्क्षा योग्यतासत्तयः तात्पर्यज्ञानं चेति चत्वारि सहकारिकारणानीति। तथा च वाक्यज्ञानस्यैव प्रमाणत्वेऽपि प्रकारविधया वाक्ये प्रमाणत्वव्यवहार इति ध्येयम्।

(१) यागादेः स्वर्गादेश्च यः साध्यसाधनभावः संसर्गः, तस्य च 'नेह नानास्ति किंचन'इत्यादिश्रुत्या बाधेऽपि न क्षतिः—नाव्याप्तिः। तस्य पारमार्थिक

तत्र पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वमाकाङ्क्षा(१) । क्रियाश्रवणे कारकस्य कारकश्रवणे क्रियायाः करणश्रवणे इतिकर्तव्यतायाश्च जिज्ञासाविषय-

---

जन्यज्ञाने चेति । तथा चासत्यपि व्याप्तिज्ञाने विद्यमानेष्वाकाङ्क्षादिषु संसर्गज्ञानोपलम्भादागमस्यानुमानेऽन्तर्भावः । क्लृप्तेनानुमानप्रमाणेनैव निर्वाहे पृथक् प्रमाणं न कल्पनीयमिति यद्याग्रहस्तर्हि मनसैव क्लृप्तेन प्रत्यक्षप्रमाणेन निर्वाहादनुमानमप्यतिरिक्तं प्रमाणं नाभ्युपेयम् । यद्यनुमिनोमीत्यनुव्यवसायबलादभ्युपेयते, तर्हि शब्दादमुमर्थं जानामीत्यनुव्यवसायबलादागमोऽवश्यमभ्युपगन्तव्य इति भावः । तात्पर्यज्ञानस्य बहुवादिभिरनङ्गीकारात्पृथगुपादानम् ।

क्रमेणाकाङ्क्षादिस्वरूपमाह—तत्रेति । आकाङ्क्षादिषु चतुर्षु कारणेषु मध्ये । कुत एतदित्याशङ्क्य क्रियादिश्रवणे कारकादेर्जिज्ञासाविषयत्वोपलम्भात्पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वमाकाङ्क्षास्वरूपमित्याह—क्रियेति । आनयेति क्रियायाः श्रवणे घटमिति कारकस्य जिज्ञासाविषयत्वम्, घटमिति कारकस्य श्रवणे आनयेति क्रियायाः; दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति स्वर्गकरणश्रवणे समिधो यजति इडो यजतीत्यादीतिकर्तव्यतायास्तच्छ्रवणे करणस्य चेत्यर्थः । ननु लाघवादावश्यकत्वाच्च विषयत्वपर्यन्तमेवाऽऽकाङ्क्षालक्षणमस्तु कि

तत्त्वावेदिकायाः व्यावहारिकतत्त्वावेदकैः ज्योतिष्टोमादिवाक्यैः साजात्याभावादित्यर्थः ।

(१) गामानयेत्यत्र लक्षणसमन्वयः, आनयेति श्रवणे कर्मणो जिज्ञासाविषयत्वं गामित्युक्ते क्रियायाः, तथा च परस्परस्य कर्मणः क्रियायाश्च या जिज्ञासा श्रोतुः, तद्विषयत्वं कर्मक्रिययोश्चेति ।

त्वात्(१) । अजिज्ञासोरपि(२)वाक्यार्थबोधाद् योग्यत्व-मुपात्तम् । (३) तदवच्छेदकं च क्रियात्वकारकत्वादिक-मिति नातिव्याप्तिः गौरश्व इत्यादौ । (४) अभेदान्वये च

योग्यत्वोपादानेनेति चेत्तत्राह—अजिज्ञासोरपीति । तथा च जिज्ञासारहितस्य वाक्यजन्यज्ञाने पदार्थानां पारस्परजिज्ञासाविषयत्वाभावेऽपि तद्योग्यत्वसत्त्वान्नाव्याप्तिरित्यर्थः । ननु अत्र सास्तीत्याकाङ्क्षायामाह तदवच्छेदकं किमित्याकाङ्क्षायामाह—तदिति । तथा च गौरश्व इत्यादौ क्रियात्वादेस्तदवच्छेदकस्याभावादाकाङ्क्षाऽसत्त्वान्नातिव्याप्तिरित्यर्थः । ननु तत्सहितेषु नीलमुत्पलं तत्त्वमसीत्यादिवाक्येष्वाकाङ्क्षावच्छेदकराहित्यादव्याप्तिरित्याशङ्क्याह—अभेदान्वय इति । अभे

(१) तत्र लक्षणसमन्वय इति शेषः ।

(२) ननु गामानयेति श्रुतवतां सर्वेषां न जिज्ञासा भवति, तथा च येषां जिज्ञासा नास्ति तेषां जिज्ञासाविषयत्वमपि पदार्थानां नास्तीत्यव्याप्तिरिति चेन्न । तान् प्रत्यपि तद्योग्यत्वं वर्तते, अतो नाव्याप्तिरिति योग्यत्वपदप्रयोजनेन प्रथयति ।

(३) अव्याप्तिं योग्यत्वपदादानेन निरस्य योग्यतावच्छेदकत्वविवक्षया अतिव्याप्तिं निरस्यति-तदवच्छेदकं चेति । क्रियात्वादेरवच्छेदकत्वविवक्षणेन गौरश्वः पुरुषो हस्तीत्यादौ कारकत्वाभावान्नाकाङ्क्षा । कारकत्वं च क्रियाजनकत्वं करोतीति कारक इति व्युत्पत्त्या कारकस्य कर्तरि व्युत्पन्नत्वात्, तथा च गौरश्व इत्यादौ गवादिपदानां क्रियाजनकत्वाभावेन कारकत्वाभावात् नाकाङ्क्षाविरह इति ।

(४) ननु गौरश्व इत्यादिषु अतिव्याप्तिनिरासार्थमवच्छेदकस्य क्रियात्वादेर्विवक्षायां सोऽयं देवदत्तः तत्त्वमसीत्यादिवाक्येषु क्रियात्वादेरभावादनन्वयव्याप्तिरिति चेन्न । तत्र समानविभक्तिकपदप्रतिपाद्यत्वरूपस्यावच्छेदकस्य सत्त्वात् । न च तथा वे गौरश्व इत्यादावपि प्रथमाविभक्त्यन्तपदप्रतिपाद्यत्वसत्त्वात् पुनरतिव्याप्तिरिति वाच्यम्, गवाश्वादेर्भेदस्य प्रत्यक्षसिद्धत्वेन तदभेदे योग्यताऽभावादित्यप्यनुसन्धेयम् ।

समानविभक्तिकप्रतिपाद्यत्वं तदवच्छेदकमिति तत्त्वमस्यादिवाक्येषु नाव्याप्तिः।

एतादृशाकाङ्क्षाऽभिप्रायेणैव बलाबलाधिकरणे 'सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इत्यत्र वैश्वदेव-

देनान्वयो यत्र तत्त्वमस्यादिवाक्येऽवच्छेद्ययोग्यत्वलक्षणाकाङ्क्षाया अनुगतत्वादवच्छेदकाऽननुगमो न दोषावह इति मन्तव्यम्।

नन्वन्वयबोधाभाव एवाकाङ्क्षा किं न स्यात्तस्याः प्रागभावात्मकतया शाब्दज्ञानकारणत्वेन क्लृप्तत्वादित्याशङ्क्यैवंविधा(१)काङ्क्षाऽभिप्रायेणैव मीमांसकैः श्रुतिलिङ्गादिबलाबलाधिकरण आकाङ्क्षाया व्यवहृतत्वान्मैवमित्याह—एतादृशेति। तथा च तृतीयाध्यायतृतीयपादस्थजैमिनिसूत्रं 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्'इति। अत्र श्रुत्यादीनामेकविषयत्वसमवायेन विरोधे सति कस्य प्राबल्यं कस्य दौर्बल्यमिति चिन्त्यते। तत्र निरपेक्षो रवः श्रुतिः, यथा व्रीहीनवहन्तीत्यत्र क्रियाफलभागित्वं कर्मत्वं बोधयन्ती द्वितीया श्रुतिर्निरपेक्षैव व्रीहीणामवघातशेषत्वं प्रतिपादयति। अर्थविशेषप्रकाशनसामर्थ्यं लिङ्गम्, यथा बर्हिर्देवसदनं दामीत्यस्य मन्त्रस्य लवनार्थप्रकाशकतया बर्हिर्लवने विनियोगः। परस्पराकाङ्क्षावशात्कस्मिंश्चिदेकस्मिन्नर्थे पर्यवसितानि पदानि वाक्यम्, यथा 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम(२)ग्नये जुष्टं

(१) एवंविधेति। पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वरूपाया आकाङ्क्षाया अभिप्रायेण, न तु अन्वयबोधाभावरूपाया आकाङ्क्षाया इत्यर्थः।

(२) हस्ताभ्यामित्यन्तो याजुषमन्त्रः, अग्नये जुष्टं निर्वपामीति ब्राह्मणवाक्यम्। अनयोर्मन्त्रब्राह्मणयोः परस्पराकाङ्क्षावशाद् एकस्मिन्निर्वापरूपेऽर्थे पर्यवसितपदवत्त्वं वाक्यत्वम्। तथा च वाक्यप्रमाणेन देवस्य त्वेत्यादेर्मन्त्रस्य निर्वापे विनियोगः।

यागस्यामिक्षाऽन्वितत्वेन न वाजिनाकाङ्क्षेत्यादिव्यवहारः।

निर्वपामि' इत्यत्र लिङ्गेन निर्वापे विनियुज्यमानस्य समवेतार्थभागस्यैकवाक्यबलेन देवस्य त्वेत्यादिभागस्य विनियोगः। सम्भावाकाङ्क्षाभावानां पदानां कार्यान्तरापेक्षया वाक्यान्तरेण सम्बन्धे आकाङ्क्षापर्यवसन्नं प्रकरणम्, यथा समिधो यजतीत्यादेर्दर्शपूर्णमासकथनम्भावाकाङ्क्षायां पठनाच्छेषत्वम्। क्रमः स्थानमनेकस्याम्नातस्य सन्निधिविशेषाम्नानम्, यथा दब्धिरसीत्यत्राग्नेयाग्नीषोमीयोपांशुयागाः क्रमेण ब्राह्मणे विहिता मन्त्रभागेऽपि क्रमेण मन्त्रत्रयं पठितं तत्राग्नेयाग्नीषोमीययोर्लिङ्गेनैव द्वयोर्विनियोगसिद्धिः। (२)दब्धिरसीत्यत्र तु न लिङ्गादिविनियोजकमस्ति, किन्तु यस्मिन्प्रदेशे ब्राह्मणे उपांशुयागविधानं तस्मिन्नेव प्रदेशे मन्त्रेऽप्यस्य पाठ इति क्रमादुपांशुयागानुमन्त्रणेऽस्य विनियोगः। योगबलं समाख्या। यथा हौत्रम् औद्गात्रमित्यादियोगबलेन हौत्रादिसमाख्यानि कर्माणि होत्रादिभिरनुष्ठेयानि। प्रकृते श्रुतिवाक्यविरोधे वाक्यदौर्बल्योदाहरणं 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इति। तत्र वाजिनस्य किं विश्वेदेवाङ्गत्वं किं वा वाजिसञ्ज्ञकदेवताऽङ्गत्वमिति संशये वाजमन्नमामिक्षा तदेषामस्तीति व्युत्पत्त्या वाजिपदस्य विश्वेदेवपरत्वाद् वाजिभ्यो वाजिनमिति वाक्याद्वाजिनस्य विश्वेदेवदेवताऽङ्गत्वमवगम्यते, न चामिक्षया वाजिनबाधः, किन्तु तया सह विकल्पः समुच्चयो वेति प्राप्ते सिद्धान्तः—न तावद्वाजिनस्य विश्वेदेवाङ्गत्वं वैश्वदेवीति तद्धितश्रुत्याऽऽमिक्षया तेषां सम्बन्धस्यौचित्यात्तस्या इति सर्वनामार्थतद्धितस्य स्वतन्त्रत्वात्सर्वनाम्नश्च सन्निहितविशेष्यसमर्पकत्वादामि-

---

(२) दब्धिर्नामासीति पाठान्तरम्। न तर्हि द्वावीत्यपि पाठः क्वचिदस्ति। दब्धिर्नामाऽदब्धमायुधमिति माधवः।

ननु तत्रापि वाजिनस्य जिज्ञासाऽविषयत्वेऽपि तद्योग्यत्वमस्त्येव । प्रदेयद्रव्यत्वस्य यागनिरूपितजिज्ञासाविषयतावच्छेदकत्वादिति चेद्, न । स्वसमानजातीयपदार्थान्वयबोधविरहसहकृतप्रदेयद्रव्यत्वस्यैव तदवच्छेदकत्वेन वाजिनद्रव्यस्य स्वसमानजातीयामिक्षाद्रव्यान्वयबोधासहकृतत्वेन तादृशावच्छेदकाभावात् । आमिक्षायां तु नैवं वाजिनाऽन्वयस्य तदाऽनुपस्थितत्वात् ।

क्षायाः श्रुतत्वेन सन्निहितवाच्यत्वात् । एवं च न विकल्पसमुच्चयौ कल्प्यौ, विश्वेदेवसम्बन्धवत्यामिक्षया वाजिनाकाङ्क्षाभावादिति ।

ननु भवदभिमतस्याकाङ्क्षालक्षणस्य वाजिनेऽपि सत्त्वात्कथमुक्तनैराकाङ्क्ष्यव्यवहारो भवदुक्ताकाङ्क्षासम्भवादित्याशयेन शङ्कते—नन्विति । तत्रापि—सा वैश्वदेव्यामिक्षेत्यादावपि । यागनिरूपितजिज्ञासाविषयत्वावच्छेदकस्य प्रदेयद्रव्यत्वस्य सत्त्वादित्याह—प्रदेयेति । प्रदेयद्रव्यत्वस्य तदवच्छेदकत्वे अनितान्वयबोधादपि वाक्यात्पुनरन्वयबोधापत्तेः स्वसमानजातीयेत्यादिविशेषणविशिष्टस्य तस्य तत्त्वाङ्गीकाराद्वाजिने तदसत्त्वादुक्तलक्षणासम्भावनोक्तदोष इत्याशयेन परिहरति—नेति । समभिव्याहृतपदेन स्मारितो यः स्वसमानजातीयः स्वसदृशः पदार्थस्तदन्वयबोधविरहेण सहकृतं यत्प्रदेयद्रव्यत्वं तस्यैव तदवच्छेदकत्वेन यागनिरूपितजिज्ञासाविषयत्वावच्छेदकत्वेन वाजिनद्रव्यस्य स्वसदृशामिक्षापदार्थान्वयबोधसहकृतत्वेन तद्विरहसहकृतप्रदेयद्रव्यत्वरूपावच्छेदकाभावादित्यर्थः । नन्वस्तु वाजिनपदार्थेनैवान्वयबोधः, तथा चामिक्षायामेव तादृशावच्छेदकाभावः किं न स्यादित्याशङ्क्याह—आमिक्षायां त्विति । प्रथमश्रुतामिक्षान्वयबोधकाले वाजिनान्वयबोधस्योत्थानाभावादिति हेतुमाह—वाजिनेति ।

उदाहरणान्तरेऽप्यपि दुर्बलत्वप्रयोजक आकाङ्क्षाविरह एव द्रष्टव्यः।

यथा श्रुतिवाक्यविरोधे वाक्यदौर्बल्यप्रयोजक आकाङ्क्षाविरहस्त-योदाहरणान्तरेष्वपि स एवेत्यतिदिशति-उदाहरणान्तरेष्वपीति। तत्र श्रुतिलिङ्गविरोधे लिङ्गदौर्बल्यं यथा ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति श्रूयते, तत्र संशयः-किं कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे इत्यस्या ऋगैन्द्र्या तेनैन्द्रमन्त्रेणेन्द्र उपस्थेय? उत गार्हपत्य? इति, भो इन्द्र कदाचिदपि घातको न भवसि किं त्वाहुतिदत्तवते यजमानाय श्रेयसे इति इन्द्रप्रकाशनसामर्थ्याल्लिङ्गादिन्द्र उपस्थेय इति प्राप्ते सिद्धान्तः—गार्हपत्यमिति प्रत्यक्षश्रुत्या गार्हपत्योपस्थाने विनियुक्तस्य मन्त्रस्य पुनर्विनियोगाकाङ्क्षाया अनुदयाद्विनियोजकं लिङ्गं न प्राप्नोति येनैन्द्रोपस्थाने मन्त्रो विनियुज्येतेति। लिङ्गवाक्ययोर्विरोधे वाक्यदौर्बल्यं, यथा दर्शपूर्णमासयोः श्रूयते—'स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि तस्मिन्त्सीदामृते प्रतितिष्ठ व्रीहीणां मेधः सुमनस्यमान' इति। भोः पुरोडाश तव समीचीनं स्थानं करोमि तव स्थानं घृतस्य धारया सुष्ठु सेवितुं योग्यं कल्पयामि भो व्रीहिसारभूत त्वं समाहितमनस्कस्तस्मिन्समीचीने स्थाने उपविश तत्र स्थिरो भवेत्यर्थः। तत्रायं सर्वोऽपि मन्त्रः स्थानकरणे पुरोडाशस्थापने च विनियुज्यते किं वाऽर्द्धद्वयमुभयत्र व्यवस्थितमिति संशये सति मन्त्रद्वयाभावात्सर्वोऽप्ययं मन्त्रः स्थानकरणस्य पुरोडाशस्थापनस्य चाङ्गम्, एवं सर्वेणानेन मन्त्रेण स्थानं कर्तव्यमिति विनियोजिका श्रुतिः कल्पनीया, तथा सर्वेण मन्त्रेण पुरोडाशः स्थापनीय इत्यपि कल्पनीया, सदनाङ्गत्वस्य प्रतिष्ठापनाङ्गत्वस्यापि तद्वाक्यबोधितत्वादिति प्राप्ते राद्धान्तः पूर्वोत्तरार्द्धयोः परस्परान्वयेन यथाप्राप्तस्यैकवाक्यत्वेऽपि तत्तदर्द्धस्य सदनकरणे शक्तिज्ञा-

कल्पयित्वा सर्वमन्त्रस्य सदने विनियोक्तुमनर्हत्वात् पूर्वार्द्धस्य स्थापने शक्तिमकल्पयित्वा स्थापने सर्वमन्त्रस्य विनियोक्तुमनर्हत्वाच्च लिङ्गकल्पनव्यवधाने श्रुतिं प्रति वाक्यं विप्रकृष्यते, प्रत्यक्षं तु लिङ्गद्वयं सन्निकृष्यते, तथा च लिङ्गेन वाक्यबाधादर्द्धद्वयमुभयत्र व्यवस्थितमिति । *अत्राप्याकाङ्क्षाविरह एव वाक्यस्य दौर्बल्यप्रयोजक इति ।* वाक्यप्रकरणयोर्विरोधे प्रकरणदौर्बल्यम्, यथा सूक्तवाक्ये श्रूयते— 'अग्नीषोमाविदं हविरजुषेतामवीवृधेतामहोज्यायोऽक्राताम्' 'इन्द्राग्नी इदं हविरजुषेतामवीवृधेतामहोज्यायोऽक्राताम्' इत्यादिदेवतावाचकाग्नीषोमादिपदं पौर्णमास्यादिकाले यथादैवतं विभज्य प्रयुज्यते । तत्र संशयः—देवतापदैकवाक्यताभूतानीदं हविरजुषेतामित्यादीनि यानि पदानि तानि किं ततो विच्छिद्यान्यत्रापि प्रकरणाविशेषात्प्रयोक्तव्यानि ? उत तत्तद्देवतापदेनैकवाक्यतया तद्वदेव व्यवस्थितानीति । तत्र यदिदं हविरित्यादिकमवशिष्टं पदजातं तदग्नीषोममन्त्रगतमप्यमावास्यायामग्नीषोमपदपरित्यागेन पठनीयम् । तथा इन्द्राग्निमन्त्रगतमपि पौर्णमास्यामिन्द्राग्नीपदपरित्यागेन पठनीयम् । तथा सत्येषां मन्त्रभागानां सर्वशेषत्वबोधको दर्शपूर्णमासपाठोऽनुगृह्यते इति प्राप्ते सिद्धान्तः—अग्नीषोममन्त्रशेषस्येन्द्राग्नीपदान्वयाश्रवणात्प्रकरणेन प्रथमं तदन्वयरूपं वाक्यं कल्पनीयम्, तेन च वाक्येनेन्द्राग्नीप्रकाशनसामर्थ्यरूपं लिङ्गं कल्प्यते, तेन चानेन मन्त्रभागेनेन्द्राग्नीविषया क्रियाऽनुष्ठेयेति विनियोजिका श्रुतिः कल्प्यते, ततः प्रकरणविनियोगयोर्मध्ये त्रिभिर्व्यवधानं भवति, अग्नीषोमपदान्वयरूपं वाक्यं श्रूयमाणत्वाल्लिङ्गश्रुतिभ्यामेव व्यवधीयते, तस्माद्वाक्येन प्रकरणस्य बाधितत्वात्तच्छेदस्तत्रैव व्यवतिष्ठते । अत्रापि विच्छिद्यान्यत्राप्रयोगे आकाङ्क्षाविरह एव कारणम् । स्थानप्रकरणयोर्विरोधे स्थानदौर्बल्यं यथा राजसूये बहवः पविष्टिसोमयागाः सर्वे फलवन्तः समप्रधानाः, तत्राभि

षेचनीयो नाम सोमयागः तत्सन्निधौ विदेवनादयः समाम्नाताः 'अक्षैर्दीव्यति' 'राजन्यं जिनाति' 'शौनःशेपमाख्यापयति' इति । जिनाति जयति । बह्वृचब्राह्मणे समाम्नातं शुनःशेपविषयमाख्यानं शौनःशेपम् । तत्र संशयः—ते विदेवनादयः किं सर्वस्य राजसूयस्याङ्गम् ? उत अभिषेचनीयस्यैवेति । तत्र सन्निधिवशाद्विदेवनादयोऽभिषेचनीयाङ्गमिति प्राप्ते राद्धान्तः—राजसूयस्य कथंभावाकाङ्क्षायामनुवृत्तायां(१) विहिता विदेवनादयः प्रकरणेन राजसूयशेषाः राजसूयश्च बहुयागात्मक इति तत्रस्थसर्वयागशेषभूतं विदेवनादिकम्(२) । न चाभिषेचनीयस्य काचिदाकाङ्क्षा विदेवनादिष्वस्ति ज्योतिष्टोमविकृतिरनेनातिदिष्टैः प्राकृताङ्गैरेव तदाकाङ्क्षानिवृत्तेरिति । स्थानसमाख्ययोर्विरोधे समाख्यादौर्बल्यम् । यथा पौरोडाशिकसमाख्याते दर्शपूर्णमासकाण्डे सान्नाय्यपात्रशुन्धनं समाम्नातम् । तत्र शुन्धध्वं दैव्याय कर्मणे देवयज्यायै इति मन्त्र उदाहरणम् । स किं पुरोडाशपात्राङ्गमुत सान्नाय्यपात्राङ्गम् ? उत संशये पौरोडाशिकमिति समाख्याते काण्डे पठितत्वात्समाख्यया पुरोडाशकाण्डाम्नातानुलूखलजुह्वादीनामपि शोधनेऽङ्गमिति प्राप्ते सिद्धान्तः—पौरोडाशिकमिति समाख्यायां प्रकृतिः पुरोडाशमभिधत्ते तद्धितप्रत्ययश्च काण्डम् । न चैतावता कृत्स्नपुरोडाशपात्राणां सन्निधिरत्र प्रत्यक्षोऽस्ति, किं त्वर्थप्रकल्प्यस्तत्रमात्रकाण्डसमाख्यया सन्निधिं परिकल्प्य तत्सन्निध्यन्यथानुपपत्त्या परस्पराकाङ्क्षारूपकृत्स्नपात्रप्रकरणं कल्पयित्वा वाक्यलिङ्गश्रुती परिकल्प्य तया श्रुत्या विनियोग इति समाख्यायां विप्रकर्षः । सान्नाय्यपात्राणां शुन्धनमन्त्रसन्निधिस्तु प्रत्यक्षः, इध्माबर्हिः—सम्पादनस्य मुष्टिनिर्वापस्य चान्तराले सान्नाय्यपात्राणां देश उक्तः,

(१) कपुस्तके अनुवृत्तायामिति नास्ति ।
(२) विदेवनादिकमिति कखपुस्तकयोर्नास्ति ।

(१) योग्यता च तात्पर्यविषयीभूतसंसर्गाबाधः। वह्निना सिञ्चतीत्यादौ तादृशसंसर्गबाधान्न योग्यता। 'स प्रजापतिरात्मनो वपामुदखिदत्' इत्यादावपि तात्पर्यविषयीभूतपशुप्राशस्त्याबाधाद् योग्यता। तत्त्वमस्यादिवाक्येष्वपि वाच्याभेदबाधेऽपि लक्ष्यस्वरूपाभेदबाधाभावाद् योग्यता।

(२) आसत्तिश्चाव्यवधानेन पदजन्यपदार्थोपस्थितिः।

मन्त्रश्चेध्माबर्हिर्निर्वापविषयो मन्त्रानुवाकयोर्मध्यमेऽनुवाके पठ्यते। तेन च प्रत्यक्षसन्निधिना प्रकरणादीनां चतुर्णामेव कल्पनात् सन्निधिः सन्निकृष्यते, तस्मात्क्रमेण समाख्यां बाधित्वा साम्नाय्यपात्रशोधनाङ्गमेव मन्त्रः (३)। स्थान सन्निधिः क्रम इत्यनर्थान्तरमिति।

योग्यतां लक्षयति योग्यतेति। एतावल्लक्षणाऽभिधानफलामाह-

---

(१) तात्पर्यविषय. संसर्गो योग्यता इत्यर्थः। यथा वत्सं बधानेत्यत्र वत्सकर्मकं बन्धनमेव योग्यता। वह्निना सिञ्चतीत्यत्र तादृशसंसर्गस्य वह्निकरणकसेकस्य बाधान्न योग्यता। स प्रजापतिरित्यादौ वपायागः प्रशस्त इति प्राशस्त्यमेव तात्पर्यविषयसंसर्गः, अतः योग्यता वर्तते। योग्यताऽपीयं ज्ञायमानैव हेतुर्न स्वरूपसतीत्यवधेयम्। तज्ज्ञानं चापि संशयनिश्चयसाधारणं हेतुः, ततश्च तत्संशयनिश्चययोरपि शाब्दज्ञानत्वोपपत्तिरिति।

(२) अव्यवधानविशिष्टा या पदजन्यपदार्थोपस्थितिः सा आसत्तिः, यया चात्राव्यवधानस्योपस्थितावेवान्वयः, अव्यवधानविशिष्टं यत्पदं तज्जन्या पदार्थोपस्थितिरासत्तिरित्यर्थस्वीकारे तु चन्द्र भुङ्क्ष्व ओदनं पश्य इत्यत्र चन्द्रभुङ्क्ष्वपदयोः अव्यवधानसत्त्वेनातिव्याप्तिप्रसङ्गः। पश्य देवदत्त इत्यत्र प्रत्यक्षप्रमाणलब्धस्यापि घटस्य वाच्यार्थबोधे नोपयोगः, पदजन्योपस्थित्यभावात्। यदि तत्र प्रत्यक्षं दृश्यमानस्य घटस्य अङ्गुल्या निर्देशपूर्वकं पश्य देवदत्त इति वाक्यमुच्चरितं तदा तत्र 'घटम्' इति द्वितीयान्तघटपदाध्याहारो द्वितीयान्तेदम्पदाध्याहारो वा भवतीति पदजन्योपस्थितिरेवासत्तिरिति।

(३) मन्त्रः शोधनाङ्गमेव इति योजना।

मानान्तरोपस्थापितपदार्थस्यान्वयबोधाभावात्पदजन्येति । अत एवाश्रुतपदार्थस्थले तत्तत्पदाध्याहारः द्वारमित्यादौ 'पिधेहि' इति । अत एव 'इषेत्वा' इत्यादिमन्त्रे 'छिनद्मि' इति पदाध्याहारः । अत एव विकृतिषु 'सूर्याय जुष्टं निर्वपामि' इति पदप्रयोगः ।

वह्निनेति । तथाऽप्यस्तु संसर्गबाधो योग्यतेत्याशङ्क्याह—स प्रजापतिरिति । एवं च साम्प्रदायिकतत्त्वमस्यादिवाक्यार्थोऽप्युपपन्न इत्याह—तत्त्वमस्यादीति ।

क्रमप्राप्तामासत्तिं लक्षयति-आसत्तिश्चेति । पदजन्येत्यस्य प्रयोजनमाह-मानान्तरेति । यतो मानान्तरोपस्थापितपदार्थस्यान्वयबोधो नास्त्यत एवाश्रुतपदार्थस्थलेऽन्वयबोधयोग्यपदार्थोपस्थापकपदाध्याहारः सङ्गच्छत इत्याह—अत एवेति । अत एव वेदेऽपि तादृशपदाध्याहार इत्याह—अत एवेति । द्वितीयाध्याये चिन्तितं समेऽ वाक्यभेदः । यत्र कर्मसमवेतार्थप्रकाशके निर्वपामीत्यादिपदमस्ति तत्र सुगमं परिमाणम् । यत्र तु समवेतार्थपदाभावेन लौकिकविनियोगाभावे वाचनिको विनियोगः स्वरूपतो गम्यते, यथा 'इषे त्वोर्जे त्वेति' तत्र संशयः-किं प्राग्दृष्टार्थमन्त्रविधेरेकमन्त्रत्वमुत यावदेव मिथः संबन्धमिषे त्वेति तावदेकं यजुरन्यच्च यजुरन्तरमिति इषे त्वोर्जे त्वेत्यत्र सोऽयं पदसमुदाय एको मन्त्रः तस्यादृष्टार्थत्वेनैकस्यैवादृष्टस्य कल्पने लाघवात् । न चेत्स्यपदनेत्यादिमन्त्रवदनुष्ठेयार्थस्मारकता सम्भवति, क्रियापदाभावेन तदर्थप्रतीत्यभावादिति प्राप्ते राद्धान्तः—इषे त्वोर्जे त्वेत्यादौ यजुर्भेदः 'इषे त्वा' इति छिनत्ति, 'ऊर्जे त्वा' इत्यनुमार्ष्टीति पलाशशाखायाः छेदनमार्जनयोर्विनियोगात्ततस्तदनुसारेण द्वयोरपि मन्त्रयोर्भेद इति । अत एव—मानान्तरेत्याद्युक्तौ

पदार्थश्च द्विविधः—शक्यो लक्ष्यश्चेति। तत्र शक्तिर्नाम

। नवमाध्यायप्रथमे पादे स्थितं गुणशब्दस्तथेति चेदिति 'देवस्य सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपा-इति मन्त्रे सवित्रश्विपूषशब्दाना विकृतिषूहाभाव उक्तस्तत्राग्नि-शब्दोऽपि किमसमवेतवचनो नाहितव्य उत समवेतवचन ऊहितव्य इति ये देवताऽन्तरवाचिसवित्रादिशब्दवदग्निशब्दस्यापि निर्वापस्तात्र तेन *पाठान्नोहनीय इति प्राप्ते* राद्धान्तः, सवित्रादिशब्दाना कर्म्मण्य वेतार्थत्वेनाग्निशब्दस्य चाग्नेये कर्म्मणि समवेतार्थत्वेन दृष्टान्त स्यादूहनीय इति। ननु निर्वापात्पूर्वं हविषो जुष्टत्वाभावात्तद्योगा-नशब्दोऽपि न स्यादिति चेन्न। जुष्ट यथा भवति तथा निर्वपामीति याविशेषणत्वेन भविष्यज्जोषणपरत्वे सति समवेतार्थत्वात्। तस्मा-र्ययागे सूर्याय जुष्टं निर्वपामीत्येवमूहनीयमिति।

(१)पदजन्यपदार्थोपस्थितिरित्युक्तम्। तत्र पदार्थः कतिविध पेक्षायामाह—**पदार्थश्चेति**। पदनिष्ठशक्तिविषयः शक्यः पद लक्षणाविषयो लक्ष्यः। वृत्तेर्द्वैविध्यात्पदार्थद्वैविध्यम्। गौण्या वृत्ते-र्लक्षितलक्षणायामन्तर्भावस्य वक्ष्यमाणत्वात् (२)केवललक्षणायाश्च यन्तर्भावाच्छक्यो लक्ष्यश्चेति विभाग इति भावः। तयोः शक्तिल-निरूपणायत्तनिरूपणत्वाच्छक्यस्वरूपावगमार्थमादौ शक्तिं निरू ति—**तत्रेति**। तयाः—शक्यलक्ष्ययोः। शक्यविशेषणीभूता शक्ति

(१) अव्यवधानेन पदजन्यपदार्थोपस्थितिः-आसत्ति रत्यत्रोक्तम्। तिलक्षणघटकः पदार्थः कतिविध इत्यपेक्षा।

(२) लक्ष्यः गौण्या वृत्तेः, लक्षितलक्षणायामन्तर्भावस्य वक्ष्यमाणत्वाद् द्वैविध्यम्। केवल० इत्यादिपाठः खगपुस्तकयोः। कपुस्तके वक्ष्यमाणत्वाद्-द्वैविध्य केवल० इत्यादिपाठश्च। परन्तु 'वृत्तेर्द्वैविध्यात्पदार्थद्वैविध्यम्' इति टीकायां लक्ष्यभेदस्माभिः कल्पितस्थल एव क्लिष्टतरः प्रतिभाति।

पदानामर्थेषु मुख्या वृत्तिः, यथा घटपदस्य पृथुबुध्नोदराकृतिविशिष्टे वस्तुविशेषे वृत्तिः। सा च शक्तिः [illegible] सिद्धान्ते कारणेषु [illegible]

सा च तत्तत्पदजन्यपदार्थज्ञानरूपकार्यानुमेया। [illegible]

त्यर्थ। अर्थेषु वृत्तिः—अर्थविषयणी वृत्तिः। पदानां तेष्वेवार्थेषु वृत्तिं वदतां प्राभाकराणां नि[illegible] त्यिति। लक्षणायामतिव्याप्तिवारणायाह—मुख्येति। [illegible] यथेति। पृथु विपुलं च तद्बुध्नं च वर्तुलं च यदुदरं तदाकृतिविशिष्ट इत्यर्थः। शक्ति-सङ्केतः। स च परमेश्वरेच्छा अनेन पदेनायमर्थो बोद्धव्य इत्येवंरूपा, न तु पदार्थान्तरं मानाभावादिति नैयायिकास्तान्निराचष्टे—सा चेति। येषां मते शक्तिर्पदार्थान्तरता तेषां मते पदनिष्ठा शक्तिः पदार्थान्तरमिति किन्तु व्यमित्याह—सिद्धान्त इति। तथा च शक्तेः पदार्थान्तरत्वे दिलक्षणकार्यानुपपत्तिरेव प्रमाणं प्रतिबन्धकाभावस्य स्वभावतः हेतुत्वम्। दाहादिकार्यं वह्निनिष्ठास्वानुकूलशक्तिपूर्वकं कार्यत्वाद्दिति भावः। उपलक्षणमेतत्। 'परास्य शक्तिर्विविधैव श्रूयते' सर्वभावानामचिन्त्या ज्ञानगोचरा' इत्यादिश्रुतिस्मृतिवचनान्यपि पदशक्तिसद्भावे मानमित्यर्थः।

ननु सन्तु कारणेषु कार्यानुमेयाः शक्तयः प्रकृते निष्ठा शक्तिस्तु कीदृश इत्यपेक्षायामाह—सा चेति। [illegible]निष्ठत्वानुकूलशक्तिपूर्वकं पदजन्यपदार्थज्ञानरूपकार्यत्वादित्येवमनु[illegible]त्वर्यं। एवं शक्तिं निरूप्य शक्यं लक्षयति—तादृशेति। तज्ज्ञा[illegible] शक्तिविषयत्वम्। तच्च शक्यं कतिविधं किंविषयकं इत्यपेक्षायामा

शशक्तिविषयत्वं शक्यत्वम्। तत्र(१)जातेरेव न व्यक्तेः। व्यक्तीनामानन्त्येन गुरुत्वात्। कथं तर्हि गवादिपदाद् व्यक्तिमानमिति चेत्, (२) जातेर्व्यक्तिसमानसंवित्संवेद्यत्वादिति ब्रूमः।

(३) यद्वा, गवादिपदानां व्यक्तौ शक्तिः स्वरूपसती न

तज्चेति। जातिरत्रानुगतो धर्मः परैर्जातिशब्देन व्यवह्रियमाणस्तेन जातिस्वोपाधित्वपरिभाषायाः सर्वप्रमाणागोचरत्वोक्तिविरोधो न शङ्क्यः, अत्र हेतुमाह—व्यक्तीनामिति। नन्वनुगतधर्मस्य शक्यत्वाभ्युपगमे गामानय, पशुमालभेदित्यादौ गवादिपदाद्व्यक्तिभानं न स्यादित्याशङ्कते-कथमिति। यद्यपि जातिरेव शक्या तथाऽपि धर्म्मतद्वतोस्तादात्म्यादेकसंवित्तिसंवेद्यत्वाद्व्यक्तिसमानसंवित्तिसंवेद्यजातिभानसमये व्यक्तिमानमविरुद्धमित्याह—जातेरिति।

नन्वु पदाद्व्यक्तिसंविदेव दुर्लभा तत्प्रयोजकशक्तेरभावादित्यरुचेराह—यद्वेति। स्वरूपसती-स्वरूपेणैव वर्तमाना। व्यक्तिबोधक-

(१) जातेरेवेति। ननु पूर्वग्रन्थे जातेः खण्डनं कृतमत्र शक्यत्वं जातेर्येवस्थाप्यत इति पूर्वापरविरोध इति चेन्न। नास्माभिर्जातिः खण्डिता किन्तु तस्याः पदार्थान्तरत्वं तथैव तस्या लक्षणादिकं च खण्डितम्, सकलघटव्यक्तिषु अनुगतघटत्वरूपधर्मस्तु स्वीकृत एवेति न पूर्वापरविरोध इति। तथा चात्र सर्वत्र वा जातिपदेनानुगतो धर्म एव ग्राह्य इति ध्येयम्।

(२) व्यक्तिसमानेति। व्यक्तेः समाना संविद् व्यक्तिसमानसंविद् तया संवेद्या व्यक्तिसमानसंवित्संवेद्या तस्या भावस्तस्मात्। यथा संविद्व्यक्त्या घटवृत्तिघटत्वं गृह्यते, तथैव घटस्यापि ग्रहणं भवति। वेदान्तमते 'तदनन्यत्वमारम्भणशब्दादिभ्य' इति न्यायेन गुणगुणिनोरवयवावयविनो जातिव्यक्त्योर्वा अभेदाभ्युपगमात्र सामग्र्यन्तरस्यावश्यकतेति तात्पर्यम्।

(३) पूर्वग्रन्थे व्यक्तिशक्तिर्निराकृता। तथा च प्रयोजकशक्त्यभावाद् व्यक्तिसंविद् अभाव एव युक्त इत्यतः पक्षान्तरानुसरणं-यद्वेति।

तु ज्ञाता हेतुः। जातौ तु ज्ञाता। न(१)व्यक्त्यंशे शक्ति नमपि कारणं गौरवात्। जातिशक्तिमत्त्वज्ञाने सति व्यक्ति शक्तिमत्त्वज्ञानं विना व्यक्तिधीविलम्बाभावाच।

अत एव न्यायमतेऽन्वये शक्तिः स्वरूपसतीति सि द्धान्तः। ज्ञायमानशक्तिविषयत्वमेव वाच्यत्वमिति व रेव वाच्या।

गवादिपदनिष्ठसामर्थ्यस्वरूपमस्त्येवेत्यर्थः। व्यावर्त्यमाह—ज्ञातेति गवादिपदाद्व्यक्तिभानार्थं गवादिपदानां व्यक्तौ शक्तिरस्तीति नापेक्षितमित्यर्थः। एतदेव स्पष्टयति—जातावेिति। गवादिपद जातौ शक्तिरिति ज्ञाता जातिभानहेतुरित्यर्थः। व्यक्तिभाने श कारणं न तु तज्ज्ञानमपीत्याह—नेति। तत्र हेतुमाह—गौरव दिति। उभयत्र शक्तिज्ञानस्य कारणत्वकल्पने गौरवात्। नन्व श्यकत्वाद् गौरवं न दोषावहमित्याशङ्क्याह—जातेति।

यतः शक्तिज्ञानं विनैव यस्य ज्ञानं तज्ज्ञानार्थं शक्तिज्ञानकल्प मुचितम्, अत एव नैयायिकैर्गवादिपदार्थस्य पदार्थान्तरान्वये श स्वरूपसती स्वीकृतेत्याह—अत एवेति। नन्वेवं तर्हि व्य शक्या, शक्तिविषयत्वं शक्यत्वमित्युक्तत्वाद् व्यक्तौ च शक्तेः स रात्तया च जातेर्व्यक्तेश्च शक्यत्वे गौरवमित्याशङ्क्यास्मिन्पक्षे शक नशक्तिविषयत्वं शक्यत्वं(२)न तु शक्तिविषयत्वमतो नोक्त इत्याह—ज्ञायमानेति।

ननु व्यक्तेरशक्यत्वे तत्र शक्तिकल्पनमपि वृथा तज्ज्ञानस्य क णमेव सम्भवादन्वयस्य च वाक्यगम्यत्वेन पदशक्त्यविषयता

---

(१) पत्रपुस्तकयोः न च इति पाठः।

(२) शक्यत्वम् इति पत्रपुस्तकयोर्नास्ति भावश्यकञ्च तत्।

(१) अथवा व्यक्तेर्लक्षणयाऽवगमः। यथा नीलो घट इत्यत्र नीलशब्दस्य नीलगुणविशिष्टे लक्षणा, तथा(२) जातिवाचकस्य तद्विशिष्टे लक्षणा। तदुक्तम्—'अनन्यलभ्यो हि शब्दार्थः' इति। एवं शक्यो निरूपितः।

अथ लक्ष्यपदार्थो निरूप्यते। तत्र लक्षणाविषयो लक्ष्यः।

स्वरुचेः पक्षान्तरमाह—अथवेति। तथा च गवादिपदस्य जातौ शक्तिः, तद्विशिष्टव्यक्तौ लक्षणेति भावः। केवलस्य शक्तिगम्यत्वे विशिष्टस्य लक्षणागम्यत्वं क्व दृष्टमित्यपेक्षायामाह—यथेति। अत्र मीमांसकसम्मतिमाह—तदुक्तमिति। अनन्यलभ्यो लक्षणादिना लभ्यो यो न भवति स शब्दार्थः शब्दशक्तिगम्य इत्यर्थः। शक्यनिरूपणमुपसंहरति—एवमिति।

लक्ष्यस्य (३) शक्यनिरूपणायत्तनिरूपणत्वात्तन्निरूपणानन्तरं लक्ष्यपदार्थनिरूपणं प्रतिजानीते—अथेति। तत्र—शक्यनिरूपणान-

---

(१) ननु पदस्य व्यक्तावपि स्वरूपसती शक्तिः स्वीकृता एव। पूर्वग्रन्थे तु व्यक्तेरपि शक्यत्वापत्तौ ज्ञायमानेति विशेषणं दत्तम्, तथाऽपि शक्तिद्वय कल्पनागौरवं गले पतितम्। न च एकस्मात्पदादुभयप्रतीत्यन्यथाऽनुपपत्त्या शक्तिद्वयकल्पना आवश्यकीति प्रमाणमूलगौरवं न दोषायेति वाच्यम्, गङ्गायां घोष इत्यत्र तीरार्थप्रतीतेः गङ्गापदस्य तीरेऽपि शक्तिकल्पनापत्तेः। तथैवान्वयेऽपि पदस्य स्वरूपसत्याः शक्तेः कल्पने गौरवम्। अन्वयस्य वाक्यगम्यत्वेन तत्र पदस्य सामर्थ्याभावोऽपि। तथा च व्यक्त्यन्वययोर्लक्षणयैवोपस्थिती मदुक्तमित्यस्वरसेनाह—अथवेति। अस्मिन्मते शक्तिविषयत्वं शक्यत्वमिति लक्षणे ज्ञायमानपदाप्रवेशादपि लाघवमिति दिक्।

(२) जातिवाचकस्येति। घटत्ववाचकस्य घटपदस्य तद्विशिष्टे—घटत्वविशिष्टघटे—लक्षणा।

(३) शक्यसम्बन्धो लक्षणा, लक्षणाविषयो लक्ष्य इति लक्ष्यस्य लक्षणानिरूपणाधीननिरूपणत्वाल्लक्षणायाश्च शक्यनिरूपणाधीननिरूपणत्वमित्यर्थः।

लक्षणा च द्विविधा-केवललक्षणा लक्षितलक्षणा चेति। तत्र शक्यसाक्षात्सम्बन्धः केवललक्षणा, यथा गङ्गायं घोष इत्यत्र प्रवाहसाक्षात्सम्बन्धिनि तीरे गङ्गापदस्य केवललक्षणा। यत्र शक्यपरम्परासम्बन्धेनार्थान्तरप्रतीतिस्तत्र लक्षितलक्षणा, यथा (१) द्विरेफपदस्य रेफद्वये शक्यस्य भ्रमरपदघटितपरम्परासम्बन्धेन मधुकरे वृत्तिः। (२)

न्तरनिरूपणाविषयीभूते लक्ष्ये सति। तथाभूतनिरूपणविषयीभूते लक्ष्यो लक्षणाविषय इति वा।

लक्ष्यज्ञानस्य लक्षणाज्ञानाधीनत्वात्तां निरूपयति—लक्षणेति। तत्र—केवललक्षणालक्षितलक्षणयोर्मध्ये। उदाहरणमाह—यथेति। यथा गङ्गायां घोष इत्यस्मिन् वाक्ये गङ्गापदवाच्यप्रवाहेण साक्षात्सम्बन्धवति तीरे गङ्गापदस्य केवललक्षणावृत्ति। लक्षितलक्षणां दर्शयति—यत्रेति। शक्यपरम्परासम्बन्धो लक्षितलक्षणेत्यर्थः। एतदुदाहरणमाह—यथेति। यथा द्विरेफपदस्य शक्यरेफद्वयघटितभ्रमरपदद्वारा तदर्थे वृत्तिरित्यर्थः। ननु पदार्थश्च द्विविध इत्युक्त्वा वृत्तिद्वैविध्यनिरूपणमयुक्तं गौण्या वृत्तेर्विद्यमानतया वृत्तेस्त्रैविध्येन पदार्थस्य त्रैविध्यादित्याशङ्कय गौण्या वृत्तेर्लक्षितलक्षणाऽन्तर्भावाभोपदोष इत्य

---

(१) द्विरेफेति। द्वौ रेफौ यस्मिन् तद् द्विरेफ पदम्, तथा च द्विरेफपदस्य रेफद्वयवत्सु भ्रमर-रम-राम्यादिपदेषु सविशिष्टा लक्षणेति वर्थे द्विरेफपदान्मधुकरस्यैव लक्षणायोपस्थितिरिति कश्चिद् ब्रूयात् तं प्रति ब्रूयात् निरूपदान्तरसमवधानरूपात्प्रकरणादिति।

(२) ननु शक्यस्य सादृश्यरूपः सम्बन्धो गुणः, गुणाधीना लक्षणा गौणी, यथा सिंहशब्दवाच्यः केसरादिमान्पशुविशेषः तत्सम्बन्धि शौर्यादिगुणरूपं तस्य माणवकवर्तित्वात् सिंहशब्दाद् गौण्या माणवकस्य प्रतीतिः। सा च कथितलक्षणान्तर्गतं गौण्यामभिन्नत्वात्सामिति चेत्। तस्या अपि लक्षणान्तर्भावात्—गौण्यपीति।

गौण्यपि लक्षितलक्षणैव । यथा सिंहो माणवक इत्यत्र सिंहशब्दवाच्यसम्बन्धिक्रौर्यादिसम्बन्धेन माणवकस्य प्रतीतिः।

प्रकारान्तरेण लक्षणा त्रिविधा–जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा चेति । तत्र शक्यमनन्तर्भाव्य यत्रार्थान्तरप्रतीतिस्तत्र जहल्लक्षणा, (१)यथा विषं भुङ्क्ष्वेत्यत्र स्वार्थं(२)विहाय शत्रुगृहे भोजननिवृत्तिर्लक्ष्यते । यत्र शक्यार्थमन्तर्भाव्यैवार्थान्तरप्रतीतिस्तत्राजहल्लक्षणा, यथा शुक्लो घट इत्यत्र हि शुक्लशब्दः (३)स्वार्थं शुक्लगुणमन्तर्भाव्यैव तद्वति द्रव्ये लक्षणया वर्त्तते ।

शयेनाह–**गौण्यपीति** । तल्लक्षणं गौण्यां योजयति–**सिंह इति** ।

प्रकारान्तरेण लक्षणां विभजते–**प्रकारान्तरेणेति** । **तत्र**–त्रिसृषु लक्षणासु मध्ये । **यत्र**–यस्मिन् पदे वाक्ये वा शक्यार्थमनन्तर्भाव्यार्थान्तरस्य भानं तत्र जहल्लक्षणा, शक्यसम्बन्धिमात्रविषया वृत्तिरित्यर्थः । यद्यपि गङ्गायां घोषः प्रतिवसतीत्यत्र गङ्गापदे शक्यार्थप्रवाहरूपमनन्तर्भाव्य तीररूपस्यार्थान्तरस्य प्रतीतिरस्त्यतो गङ्गापदं जहल्लक्षणोदाहरणं तथाऽपि तस्य सर्वैदाहृतत्वात्प्रसिद्धतरत्वात्(?) वाक्यमुदाहरति–**यथेति** । **अत्र**–अस्मिन् वाक्ये । अजहल्लक्षणां लक्षयति–**यत्रेति** । शक्यार्थविशिष्टविषया वृत्तिरजहल्लक्षणेत्यर्थः । उदाहरति–**यथेति** ।

---

(१) विषं भुङ्क्ष्वेति वाक्याद् अत्र भोजनं मा कुरु इत्यर्थो जहल्लक्षणया, तथा च वाक्यवृत्तिलक्षणा।

(२) स्वार्थमिति । स्वस्य विषं भुङ्क्ष्वेति वाक्यस्य-अर्थं शक्यार्थमित्यर्थः।

(३) स्वस्य-शुक्लपदस्य-अर्थं-शक्यार्थमित्यर्थः ।

यत्र हि विशिष्टवाचकः शब्दः एकदेशं विहाय एकदेशे वर्तते तत्र जहदजहल्लक्षणा, यथा सोऽयं देवदत्त इति। अत्र हि पदद्वयवाच्ययोर्विशिष्टयोरैक्यानुपपत्त्या पदद्वयस्य विशेष्यमात्रपरत्वम् (१)। यथा वा तत्त्वमसीत्यादौ तत्पदवाच्यस्य सर्वज्ञत्वादिविशिष्टस्य त्वंपदवाच्येनान्तःकरणविशिष्टेनैक्यायोगादैक्यसिद्ध्यर्थं स्वरूपे लक्षणेति साम्प्रदायिकाः।

वयन्तु ब्रूमः—सोऽयं देवदत्तः, तत्त्वमसीत्यादौ विशिष्टवाचकपदानामेकदेशपरत्वेऽपि न लक्षणा, शक्त्युपस्थितयोर्विशिष्टयोरभेदान्वयानुपपत्तौ (२) विशेष्ययोः शक्त्युपस्थितयोरेवाभेदान्वयाऽविरोधात्। यथा घटोऽनित्य इत्यत्र घटपदवाच्यैकदेशघटत्वस्यायोग्यत्वेऽपि योग्यघटव्यक्त्या सहानित्यत्वान्वयः। यत्र पदार्थैकदेशस्य विशे-

---

तृतीयां लक्षयति—यत्र हीति। शक्यैकदेशमात्रवृत्तिरित्यर्थः। उदाहरणमाह—यथेति। तत्त्वमसीत्यादिकमपि जहदजहल्लक्षणोदाहरणं साम्प्रदायिकैराधितमित्याह—यथा वेति।

वयं तु लक्षणां विनैवैक्यसिध्यर्थमेवं ब्रूम इत्याह—वयं त्विति। ननु लक्षणामृते एकदेशपरत्वं कुत इत्यत आह—शक्तौति। नन्विदं क्व दृष्टमित्यपेक्षायामाह—यथेति। स्वातन्त्र्यस्यैवान्वययोग्यत्वात्र पदार्थैकदेशस्य शक्त्यैव स्वातन्त्र्येणोपस्थितिः, न तत्र लक्षणा। यत्र तु तस्य शक्त्या विशेषणतयोपस्थितिस्तत्र तस्य स्वातन्त्र्योपस्थितये लक्षणा स्वीक्रियते इत्याह—यत्रेति।

---

(१) जहदजहल्लक्षणा इति शेषः। (२) सति इति शेषः।

णतयोपस्थितिः, तत्रैव स्वातन्त्र्येणोपस्थितये लक्षणाऽभ्युपगमः। यथा घटो नित्य इत्यत्र घटपदाद्घटत्वस्य शक्त्या स्वातन्त्र्येणानुपस्थित्या तादृशोपस्थित्यर्थं घटपदस्य घटत्वे लक्षणा।

एवमेव तत्त्वमसीत्यादिवाक्येऽपि न लक्षणा। शक्त्या स्वातन्त्र्येणोपस्थितयोस्तत्त्वंपदार्थयोरभेदान्वये बाधकाभावात्। अन्यथा गेहे घटो घटे रूपं घटमानयेत्यादौ घटत्वगेहत्वादेरभिमतान्वयबोधायोग्यतया तत्रापि घटादिपदानां विशेष्यमात्रपरत्वं लक्षणयैव स्यात्। तस्मात्तत्त्वमसीत्यादिवाक्येषु आचार्याणां लक्षणोक्तिरभ्युपगमवादेन बोध्या।

जहदजहल्लक्षणोदाहरणं तु—काकेभ्यो दधि रक्ष्यता-

उक्तमर्थं प्रकृते योजयति—एवमिति। विपक्षे बाधकमाह—अन्यथेति। तर्हि तत्त्वमस्यादिवाक्ये किमित्याचार्यैर्लक्षणा स्वीकृतेत्याशङ्क्याह—तत्त्वमसीति।

नहि जहदजहल्लक्षणोदाहरणाभावात्किं नैवाभ्युपेयेत्याशङ्क्याह—जहदजहल्लक्षणेति। छत्रिणो यान्तीत्यादिकमादिपदार्थः। ननु शक्यैकदेशमात्रावृत्तित्वं ह्येतल्लक्षणं तच्चात्र नायाति, श्वादेः काकैकदेशत्वाभावादित्याशङ्क्यास्मन्मते नेदमेतल्लक्षणं किन्तु(१)शक्याशक्य-

---

(१) शक्यविशेषपरित्यागेन अशक्यविशेषप्रत्यायकत्वं जहदजहल्लक्षणात्वमिति साम्प्रदायिकसम्मतं लक्षणम्। तस्य काकेभ्यो दधि रक्ष्यतामित्यत्राव्याप्तिः, अतः स्वमतेनास्या लक्षणमाह—शक्येति। शक्याशक्ययोः साधारण्येन प्रत्यायकत्वं तत्त्वम्। तथा च काकशब्दः काकत्वेन रूपेण शक्यमर्थं त्यक्त्वा अशक्यमर्थमुपघातकत्वेन प्रतिपादयन्नपि श्वादिसाधारण्येन काकमपि प्रतिपादयतीति भवति शक्याशक्यप्रतिपादकत्वाद् जहदजहल्लक्षणालक्षणसमन्वय इति।

मित्याद्येव। तत्र शक्यकाकपरित्यागेनाशक्यदध्युपघातकत पुरस्कारेण काकेऽकाकेऽपि काकशब्दस्य प्रवृत्तेः।

लक्षणाबीजं तु (१) तात्पर्य्यानुपपत्तिरेव न त्वन्वयानुप पत्तिः, काकेभ्यो दधि रक्ष्यतामित्यत्रान्वयानुपपत्तेरभावात् गङ्गायां घोष इत्यादौ तात्पर्य्यानुपपत्तेरपि सम्भवात्।

लक्षणा च न पदमात्रवृत्तिः, किन्तु वाक्यवृत्तिरपि

गोचरवृत्तित्वं तयोरुदाहरणेऽस्तीत्याह—शक्येति। अन्ये तु लक्ष विना वाच्यैकदेशमात्रपरता पदानां न सम्भवति, गेहे घट आधाराधेयभावेनान्वितयोर्गेहघटयोस्तदवच्छेदकत्वेन गेहत्वघटत्वये न्वयात्। तत्त्वमस्यादिवाक्येऽपि साक्षादवच्छेदकत्वेन वाऽन्वयस्य स्यकतयाऽखण्डार्थत्वात्सिद्धिरित्याहुः।

सम्प्रति लक्षणाबीजमाह—लक्षणेति।

त्वाभावे कथं गङ्गायां घोष इत्यत्र लक्षणेत्याशङ्क्याह—गङ्गाय मिति।

यथा शक्तिः पदमात्रवृत्तिस्तथा वृत्तित्वाल्लक्षणाऽपीति नैयायि स्तान्निराचष्टे—लक्षणा चेति। उक्तानुमाने(२) श तथा च गम्भीरायां नद्यां घोष इत्यादौ नद्यादिपदमात्रे लक्षणायां वि गमकाभावेन समुदाये एव लक्षणायास्त्वयाऽप्यवश्यमङ्गीकार्य्यत्वात् मात्रवृत्तित्वे वृत्तित्वं न नियामकम्, अपि तु शक्तित्वे सति वृत्तित्वं

---

(१) मुख्यार्थान्वयबाधो लक्षणाबीजमित्यालङ्कारिकाः, तान्निराकर्तुं तात्पर्येति।

(२) लक्षणा पदमात्रवृत्तिर्वृत्तित्वाच्छक्तिवदित्यनुमाने शक्तित्वमुपा यथा हि, दृष्टान्ते शक्तौ साध्यमस्ति शक्तित्वमप्यस्तीति साध्यव्याप त्वम्, साधनं वृत्तित्वं लक्षणायामपि, तत्र शक्तित्वं नास्तीति साधनाव्याप त्वमपीति।

(३) तथा च यत्र शक्तित्वे सति वृत्तित्वं तत्र पदमात्रवृत्तित्वमिति व्या

तथा गम्भीरायां नद्यां घोष इत्यत्र गम्भीरायां नद्यामिति पद-द्वयसमुदायस्य तीरे लक्षणा ।

(१) ननु वाक्यार्थस्याशक्यतया कथं शक्यसम्बन्ध-रूपा लक्षणा ? । उच्यते । शक्त्या (२) यत्पदसम्बन्धेन ज्ञाप्यते तत्सम्बन्धो लक्षणा, शक्तिज्ञाप्यश्च यथा पदार्थ-स्तथा वाक्यार्थोऽपीति न काचिदनुपपत्तिः । एवमर्थवाद-वाक्यानां प्रशंसारूपाणां प्राशस्त्ये लक्षणा । सोऽरोदीदि-

---

भूतमपीत्याशयेनाह—यथेति ।

ननु पदस्यैव शक्तत्वेन तदर्थस्य शक्यतया तत्सम्बन्धिन एव लक्ष्यत्वात्कथं वाक्यवृत्तिलक्षणाविषयत्वं वाक्यार्थसम्बन्धिन इत्याशङ्कते-नन्विति । शक्यशब्देनेह पदनिष्ठशक्तिज्ञाप्यो विवक्षितः, स च पदार्थद्वारा वाच्यार्थोऽपीति तत्सम्बन्धिन्यपि लक्षणा न विरुध्यत इत्याह-उच्यते इति । पदेन स्वनिष्ठशक्त्या यज्ज्ञाप्यते तत्सम्बन्धो लक्षणा। तथा चेदं लक्षणमुभयसाधारणत्वादावश्यकमित्याह—शक्तिज्ञा-प्यश्चेति । यथा लोके तथा वेदेऽपि बोध्यमित्याह-एवमिति । 'वायुर्वै क्षेपिष्ठा देवता' इत्यादीनामर्थवादवाक्यानाम् । ननु तत्र पदाना

यापकभावे सति तत्त्व शक्तावेवेति । लक्षणाया पदभिन्नवृत्तित्वमपि सिद्धम्।

(१) ननु वाक्ये लक्षणाङ्गीकारे शक्यसम्बन्धो लक्षणेति सिद्धान्तहानि-प्रसङ्गः, वाक्यार्थस्याशक्यत्वादिति शङ्कते—नन्विति ।

(२) पदसम्बन्धेन—(पदसम्बद्धया पदवृत्तितयेत्यर्थः) शक्त्या यद्वस्तु ज्ञाप्यते तत्सम्बन्धो लक्षणा । तथा च शक्त्या-साक्षाज्ज्ञाप्यस्तु पदार्थ एव परन्तु तज्ज्ञानद्वारा वाक्यार्थोऽपि ज्ञाप्यत एवेति परम्परया ज्ञाप्यस्तु वाक्यार्थोऽपि भवति, अतः पदार्थस्येव वाक्यार्थस्यापि शक्तिज्ञाप्यत्वरूपशक्यत्वात् तत्सम्बन्धरूपा लक्षणा सम्भवत्येवेति न काचिदनुपपत्तिः ।

त्यादिनिन्दार्थवाक्यानां निन्दितत्वे लक्षणा। अर्थवादगत पदानां प्राशस्त्यादिलक्षणाऽभ्युपगमे एकेन पदेन लक्षणया तदुपस्थितिसम्भवे पदान्तरवैयर्थ्यं स्यात्। एवं च विध्यपेक्षित प्राशस्त्यरूपपदार्थप्रत्यायकतया अर्थवादपदसमुदायस्य(१) पदस्थानीयतया विधिवाक्येन एकवाक्यत्व भवतीत्यर्थवादानां (२) पदैकवाक्यता।

क तर्हि वाक्यैकवाक्यता?। यत्र प्रत्येकं भिन्नभिन्न संसर्गप्रतिपादकयोर्वाक्ययोराकाङ्क्षावशेन महावाक्यार्थ बोधकत्वम् (३)। यथा 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादिवाक्यानां 'समिधो यजति' इत्यादि वाक्यानां च परस्परापेक्षिताङ्गाङ्गिबोधकवाक्यत्वदैक

लक्षणा कुतो न स्यादित्यत आह—अर्थवादेति। तथा चार्थवाद वाक्यस्य विधिनैकवाक्यत्वे पदैकवाक्यत्वव्यवहारस्तेनैव इत्याह-एवञ्चेति।

नन्वर्थवादपदसमुदायस्य पदस्थानीयत्वे तस्य विधिवाक्येनैक वाक्यता यदि पदैकवाक्यता तर्हि क वाक्यैकवाक्यतेति प्रश्नाशयमुद्भावयति केति। अर्थवादवाक्यानां स्वार्थे तात्पर्याभावेन प्राशस्त्यबोधकत्वे स्वार्थविबोधकवाक्यत्वाभावात्तत्र वाक्यैकवाक्यतायोग्यत्वेऽपि वाक्यार्थबोधकयोर्वाक्ययोर्यत्रैकवाक्यत्वं तत्र वाक्यैकवाक्यत्वमित्याह—यत्रेति। तदुदाहरणमाह—यथेति। एकवाक्यताप्रयोजनमाह—परस्परेति।

---

(१) यथात्र प्रत्येकेन पदेन यावदपेक्षितोऽर्थो बोध्यते तावदेव 'वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति' इत्यर्थवादसमुदायस्यार्थ इति पदसमुदायस्यापि पदस्थानीयत्वमिति।

(२) अर्थवादवाक्यानामिति चक्रपुस्तके पाठः, स तु युक्तः। अर्थवाद पदानामिति पुस्तके पाठः स त्वयुक्त एवेति। (३) तत्र इति क्वचित्।

वाक्यता । तदुक्तं भट्टपादैः—

स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया ।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते ॥ इति ।

एवं द्विविधोऽपि पदार्थो निरूपितः ।

(१)तदुपस्थितिश्चासत्तिः । सा च शाब्दबोधे हेतुः, तथैवान्वयव्यतिरेकदर्शनात् । एवं महावाक्यार्थबोधेऽवान्तरवाक्यार्थबोधो हेतुः, तथैवान्वयाद्यवधारणात् ।

र्शपूर्णमासाभ्यामित्यादिवाक्यानामङ्गप्रबोधकत्वं समिधो यजति दा यजतीत्यादिवाक्यानामङ्गबोधकत्वं तदवबोधकत्वादाकाङ्क्षाविशत्वं तत्त्वादेकवाक्यतेत्यर्थः । स्वोक्तेऽर्थे भट्टपादाचार्यवाक्यं संवादयति—**तदुक्तमिति** । प्रथमं स्वार्थबोधे पर्यवसान प्राप्ताना वाक्यानामङ्गाङ्गिभावाद्यपेक्षया पुनर्मिलित्वा वाक्यैकवाक्यत्वं सम्पद्यत इत्यर्थः । पदार्थनिरूपणमुपसंहरति—**एवमिति** ।

क्रमप्राप्तामासत्तिं लक्षयति—**तदिति** । पदजन्यपदार्थस्मृतिरित्यर्थः । ननु शाब्दबोधे उक्ताऽऽसत्तिर्हेतुरुत तज्ज्ञानमित्यपेक्षायां सैव हेतुर्न तज्ज्ञानमित्याह—**सा चेति** । अत्र किम्प्रमाणमित्यत आह—**तथैवेति** । परस्परान्वययोग्यपदार्थोपस्थितिसत्त्वे शाब्दबोधो भवति, तदभावे नेत्यन्वयव्यतिरेकदर्शनात् । यद्वा, माऽस्त्वासत्तिः शाब्दबोधे हेतुः, का क्षतिरित्याशङ्क्याह—**सा चेति** । अत्र मानमाह—**तथैवेति** । यथा शाब्दबोधे आकाङ्क्षादिकं कारणमेवमाकाङ्क्षादिना जातोऽवान्तरवाक्यार्थबोधो महावाक्यार्थज्ञाने कारणमित्याह—**एवमिति** । यतोऽवान्तरवाक्यार्थबोधसत्त्वे महावाक्यार्थबोधो भवति, तदभावे शाब्द-

---

(१) आसत्तिश्च—अव्यवधानेन पदजन्यपदार्थोपस्थितिरित्युक्त तल्लक्षणघटकस्य पदार्थस्य शक्यलक्ष्यद्वैविध्येन निरूपण कृतम् । तादृशद्विविधपदार्थोपस्थितिरासत्तिरित्यर्थः ।

क्रमप्राप्तं तात्पर्यं निरूप्यते। तत्र तत्प्रतीतीच्छयोच्चरितत्वं न तात्पर्यम्। अर्थज्ञानशून्येन पुरुषेणोच्चरिताद्वेदादर्थप्रत्ययाभावप्रसङ्गात्। अयमध्यापकोऽव्युत्पन्न इति विशेषदर्शनेन तत्र तात्पर्यभ्रमस्याप्यभावात्। न चेश्वरीयतात्पर्यज्ञानात् तत्र शाब्दबोध इति वाच्यम्। ईश्वरानङ्गीकर्तुरपि तद्वाक्यार्थप्रतिपत्तिदर्शनात्।

उच्यते। तत्प्रतीतिजननयोग्यत्वं तात्पर्यम्। गेहे घट इति वाक्यं गेहघटसंसर्गप्रतीतिजननयोग्यं, न तु पटसंसर्गप्रतीतिजननयोग्यमिति तद्वाक्यं घटसंसर्गपरं न तु पटसंसर्गपरमित्युच्यते।

बोधो नेत्यन्वयव्यतिरेकावधार्यते, अतः स हेतुरित्याह—तथैवेति।

क्रमप्राप्तं तात्पर्यनिरूपणं प्रतिजानीते—क्रमेति। तत्र—निरूपणविषयीभूततात्पर्ये सति। मौनिश्लोकेऽव्याप्तिदोषं सिद्धवत्कृत्य व्याप्तेरुदाहरणान्तरमाह—अर्थेति। ननु तद्वाक्यार्थज्ञानरहितरेऽप्यनेन तदर्थप्रतीतीच्छया एतद्वेदवाक्यमुच्चारितमिति तदीयतात्पर्यभ्रमात्तदर्थज्ञानं भविष्यतीत्याशङ्क्याह—अयमिति। विशेषदर्शनेन—भ्रमविरोध्यध्यापकनिष्ठाव्युत्पत्तिज्ञानेन। ननु माऽस्तु तत्, तात्पर्यज्ञानादेर्वाक्यार्थबोधे ईश्वरीयतात्पर्यज्ञानात्स भविष्यति, तस्य साक्षात्प्रेरकत्वाभावेऽपि प्रेरकतामात्रेणोच्चारयितृत्वसम्भवादित्याशङ्क्य परिहरति—न चेति। ईश्वरानङ्गीकर्तुरपि सांख्यमीमांसकादेर्वैदिकवाक्यार्थप्रत्ययोपलब्धेरित्याह—ईश्वरेति।

तर्हि कीदृशं तात्पर्यं भवतां विवक्षितमित्यपेक्षायामाह—उच्यत इति। पदार्थसंसर्गानुभवजननयोग्यत्वमित्यर्थः। अत एव यद् यत्संसर्गप्रतीतिजननयोग्यं वाक्यं प्रयुज्यते तत् तत्परमेव व्यवह्रियत इत्याह—गेहे घट इति।

ननु 'सैन्धवमानय' इत्यादिवाक्यं यदा लवणानयनप्रतीतीच्छया प्रयुक्तं तदाऽश्वसंसर्गप्रतीतिजनने स्वरूपयोग्यतासत्त्वाल्लवणपरत्वज्ञानदशायामप्यश्वादिसंसर्गज्ञानापत्तिरिति चेत्। न। तदितरप्रतीतीच्छयाऽनुच्चरितस्यापि तात्पर्यं प्रति विशेषणत्वात्। तथा च यद्वाक्यं यत्प्रतीतिजननस्वरूपयोग्यत्वे सति यदन्यप्रतीतीच्छया नोच्चरितं तद्वाक्यं तत्संसर्गपरमित्युच्यते।

शुकादिवाक्येऽव्युत्पन्नोच्चरितवेदवाक्यादौ च तत्प्रतीतीच्छाया एवाभावेन तदन्यप्रतीतीच्छयोच्चरितत्वाभावेन लक्षणसत्त्वान्नाव्याप्तिः। न चोभयप्रतीतीच्छयोच्चरितेऽव्याप्तिः। (१) तदन्यमात्रप्रतीतीच्छयाऽनुच्चरितत्वस्य विवक्षितत्वात्।

उक्ततात्पर्यलक्षणस्यानेकार्थपदप्रयोगेऽतिव्याप्तिं शङ्कते—नन्विति। श्वेतो गच्छतीत्यादिवाक्यमादिपदार्थः। विशेषणप्रदानेन दोषोद्धारमित्याह—नेति। विशेषणप्रदाने फलितं तात्पर्यलक्षणमाह—तथा चेति। एवं च सैन्धवमानयेति वाक्यमश्वप्रतीतिजननयोग्यमपि भोजनप्रकरणे प्रयुक्तत्वाल्लवणान्यप्रतीतीच्छयाऽनुच्चरितत्वेन नाश्वसंसर्गज्ञानजनकमिति भावः।

पूर्वोक्ताव्याप्तिदोषग्रस्तत्वमप्यस्य लक्षणस्य नास्तीत्याह—शुकादीति। ननूभयप्रतीतीच्छयोच्चरिते लवणान्यप्रतीतीच्छयाऽनुच्चरितत्वाभावादव्याप्तिरित्याशङ्क्य परिहरति—न चेति। उभयप्रतीतीच्छयोच्चरितत्वेन तदन्यमात्रप्रतीतीच्छयाऽनुच्चरितत्वस्य सत्त्वादित्याह—तदन्यमात्रेति। तदन्यमात्रप्रतीतीच्छयाऽनुच्चरितत्वमुभयप्रतीती-

(१) तथा च तत्प्रतीतिजननयोग्यत्वे सति तदन्यमात्रप्रतीतीच्छयाऽनुच्चरितत्वं तात्पर्यस्य लक्षणम्।

(१) उक्तप्रतीतिमात्रजननयोग्यतायाश्चावच्छेदिका शक्तिः, अस्माकं तु मते सर्वत्र कारणतायाः शक्तेरेवावच्छेदकत्वान्न कोऽपि दोषः। एवं तात्पर्यस्य तत्प्रतीतिजनकत्वरूपस्य शाब्दज्ञानजनकत्वे सिद्धे चतुर्थवर्णके (२) तात्पर्यस्य शाब्दज्ञानहेतुत्वनिराकरणवाक्यं तत्प्रतीतीच्छयोच्चरितत्वरूपतात्पर्यनिराकरणपरम्, अन्यथा तात्पर्य

च्छयोच्चरितत्वेनेवेति भावः। न चैवमेकप्रतीतीच्छयोच्चरितेऽव्याप्तिरिति वाच्यम्। तदन्यपरत्वप्रतीतीच्छयाऽनुच्चरितत्वमित्यर्थस्य तदानीं विवक्षितत्वात्।

ननूक्तप्रतीतिप्रजननयोग्यताया किमवच्छेदकम्? तत्प्रतीतीच्छयोच्चरितत्वमिति चेद्, न। अपुरुषोच्चरितवेदवाक्यादावव्याप्तेरित्याशङ्क्याह—उक्तेति। न च शक्तिकल्पने गौरवं शङ्क्यं सर्वत्र तस्या एवास्मिन्मते क्लृप्तत्वादित्याह—अस्माकमिति। तथा च यथा वह्न्यादिनिष्ठदाहादिजनकतावच्छेदिका शक्तिरेव तथा तात्पर्यनिष्ठशाब्दजनकतावच्छेदिका शक्तिरेवेति न कोऽपि विरोध इत्यर्थः। ननु तात्पर्यस्य शाब्दज्ञानहेतुत्वे तन्निरासपरविवरणवाक्यविरोध इत्याशङ्क्योक्तरीत्या तात्पर्यज्ञानस्य शाब्दज्ञानहेतुत्वसिद्धौ तद्वाक्यमन्यथा व्याख्येयमित्याह—एवमिति। विपक्षे बाधकमाह—अन्यथेति।

(१) शाब्दबोधरूपकार्ये आकाङ्क्षादिवद् योग्यताया अपि कारणत्वे निर्णीते कारणतावच्छेदकत्वविधया योग्यत्वादुच्चरितत्वाच्च तत्प्रतीतीच्छयोच्चरितत्वस्य स्वीकर्तव्यत्वे घट्टकुटीप्रभातन्यायापात इत्याशङ्क्य दृष्टिं निधायोत्तरयति—उक्तेति। तादृशयोग्यतायाश्चावच्छेदिका शक्तिरिति। तथा च कार्ये कार्यानुकूलशक्तेरतिरिक्तायाः स्वीकारेण सर्वं सम्यक्।

(२) चतुर्थवर्णकेति। 'तत्तु समन्वयात्' इति सूत्रस्य शङ्कराचार्यकृतभाष्योपरि या पद्मपादाचार्यव्याख्या तदुपरि यद्विवरणं तस्येत्यर्थः।

निश्चयफलकवेदान्तविचारवैयर्थ्यप्रसङ्गात्।

केचित्तु शाब्दज्ञानत्वावच्छेदेन न तात्पर्यज्ञानं हेतुरित्येवं परं चतुर्थवर्णकवाक्यम्। तात्पर्यसंशयविपर्ययोत्तरशाब्दज्ञानविशेषे च तात्पर्यज्ञानं हेतुरेव। इदं वाक्यमेतत्परम्? एतदन्यपरमिति संशये तद्विपर्यये च तदुत्तरवाक्यार्थविशेषनिश्चयस्य तात्पर्यनिश्चयं विनाऽनुपपत्तेरित्याहुः।

तच्च तात्पर्यं वेदे मीमांसापरिशोधितन्यायादेवावधार्यते, लोके तु प्रकरणादिना। तत्र लौकिकवाक्यानां मानान्तरावगतार्थानुवादकत्वम्। वेदे तु वाक्यार्थस्यापूर्वतया नानुवादकत्वम्। तत्र लोके वेदे च कार्यपराणा-

---

तद्वाक्यस्यास्मदुक्ततात्पर्यनिराकरणपरत्वे अभेदरत्नकृन्मतमाह—केचित्त्विति। शाब्दज्ञानमात्रं प्रति न हेतुरित्यर्थः। शाब्दज्ञानविशेषं प्रति तु हेतुरेवेत्याह—**तात्पर्येति**। तादृशशाब्दज्ञानं प्रति तस्य हेतुत्वमन्वयव्यतिरेकसिद्धमित्याह—**इदमिति**। केचित्पदेनास्मिन्मते स्वस्यानभिमतिः सूचिता। तद्बीजं तु शाब्दज्ञाने तात्पर्यज्ञानजन्यतावच्छेदकशाब्दज्ञानत्वे लाघवं तात्पर्यसंशयविपर्ययोत्तरशाब्दज्ञानत्वे गौरवम्।

तादृशतात्पर्यावधारणं किं वेदे लोके वा एकमेव उत पृथक्? इत्यपेक्षायामाह—तच्चेति। **मीमांसा**—पूजितविचारः, पूर्वोत्तरभेदेन द्विविधः। आदिपदेनोपपदादिकं ग्राह्यम्। लोकवेदयोर्विशेषान्तरमप्याह—तत्रेति। लोकवेदयोर्मध्ये। **वाक्यार्थस्यापूर्वतया**—मानान्तरानवगमतया तद्वाक्यानां नानुवादकत्वम्। अथ लोकवेदयोः साम्यांशमाह—तत्रेति। लोके वेदे चेति तत्र पदविवरणम्।

मिन(१)सिद्धार्थानामपि प्रामाण्यम् , पुत्रस्ते जात इत्यादिषु सिद्धार्थेऽपि पदानां सामर्थ्यावधारणात् । अत एव वेदान्तवाक्यानां ब्रह्मणि प्रामाण्यम् । यथा चैतत्तथा विषयपरिच्छेदे वक्ष्यते ।

तत्र वेदानां नित्यसर्वज्ञपरमेश्वरप्रणीतत्वेन प्रामाण्यमिति नैयायिकाः । वेदानां नित्यत्वेन निरस्तसमस्तपुं-

गामानय पशुमालभेतेत्यादिकानां कार्यपराणां कार्यान्विते स्वार्थे शक्तानां यथा प्रामाण्यं तथा सिद्धवस्तुपराणामपि प्रामाण्यं, न तु प्राभाकराणामिव कार्यपराणामेवेत्यर्थः । तत्र हेतुमाह—पुत्र इति । अन्यथा वेदान्तवाक्यानां ब्रह्मणि प्रामाण्यं न स्यादित्याह—अत एवेति । यत एव सिद्धार्थानां वाक्यानां प्रामाण्यमत एवेत्यर्थः । नन्वस्तु कार्यपराणामेव प्रामाण्यं वेदान्तानामपि प्रतिपत्तिविधिपरत्वेन तद्भविष्यति, तस्मात्किमर्थं क्लिष्टकल्पनया सिद्धार्थे पदानां सामर्थ्यमास्थीयत इत्याशङ्क्याह—यथा चैतदिति । सिद्धार्थे पदानां सामर्थ्यावधारणाद् यथा कार्यसंस्पर्शमन्तरेण ब्रह्मणि वेदान्तानां प्रामाण्यं तथेत्यर्थः ।

स्वाभिमतवेदप्रामाण्यं दर्शयितुं नैयायिकमीमांसकयोर्मते दर्शयति—तत्रेति । लोकवेदयोर्मध्ये । कर्तृदोषादप्रामाण्यप्रसक्तिमाशङ्क्योक्तं—सर्वज्ञेति । सर्वज्ञत्वं मन्वादीनामप्यस्त्यत उक्तं-नित्येति । प्रणीतत्वाभिधानेन स्वमताद्वैलक्षण्यं बोधितम् , स्वमते वेदस्योत्पत्तिमत्त्वेऽपि वेदः कल्पान्तरीयानुपूर्वीविजातीयानुपूर्वीक ईश्वरप्रणीत इत्यनङ्गीकारात् । नित्यत्वेनेति । वेदानामनित्यत्वाभ्युपगमे पुंप्रणीतत्वावश्यंभा-

(१) प्राभाकरादयः कार्यपराणामेव 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इत्यादिन्यायेन प्रामाण्यमुक्त्वे तान्प्रदूषणार्थं मूते-सिद्धार्थानामपि प्रामाण्यमिति ।

दूषणतया प्रामाण्यमित्यध्वरमीमांसकाः। अस्माकं तु मते वेदो न नित्य उत्पत्तिमत्त्वात्। उत्पत्तिमत्त्व च 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' (बृ-२-४-१०) इत्यादिश्रुतेः। नापि वेदानां त्रिक्षणावस्थायित्वम्। य एव वेदो देवदत्तेनाधीतः, स एव वेदो मयाऽधीत इत्यादिप्रत्यभिज्ञाविरोधात्। अत एव गकारादिवर्णानामपि न क्षणिकत्वं, सोऽयं गकार इति प्रत्यभिज्ञाविरोधात्।

तथा च वर्णपदवाक्यसमुदायस्य वेदस्य वियदादिवत् सृष्टिकालीनोत्पत्तिमत्त्वं प्रलयकालीनध्वंसप्रतियोगित्वं च। न तु मध्ये वर्णानामुत्पत्तिविनाशौ, अनन्तगकार-

---

वात्तस्येश्वरत्वेऽपि भक्तपक्षपातादिसम्भवाद्बौद्धप्रणीतागमवद्वेदेऽपि दोषप्रसङ्गात्तस्य नित्यत्वेन निरस्तसमस्तपुंदूषणतया प्रामाण्यमित्यर्थः। स्वमतमाह—अस्माकं त्विति। तुशब्द उभपक्षाभ्यां वैलक्षण्यद्योतनार्थः। तत्त्वं चानित्यत्वेऽपि प्रलयकालपर्यन्तावस्थायित्वे सति पुंदोषविनिर्मुक्तत्वम्, तच्च श्रुतिसिद्धमतो न स्वरूपासिद्धो हेतुरित्याह—उत्पत्तिमत्त्वं चेति। 'ऋचः सामानि जज्ञिरे तस्मात्' इत्यादिश्रुतिरादिपदार्थः। वेदो न नित्य इत्युक्ते नैयायिकाभिमतत्रिक्षणावस्थायित्वं वेदानां किं तवाप्यनुमतमित्यपेक्षायां यथा मीमांसकाभिमतं तेषां नित्यत्वं यथाऽस्मदननुमतं तथा तदभिमतं तथात्वमपीत्याह—नापीति। वर्णसमुदायगर्भस्य वेदस्य स्वरूपतः क्षणिकत्वमपाकृत्य वर्णद्वाराऽपि तन्निराकरोति—अत एवेति। यतः प्रत्यभिज्ञाविरोधाद्वेदानामक्षणिकत्वमत एव सोऽयमित्यादिप्रत्यभिज्ञाविरोधाद्वर्णानां न क्षणिकत्वमित्यर्थः।

नन्वेवं तर्हि कथं वेदानामुत्पत्तिमत्त्वं तत्रश्चानित्यत्वमित्याशङ्क्याह—तथा चेति। वेदानां स्वरूपतो वर्णद्वारा च क्षणिकत्वाभावे

कल्पने गौरवात्। अनुच्चारणदशायां वर्णानामनभिव्यक्तिस्तदुच्चारणरूपव्यञ्जकाभावान्न विरुध्यते। अन्धकारस्थघटानुपलम्भवत्। उत्पन्नो गकार इत्यादिः प्रत्ययः सोऽयं गकार इति प्रत्यभिज्ञाविरोधादप्रमाणम्, वर्णाभिव्यक्तिजनकध्वनिगतोत्पत्तिनिरूपितपरम्परासम्बन्धविषयत्वेन प्रमाणं वा। तस्मान्न वेदानां क्षणिकत्वम्।

ननु क्षणिकत्वाभावेऽपि वियदादिप्रपञ्चवदुत्पत्तिमत्त्वेन परमेश्वरकर्तृकतया पौरुषेयत्वादपौरुषेयत्वं च वेदानामिति तव सिद्धान्तो भज्येतेति चेत्। न(१)। न हि तावत्पुरुषेणोच्चार्यमाणत्वं पौरुषेयत्वम्। गुरुमतेऽपि अध्यापकपरम्परया पौरुषेयत्वापत्तेः। नापि पुरुषाधीनोत्पत्ति-

---

शति। नन्वेवं तर्हि सर्वदा वर्णानामभिव्यक्तिः कुतो नेत्याशङ्क्याह—अनुच्चारणेति। ननूत्पन्नो गकारो नष्टो गकार इति प्रत्ययान्यथा उत्पत्त्यादिकं कथं नाभ्युपेयत इत्याशङ्क्य परिहरति—उत्पन्न इति। वर्णेति। श्यामो घटो नष्टः रक्तो घट उत्पन्न इति प्रतीतिवदुत्पत्तिविनाशवद्ध्वनिसम्बन्धादुक्तप्रत्ययः परम्परासम्बन्धविषयत्वात्प्रमाणं चेत्यर्थः। उपसंहरति—तस्मादिति।

अथापसिद्धान्तं मीमांसकः शङ्कते—नन्विति। अस्माकं मते वेदानामुत्पत्तिमत्त्वेऽपि पौरुषेयत्वाभावान्नापसिद्धान्त इत्याशयेनाह—नेति। किंविधं पौरुषेयत्वमभिप्रेत्यास्मन्मते तदापाद्यते। किं पुरुषेणोच्चार्यमाणत्वम्? किं वा पुरुषाधीनोत्पत्तिकत्वम्? इति विकल्प्याद्यं निराकरोति—न हीति। गौरिश्लोकादेरपौरुषेयत्वापत्तिरपि बोध्या। द्वितीयं प्रत्याह—नापीति। वेदाः पौरुषेयाः वाक्यत्वाद्भा-

---

(१) न इति पदं पुस्तके नास्ति, टीकानुरोधादस्यावश्यकं भाति।

त्त्वं पौरुषेयत्वम्। नैयायिकाभिमतपौरुषेयत्वानुमानेऽस्मदादिना सिद्धसाधनत्वापत्तेः। किन्तु सजातीयोच्चारणानपेक्षोच्चारणविषयत्वम्।

तथा च सर्गाद्यकाले परमेश्वरः पूर्वसर्गसिद्धवेदानुपूर्वीसमानानुपूर्वीकं वेदं विरचितवान्, न तु तद्विजातीयं वेदमिति न सजातीयोच्चारणानपेक्षोच्चारणविषयत्वं पौरुषेयत्वं वेदानाम्। भारतादीनां तु सजातीयोच्चारणमनपेक्ष्यैवोच्चारणमिति तेषां पौरुषेयत्वम्। एवं पौरुषेयापौरुषेयभेदेनागमो द्विधा निरूपितः।

इति वेदान्तपरिभाषायामागमपरिच्छेदः॥ ४॥

रतादिवदिति नैयायिकाभिमतपौरुषेयत्वानुमानेनाऽस्मदाद्यभ्युपेतपौरुषेयत्वसाधनादस्मदादिना सिद्धसाधनतापत्तेरित्याह—नैयायिकेति। तर्हि किंविधं पौरुषेयत्वं यदभावाद्भवता मते उत्पत्तिमतां वेदानामपौरुषेयत्वं सिध्यतीत्याशङ्क्य परिहरति—किं त्विति। सजातीयोच्चारणस्यानपेक्षा यस्य तद् यथा, तथाविधोच्चारणस्य विषयत्वमित्यर्थः।

तथा च—उक्तविधे पौरुषेयत्वे सति। इति—उक्तहेतोः, नोक्तपौरुषेयत्वं वेदस्येत्यर्थः। अस्ति च पौरुषेयेष्वेतल्लक्षणमित्याह—भारतादीनां त्विति।

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकृष्णमनुधनपतिसूरिसुतशिवदत्तविरचितायां वेदान्तपरिभाषार्थदीपिकायामागमपरिच्छेदः समाप्तः॥ ४॥

अथार्थापत्तिपरिच्छेदः ५

इदानीमर्थापत्तिर्निरूप्यते । (१)तत्रोपपाद्यज्ञानेनोपपादककल्पनमर्थापत्तिः । तत्रोपपाद्यज्ञानं करणम् । उपपादकज्ञानं फलम्(२) । येन विना यदनुपपन्नं तत्तत्रोपपाद्यम् , यस्याभावे यस्यानुपपत्तिस्तत्तत्रोपपादकम् यथा रात्रिभोजनेन विना दिवाऽभुञ्जानस्य पीनत्वमनुपपन्नमिति तादृशपीनत्वमुपपाद्यम् । यथा वा रात्रिभोजनस्याभावे तादृशपीनत्वस्यानुपपत्तिरिति रात्रिभोजनमुपपादकम् ।

अथागमनिरूपणानन्तरमर्थापत्तिनिरूपणं प्रतिजानीते—इदानीमिति । तत्र—अर्थापत्तेरागमनिरूपणानन्तरं निरूपणविषये इति । प्रमाकरणस्य प्रमाणत्वात्प्रमारूपार्थापत्तेर्लक्षणमाह—उपपाद्येति । उपपादकज्ञानं करणमुपपाद्यज्ञानं फलमिति भ्रमस्याऽन्यथामाह—तत्रेति । तयोर्ज्ञानद्वयोर्मध्ये । उपपाद्यघाभावव्यापकाभावप्रतियोगित्वमुपपाद्यत्वमित्युपपाद्यलक्षणमाह—येनेति । तत्रेति तेनेत्यर्थः । उपपाद्याभावव्याप्याभावप्रतियोगित्वमु(३)पपादकलक्षणमाह—यस्येति । तत्रेति । तस्येत्यर्थः । उपपाद्योदाहरणमाह—यथेति । उपपादकोदाहरणमाह—यथा वेति ।

प्रमितायर्थापत्तिशब्दप्रवृत्तिनिमित्तमाह—रात्रिभोजनेति

---

(१) अर्थापत्तिप्रमाकरणमर्थापत्तिप्रमाणम् , तथा च प्रमाणप्रसङ्गादस्य प्रमाद्वयानिरूपणे प्रमाणस्य निरूपणमेव न भवतीति प्रमायाः प्रथमं निरूपणं-तत्रेति ।
(२) फलम् अर्थापत्तिप्रमेत्यर्थः ।
(३) मित्युपपादकेति पुस्तके पाठः ।

रात्रिभोजनकल्पनारूपायां प्रमितावर्थस्यापत्तिः (१) कल्पनेति षष्ठीसमासेन अर्थापत्तिशब्दो वर्तते, कल्पनाकरणपीनत्वादिज्ञाने त्वर्थस्यापत्तिः (२) कल्पना यस्मादिति बहुव्रीहिसमासेन वर्तते इति फलकरणयोरुभयोस्तत्प्रयोगः ।

(३) सा चार्थापत्तिर्द्विविधा—दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति । तत्र दृष्टार्थापत्तिर्यथा—इदं रजतमिति पुरोवर्तिनि प्रतिपन्नस्य रजतस्य नेदं रजतमिति तत्रैव निषिध्यमानत्वं सत्यत्वेऽनुपपन्नमिति रजतस्य (४) सद्भिन्नत्वं सत्यत्वात्यन्ताभाववत्त्वं वा मिथ्यात्वं कल्पयतीति ।

तत्करणे तन्निमित्तमाह—कल्पनेति ।

एवं लक्षणलक्षितां तां विभजते—**सा चेति** । अर्थापत्तिनिरूपणस्य प्रपञ्चमिथ्यात्वादिसिध्यर्थत्वात्तदनुरूपमुदाहरणं वक्तव्यमित्याशयेनाह—**दृष्टार्थापत्तिर्यथेति** । प्रतिपन्नस्य—प्रतीतस्य । तत्रैवपुरोवर्तिन्येव । **सत्यत्वे** रजतस्येति सम्बध्यते । अनुपपन्नमिति हेतोः निषिध्यमानत्वं रजतस्य मिथ्यात्वं कल्पयति । किं तदित्यत आह—**सद्भिन्नत्वमिति** ।

---

(१) अर्थस्य-रात्रिभोजनरूपस्य उपपादकज्ञानस्य आपत्तिः-कल्पना, तथा च रात्रिभोजनकल्पनमेवार्थापत्तिप्रमेत्यर्थः ।

(२) अर्थस्य—रात्रिभोजनरूपस्योपपादकज्ञानस्य कल्पना यस्माद्-दिवाभोजनाभावविशिष्टपीनत्वज्ञानात् तदर्थापत्तिप्रमाणम् ।

(३) सेति । प्रमारूपार्थापत्तिरित्यर्थः ।

(४) सद्भिन्नत्वमिति । नेदं रजतमित्याप्तवाक्यश्रवणानन्तरं जातो रजतत्वाद्यभावबोधः, स तत्र रजतत्वसत्त्वेऽनुपपद्यमानः सम्प्रत्यक्षावगतस्य रजतस्य सद्भिन्नत्वं कल्पयतीति तात्पर्यम् ।

श्रुतार्थापत्तिर्यथा(१)—यत्र श्रूयमाणवाक्यस्य स्वार्थानुपपत्तिमुखेनार्थान्तरकल्पनम् । यथा 'तरति शोकमात्मवित्' इत्यत्र श्रुतस्य शोकशब्दवाच्यबन्धजातस्य ज्ञाननिवर्त्यत्वस्यान्यथाऽनुपपत्त्या बन्धस्य मिथ्यात्वं कल्प्यते ।

यथा वा जीवी देवदत्तो गृहे नेति वाक्यश्रवणानन्तरं जीविनो गृहासत्त्वं बहिः सत्त्वं कल्पयति । श्रुतार्थापत्तिश्च द्विविधा—अभिधानानुपपत्तिरभिहितानुपपत्तिश्च । तत्र, (२)यत्र वाक्यैकदेशश्रवणेऽन्वयाभिधानानुपपत्त्याऽन्वयाभिधानोपयोगि पदान्तरं कल्प्यते तत्राभिधानानुपपत्तिः । यथा द्वारमित्यत्र 'पिधेहि' इत्यध्याहारः, यथा वा 'विश्वजिता यजेत' इत्यत्र 'स्वर्गकाम' इति पदाध्याहारः । ननु द्वारमित्यादावन्वयाभिधानात्पूर्वमिदमन्वयाभिधानं पिधानोपस्थापकपदं विनाऽनुपपन्नमिति कथं ज्ञानमिति चेत् । न । अभिधानपदेन करणव्युत्पत्त्या तात्पर्यस्य विवक्षि-

---

मीमांसकमतानुसारेणाह—यथा वेति । तत्र—द्वयोर्मध्ये । पदाध्याहारमेवानुसृत्याह—यथेति । वैदिकोदाहरणमाह—यथा वेति । चतुर्थाध्यायस्थे 'स स्वर्गः स्यात् सर्वान्प्रत्यविशिष्टत्वात्' इति सूत्रे स्वर्गकामपदाध्याहारस्य दर्शितत्वादिति भावः । ननु द्वारकर्मकपिधानमित्यन्वयाभिधानात्प्राक् पिधानोपस्थापकं पदं विना द्वारमित्यन्वयाभिधानं नोपपद्यत इति कथं ज्ञानमिति शङ्कते—नन्विति । अत्र भावव्युत्पत्तिर्नाभिप्रेतेति परिहरति—नेति । अभिधीयतेऽनेनेति करणव्युत्पत्त्याऽभिधानपदेन तात्पर्यस्य विवक्षितत्वात् । तात्पर्यस्य विव-

---

(१) अत्र यथाशब्दस्य लक्षणार्थकः, श्रुतार्थापत्तिश्च इत्यर्थः । तथा च यथेत्यादि श्रुतार्थापत्तेर्लक्षणम्, तरति शोकमित्यादिकं च लक्ष्यमित्यर्थः ।

(२) तत्र तयोर्द्विविधयोः श्रुतार्थापत्त्योः ।

सत्वात् । तथा च द्वारकर्मकपिधानक्रियासंसर्गपरत्वे पिधानोपस्थापकपदं विनाऽनुपपन्नमिति ज्ञानं तत्रापि सम्भाव्यते ।

अभिहितानुपपत्तिस्तु यत्र वाक्यावगतोऽर्थोऽनुपपन्नत्वेन ज्ञातः सन्नर्थान्तरं कल्पयति, तत्र द्रष्टव्या । यथा 'स्वर्गकामो ज्योतिष्टोमेन यजेत' इत्यत्र स्वर्गसाधनत्वस्य (१) क्षणिकज्योतिष्टोमयागगततयाऽवगतस्यानुपपत्त्या मध्यवर्त्यपूर्वं कल्प्यते । न चेयमर्थापत्तिरनुमानेऽन्तर्भवितुमर्हति । अन्वयव्याप्त्यज्ञानेनान्वयिन्यनन्तर्भावात् । व्यतिरेकिणश्चानुमानत्वं प्रागेव निरस्तम् । अत एवार्थापत्तिस्थलेऽनुमिनोमीति नानुव्यवसायः, किं तु अनेनेदं कल्पयामीति ।

क्षितत्वे सतीदं समाधानं फलितमित्याह—**तथा चेति** । द्वारकर्मकक्रियासंसर्गविवक्षैतत्तात्पर्येणानेन द्वारमित्युच्चरितमिति ज्ञानवतोऽन्वयाभिधानानुपपत्त्यवस्थायामपि तथा ज्ञानं संभाव्यत इत्यर्थः ।

द्वितीयां क्व दृष्टेत्यपेक्षायामाह—**अभिहितेति** । तत्रापि कुत्रेत्यत आह—**यथा स्वर्गकाम इति** । नैयायिकमतमाशङ्क्य परिहरति—**न चेति** । अर्थापत्तेरन्वयिन्यन्तर्भावः किं वा व्यतिरेकिणीति विकल्प्याद्यं प्रत्याह—**अन्वयेति** । द्वितीयं निराचष्टे—**व्यतिरेकिण इति** । अनुमिनोमीत्यनुव्यवसायाभावोऽपि व्यतिरेकिणोऽनुमानत्वेऽनुपपन्न इत्याह—**अत एवेति** । यतो व्यतिरेकिणोऽनुमानता नास्त्यत एव । कीदृशस्तर्ह्यनुव्यवसाय इत्याशङ्क्याह—**किं त्विति** । तथा चार्थापत्तेरपरयत्नत्वान्न गौरवमाशङ्कनीयमिति भावः ।

---

(१) स्वस्य क्षणिकतया साक्षाद्यागगतस्यानुप० इति पाठः खपुस्तकयोः ।

नन्वर्थापत्तिस्थले-इदमनेन विनाऽनुपपन्नमिति ज्ञानं करणमित्युक्तं, तत्र किमिदं तेन विनाऽनुपपन्नत्वम्? । तदभावव्यापकाभावप्रतियोगित्वमिति ब्रूमः । एवमर्थापत्तेर्मानान्तरत्वसिद्धौ व्यतिरेकि नानुमानान्तरम्, पृथिवीतरेभ्यो भिद्यते इत्यादौ गन्धवत्त्वमितरभेदं विनाऽनुपपन्नमित्यादिज्ञानस्य करणत्वात् । अत एवानुव्यवसायः पृथिव्यामितरभेदं कल्पयामीति ।

इति वेदान्तपरिभाषायामर्थापत्तिपरिच्छेदः ॥ ५ ॥

नन्विदमनेन विनाऽनुपपन्नमिति ज्ञानं व्यतिरेकव्याप्तिज्ञानमेव? उतान्यत्? आद्ये, तस्यानुमितिं प्रति करणत्वेनानुमानत्वापत्तिः । न द्वितीयः, तस्य निरूपयितुमशक्यत्वादित्याशयेनाशङ्कते—नन्विति । अस्तु वा व्यतिरेकव्याप्तिज्ञानमेतत्, तथाऽपि(१) तस्य तथाविधानुव्यवसायबलादर्थापत्तिकरणत्वमविरुद्धम्, तस्यानुमितिकरणत्वं दूषितं चेत्याशयेनाह—तदभावेति । एवमर्थापत्तेरावश्यकत्वाद्व्यतिरेकिणोऽनुमानत्वं न कल्पनीयमित्याह—एवमिति । तर्हि तदुदाहरणेषु का गतिरित्याशङ्क्य हेतुमाह—पृथिवीति । पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात् यन्नैवं तन्नैवं यथा जलमित्यादौ । अत्राप्यर्थापत्तिसाधकेऽनुव्यवसाय इत्याह—अत एवेति ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तसीता-धर्तंसरागकुमारसज्ञ्यनपतिसूरिसुतशिवदत्तकृतायां वेदान्तपरिभाषाऽर्थदीपिकायामर्थापत्तिपरिच्छेदः ॥ ५ ॥

---

(१) तस्य व्यतिरेकव्याप्तिज्ञानस्य ।

अथानुपलब्धिपरिच्छेदः ६

इदानीं षष्ठं प्रमाणं निरूप्यते। (१) ज्ञानकरणाजन्याभावानुभवासाधारणकारणमनुपलब्धिरूपं प्रमाणम्। अनुमानजन्यातीन्द्रियाभावानुभवहेतावनुमानादावतिव्याप्तिवारणाय अजन्यान्तं पदम्। अदृष्टादौ साधारणकारणेऽतिव्याप्तिवारणाय असाधारणेति पदम्। अभावस्मृत्य-

---

अथ क्रमप्राप्तानुपलब्धिप्रमाणनिरूपणं प्रतिजानीते—**इदानी**मिति। तल्लक्षणमाह—**ज्ञाने**ति। **अजन्यान्तं**—ज्ञानकरणाजन्येति-पदम्। भावानुभवकरणे चक्षुरादावतिव्याप्तिवारणाय **अभाव**पदम्(२) (इत्यभिप्रेत्य) असाधारणपदव्यावर्त्यमाह—**अदृष्टादा**विति। ननु ज्ञानपदं विहायानुभवपदप्रदाने किंफलमित्याशङ्क्याह—**अभावे**ति।

---

(१) ज्ञानरूपाणि यानि करणानि—व्याप्तिज्ञान-सादृश्यज्ञान-तात्पर्यवच्छब्दज्ञानोपपाद्यज्ञानानि तेभ्योऽजन्यो योऽभावानुभवः, तस्य असाधारणं कारणम् अनुपलब्धिरूपं प्रमाणमित्यर्थः।

ननु ज्ञानरूपकरणेभ्योऽजन्योऽपि चक्षुरादिजन्यो योऽभावानुभवः तस्यासाधारणकारणं चक्षुरादिकमेवास्तु, किमनुपलब्ध्या? येनेन्द्रियेण या व्यक्तिर्गृह्यते तेनैवेन्द्रियेण तद्गता जातिस्तदभावश्च गृह्यत इति न्यायात्, ततश्चार्थान्तरं स्यादिति कश्चिद् ब्रूयात्, स प्रतिवक्तव्यः—घटतदभावानुभवयोर्वैजात्यमनुभूयते न वा? नान्त्यः, प्रत्यक्षानुमितिप्रमयोरपि अनुभवत्वसाम्येन भेदाभावस्य तुल्यत्वात्। आद्येऽनुभववैजात्ये प्रमाणवैजात्यस्यावश्यकत्वादभावज्ञानं (अनुपलब्धिः) प्रमाणान्तरमेव। येनेन्द्रियेणेति न्यायस्त्वन्याय एव, नीरूपस्य निःस्पर्शस्य निर्गन्धस्य नीरसस्य निःशब्दस्य चाभावस्य ऐन्द्रियत्वायोगात्। इन्द्रियान्वयव्यतिरेकयोस्त्वधिकरणज्ञानोपक्षीणत्वेनान्यथासिद्धेरिति मूले एव वक्ष्यते इति दिक्।

(२) इत्यभिप्रेत्येति पाठः सर्वेषु पुस्तकेषु दृश्यते, प्रयोजनं तु नाकलयामः।

साधारणहेतुसंस्कारेऽतिव्याप्तिवारणाय अनुभवेति विशेषणम् ।

न चातीन्द्रियाभावानुमितिस्थलेऽप्यनुपलब्ध्यैवाभावो गृह्यतां विशेषाभावादिति वाच्यम् । धर्माधर्माद्यनुपलब्धिसत्त्वेऽपि तदभावानिश्चयेन योग्यानुपलब्धेरेवाभावग्राहकत्वात् ।

ननु केयं योग्यानुपलब्धिः ?। किं योग्यस्य प्रतियोगिनोऽनुपलब्धिरुत योग्याधिकरणे प्रतियोग्यनुपलब्धिः ?। नाद्य, स्तम्भे पिशाचादिभेदस्याप्रत्यक्षत्वापत्तेः । नान्त्य, आत्मनि धर्माधर्माद्यभावस्यापि प्रत्यक्षतापत्तेरिति चेत् । न । योग्या चासावनुपलब्धिश्चेति कर्मधारयाश्रयणात् । अनुपलब्धेर्योग्यता च—तर्कितप्रतियोगिसत्त्वप्रसञ्जितप्रतियोगिकत्वम् । यस्याभावो गृह्यते तस्य यः प्रतियोगी तस्य सत्त्वे नाधिकरणे तर्कितेन प्रसञ्जनयोग्यमापादनयोग्यं यत्प्रतियोग्युपलब्धिस्वरूपं यस्यानुपलम्भस्य तदनुपलब्धेर्योग्यत्वमित्यर्थः ।

अजन्यत्वात् तस्य वैयर्थ्यमाशङ्क्य परिहरति—न चेति । अभावग्राहकयोग्यानुपलब्धेरभावानुमितिस्थलेऽभावादित्याह—धर्मेति ।

षष्ठीसमासद्वयोः सम्भवादुभयत्र च दोषसद्भावाच्छङ्कते—नन्विति । कर्मधारयसमासमाश्रित्य परिहरति—योग्येति । अनुपलब्धियोग्यत्वं किमित्यपेक्षायामाह—अनुपलब्धेरिति । यद्यत्र घटः स्यादिति तर्कितेन प्रतियोगिसत्त्वेन, तर्ह्युपलभ्येतेति प्रसञ्जितघटोपलम्भलक्षणः प्रतियोगी यस्यानुपलम्भस्य तस्य योग्यत्वमित्यभिप्रेत्यैतदर्थमाह—यस्येति ।

तथा हि, स्फीतालोकवति भूतले यदि घटः स्यात्तदा घटोपलम्भः स्यादित्यापादनसम्भवात्तादृशभूतले घटाभावोऽनुपलब्धिगम्यः। अन्धकारे तु तादृशापादनासम्भवान्नानुपलब्धिगम्यता। अत एव स्तम्भे पिशाचसत्त्वे स्तम्भवत्प्रत्यक्षतापत्त्या तदभावोऽनुपलब्धिगम्यः। आत्मनि धर्मादिसत्त्वेऽप्यस्यातीन्द्रियतया निरुक्तोपलम्भापादनाऽसम्भवाद् न धर्माद्यभावस्यानुपलब्धिगम्यत्वम्।

ननूक्तरीत्याऽधिकरणेन्द्रियसन्निकर्षस्थले अभावस्यानुपलब्धिगम्यत्वमनुमतं तत्र क्लृप्तेन्द्रियमेवाभावाकारवृत्तावपि करणम्, इन्द्रियान्वयव्यतिरेकानुविधानादिति चेत्। न। तत्प्रतियोग्यनुपलब्धेरपि अभावग्रहे हेतुत्वेन क्लृप्तत्वेन करणत्वमात्रस्य कल्पनात्। इन्द्रियस्य चाभावेन समं सन्निकर्षाभावेनाभावग्रहाहेतुत्वात्। इन्द्रियान्वयव्यतिरेकयोरधिकरणज्ञानाद्युपक्षीणत्वेनान्यथासिद्धेः।

अथोदाहरणप्रत्युदाहरणाभ्यामुक्तं स्फुटयति—तथा हीति। स्फीतः—विशालः। पक्षद्वयोक्तदोषाभावमाह—अत एवेति। अत एवं भूतयोग्यानुपलब्धिसमाश्रयणादत एवेत्यर्थः।

नैयायिकः शङ्कते—नन्विति। तत्र—तादृशस्थले। क्लृप्तसम्भवेऽपूर्वकल्पनमन्याय्यं गौरवादित्यर्थः। इन्द्रियसत्त्वेऽभावज्ञाने तदभावे तदभाव इत्यन्वयव्यतिरेकयोरनुविधानात्—अनुरोधात्। नास्ति मम गौरवं प्रत्युत तवैव महद्गौरवमित्याशयेन समाधत्ते—नेति। संयुक्तविशेषणतासम्बन्धस्यातिरिक्तपदार्थान्तरत्वाच्चेत्यभिप्रेत्याह—इन्द्रियस्येति। ननु सन्निकर्षाभावप्रयुक्तहेतुत्वाभावोऽस्तु इन्द्रियान्वयव्यतिरेकबलेन तस्य कल्प्यत्वादित्यत आह—इन्द्रियेति।

नन्वु भूतले घटा नेत्याद्यभावानुभवस्थले भूतलांशे प्रत्यक्षत्वमुभयसिद्धमिति तत्र वृत्तिनिर्गमनस्यावश्यकत्वेन भूतलावच्छिन्नचैतन्यवत्तन्निष्ठघटाभावावच्छिन्नचैतन्यस्यापि प्रमात्रभिन्नतया घटाभावस्य प्रत्यक्षतैव सिद्धान्तेऽपीति चेत्। सत्यम्। अभावप्रतीतेः प्रत्यक्षत्वेऽपि तत्कर-

---

अन्यथासिद्धेः सन्निकर्षादिनैव (१)सार्थक्यात्। आदिपदेन प्रतियोगिस्मरणसंग्रहः। (२)अभावग्रहहेतुत्वेऽस्य हेतुः।

ननु भवत्सिद्धान्तेऽप्यभावप्रमायाः प्रत्यक्षत्वे समायाते कथं तत्करणमनुपलब्धिरिति शङ्कते—नन्विति। आदिपदेन स्तम्भे पिशाचो नेत्यादिसंग्रहः। तत्र-तादृशे स्थले। तन्निष्ठः भूतलनिष्ठः। अर्द्धाङ्गीकारेण परिहरति—सत्यमिति। यद्यप्यभावस्य प्रत्यक्षत्वयोग्यत्वाभावात्तच्छन्दयन्यस्वनिष्ठधर्मादिज्ञानवत्तदभावज्ञानस्य प्रत्यक्षत्वम्, प्रत्यक्षलक्षणे योग्यत्वस्यापि विषयविशेषणत्वेनोक्तत्वात्। तथाऽप्यभाव(३)प्रत्यक्षाप्रत्यक्षत्वयोर्न तयोर्योग्यायोग्यत्वे तन्त्रे, किं तु प्रतियोग्यनुपलब्धिविषयेऽयोग्यत्वे। तथा चानुपदमेवास्यार्थस्य स्पष्टीकृतत्वादभाव(४)प्रत्यक्षत्वे नाभ्युपेत्यवाद आश्रयणीय। (५)ननु तस्या

---

(१) सन्निकर्षादिनैवेति पाठः मुद्रितपुस्तकेषु दृश्यते। परन्तु सन्निकर्षादिनैव इति विश्लिष्टे पाठे सत्येवमर्थः सम्पद्यते। 'सन्निकर्षादिनैव' इत्यस्य अभावेन सह नास्तीत्यर्थः। 'सार्थक्यात्' इत्यस्य इन्द्रियान्वयव्यतिरेकयोरधिकरणेन सह सन्निकर्षादपि सार्थक्यादित्यर्थः।

(२) अभावेन सह सन्निकर्षाभावोऽत्र हेतुरिति पाठः गपुस्तके।

(३) अभावज्ञानप्रत्यक्षेत्यादि पाठः गपुस्तके।

(४) अत्रापि अभावज्ञानप्रत्यक्षेत्यादिः पाठः गपुस्तके।

(५) अभावप्रतीतेः प्रत्यक्षत्वे तत्करणस्य प्रमाणस्यापि प्रत्यक्षप्रमाणतापत्तिरिति हृदयेन शङ्कते—नन्विति।

स्यानुपलब्धेर्मानान्तरत्वात् । न हि फलीभूतज्ञानस्य प्रत्यक्षत्वे तत्करणस्य प्रत्यक्षप्रमाणतानियतत्वमस्ति, दशमस्त्वमसीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वेऽपि तत्करणस्य वाक्यस्य प्रत्यक्षप्रमाणभिन्नप्रमाणत्वाभ्युपगमात् ।

फलवैजात्यं विना कथं प्रमाणभेद इति चेत् । न । वृत्तिवैजात्यमात्रेण प्रमाणवैजात्योपपत्तेः । तथा च घटाद्यभावाकारवृत्तिर्नेन्द्रियजन्या, इन्द्रियस्य विषयेणासन्निकर्षात् । किन्तु घटानुपलब्धिरूपमानान्तरजन्या, इति भवत्यनुपलब्धेर्मानान्तरत्वम् ।

नन्वनुपलब्धिरूपमानान्तरपक्षेऽप्यभावप्रतीतेः प्रत्यक्षत्वे घटवति घटाभावभ्रमस्यापि प्रत्यक्षत्वापत्तौ तत्रानिर्वचनीयघटाभावोऽभ्युपगम्येत । न चेष्टापत्तिः, तस्य मायोपादानकत्वेऽभावत्वानुपपत्तेः, मायोपादानकत्वाभावे मायायाः सकलकार्योपादानत्वानुपपत्तिरिति चेत् । न । घटवति घटाभावभ्रमो न तत्कालोत्पन्नघटाभाव-

---

त्यक्षत्वे कथं तत्करणस्य मानान्तरत्वमिति तत्राह—न हीति ।

ननु प्रमाणभेदस्य फलभेदायत्तत्वात्कथं तं विना तस्य सिद्धिरित्याशङ्कते—फलेति । प्रत्यक्षत्वेन फलस्य साजात्येऽपि भूतलाकारवृत्तेरिन्द्रियजन्यत्वादभावाकारवृत्तेस्तदजन्यत्वाद् वृत्तिवैजात्यमात्रेण तदुपपत्तिमेवमित्याह—नेति । फलितमाह—तथा चेति ।

वृत्तिवैजात्यमात्रेण प्रमाणवैजात्ये अभावभ्रमे दोषमाशङ्कते—नन्विति । तत्रानिर्वचनीयघटाभावो नाभ्युपगम्यतेऽतो नोक्तदोष इत्याह—नेति । नन्वेवं तर्हि कथं घटाभावभ्रमस्य प्रत्यक्षत्वमित्या-

विषयक', किन्तु भूतलरूपादौ विद्यमानो लौकिको घटा
भावो भूतले आरोप्यत इत्यन्यथाख्यातिरेव । आरोप्यसन्नि
धिस्थले सर्वत्रान्यथाख्यातेरेव व्यवस्थापनात् ।

(१) अस्तु वा प्रतियोगिमति तदभावभ्रमस्थले ...
भावस्यानिर्वचनीयत्वम्, तथाऽपि तदुपादानं मायैव । न
ह्युपादानोपादेययोरत्यन्तसाजात्यम्, तन्तुपटयोरपि ...
त्वपटत्वादिना वैजात्यात् । यत्किञ्चित्साजात्यस्य माय
या अनिर्वचनीयत्वस्य घटाभावस्य च ...
विद्यमानत्वात् । अन्यथा व्यावहारिकघटाद्यभावं प्र
कथं मायोपादानमिति कुतो नाशङ्केथाः ?। न च विज
तीययोरप्युपादानोपादेयभावे ब्रह्मैव जगदुपादानं स

ब्रह्मते—किं त्विति । तद्विषयस्य सन्निहितत्वेन तत्सम्भवान्नेत्य
स्याह—भूतलेति । आदिपदेन क्रियादिग्रहः । अपसिद्धान्तम
स्याह—आरोप्येति ।

ननु घटाधिकरणभूतलरूपादिनिष्ठघटाभावादेरिन्द्रियासन्निकृष्टस
त्वयं तद्गतोऽभावोऽत्रारोप्यत ...
समाधत्ते—अस्तु वेति । प्रेक्षदूषणमुद्धरति न हीति । ननु तत्
सर्वाकारेण साजात्याभावेऽपि यत्किञ्चित्साजात्यमवश्यमभ्युपेयम्, अन्
योपादानोपादेयत्वव्याघातादित्याशङ्क्याह—यत्किञ्चिदिति । अन्
था—अभावस्य मायोपादानासम्भवे । नन्वेवं ब्रह्मण एव जगदुपा
दानत्वसम्भवात्किमर्थं माया कल्प्यत इत्याशङ्कां परिहरति—न चेति
किं ब्रह्मणो जगदुपादानत्वमनिष्टमापाद्यते ? किं वा मायायैवर्म्यनि

---

(१) आरोप्यस्य सन्निकृष्टत्वेऽन्यथाख्यातिरसन्निकृष्टत्वेऽनिर्वचनख्या
तिरि त्यानिद्दयापेक्षयाऽवश्यधत्वेनान्यथाख्यातिर्वैदा स्वीकर्तव्या इत्य
रुचेराह—अस्तु वेति ।

ध्विति वाच्यम्। प्रपञ्चविभ्रमाधिष्ठानत्वरूपेण तस्येष्टत्वात्। परिणामित्वरूपस्योपादानत्वस्य निरवयवे ब्रह्मण्यनुपपत्तेः। तथा च प्रपञ्चस्य परिणाम्युपादानं माया न ब्रह्मेति सिद्धान्त इत्यलमतिप्रसङ्गेन।

स चाभावश्चतुर्विधः—प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति। तत्र मृत्पिण्डादौ कारणे कार्यस्य घटादेरुत्पत्तेः पूर्वं योऽभावः स प्रागभावः, स च भविष्यतीति प्रतीतिविषयः। तत्रैव घटस्य मुद्गरपातानन्तरं योऽभावः स प्रध्वंसाभावः। ध्वंसस्यापि स्वाधिकरणकपालनाशे नाश एव। न चैवं घटोन्मज्जनापत्तिः, घटध्वंसध्वंसस्यापि घटप्रतियोगिकध्वंसत्वात्। अन्यथा

विवक्ष्यार्थं प्रत्याह–परिणामित्वरूपस्येति। तथा च–निरवयवे ब्रह्मणि परिणामस्यानुपपन्नत्वे।

प्रासङ्गिकं समाप्यानुपलब्धिप्रमाणविषयमभावं विभजते—स चेति। तत्र–तेषु। कार्यसमवायिकारणान्यावृत्तित्वे सति कार्योत्पत्तिपूर्वकालीनत्वं प्रागभावलक्षणमभिप्रेत्याह—मृत्पिण्डेति। तद्विषयकप्रत्ययस्वरूपमाह—स चेति। प्रागभावः। घटो भविष्यतीति प्रत्ययः घटप्रागभावं विषयीकरोति। द्वितीयं लक्षयति—तत्रैवेति। तत्र—मृत्पिण्डादौ। कार्यसमवायिकारणान्यावृत्तिप्रतियोगिजनको ध्वंसाभावः। स च विनष्ट इति प्रत्ययगोचर इत्यपि ज्ञेयम्। तस्यानन्तत्वं तार्किकमतं निरासायाह–ध्वंसस्यापीति। नाशकाभावमाशङ्क्याह–स्वेति। ननु प्रागभावध्वंसानाधारकालस्य प्रतियोगिकालत्वनियमाद् घटोन्मज्जनप्रसङ्ग इत्याशङ्क्य परिहरति—न चेति। तत्र हेतुमाह—घटध्वंसेति। घटध्वंसकालस्य घटकालत्वाभाववत्तत्प्रतियोगिकध्वंसकालस्यापि तथात्वादित्यर्थः। ननु ध्वंसजनकस्य तत्प्रतियोगित्वनियमा-

प्रागभावध्वंसात्मकघटस्य विनाशे प्रागभावोन्मज्जनापत्तिः।

(१) न चैवमपि यत्र ध्वंसाधिकरणं नित्यं तत्र कथं ध्वंसनाश इति वाच्यम्। तादृशाधिकरणं यदि चैतन्यव्यतिरिक्तं तदा तस्य नित्यत्वमसिद्धम्, ब्रह्मव्यतिरिक्तस्य सर्वस्य ब्रह्मज्ञाननिवर्त्यताया वक्ष्यमाणत्वात्। यदि च ध्वंसाधिकरणं चैतन्यं तदाऽसिद्धिः, आरोपितप्रतियोगि-

---

ध्वंसजनकस्य घटस्य तत्प्रतियोगित्वमित्याशङ्क्य घटध्वंसेऽपि नष्टो घट इति प्रतीतिसद्भावाद् घटध्वंसध्वंसस्यापि घटजन्यत्वोपचारात्प्रतियोगिकत्वमास्थेयमन्यथाऽतिप्रसङ्ग इत्याह—अन्यथेति। उक्तानङ्गीकारेण घटोन्मज्जनापत्तौ।

ननु सर्वस्यापि ध्वंसस्यानित्यत्वमुत यस्य कस्यचित्? नाद्यः, नित्याधिकरणस्य (२) नाशासिद्धया तद्वृत्तिध्वंसस्यानित्यत्वासिद्धेः। न द्वितीयः, नित्याधिकरणकध्वंससामान्यात्सर्वस्यापि निरस्ताभ्युपगमे नित्यादित्याशङ्क्य परिहरति—न चेति। तन्नित्याधिकरणमाकाशादि, किं वा चैतन्यमिति विकल्प्याद्यं प्रत्याह—तादृशेति। द्वितीयेऽपि किमारोपितं वस्तु प्रतियोगि किं वाऽनारोपितम्। नाद्यः, 'नेह नानास्ति किंचन' (क० २-१०) इत्यादिश्रुत्या प्रतीयमाननिषेधाभिधानेन सर्वस्यानारोपितत्वाभावाभिधानात्। द्वितीये तादृशध्वंसस्याधिकरणमात्रत्वात् तन्नेष्टसिद्धिरित्याशयेनाह—यदीति। असिद्धि-ध्वंसस्य चैतन्यातिरेकेण नित्यत्वासिद्धिः। तत्र पूर्वरूपा

---

(१) इदानीं घटो नष्टः, अनन्तरं घटो नष्ट इत्यादौ आकाशकालादीनां ध्वंसाधिकरणत्वं प्रतीयते तयोश्च नित्यत्वमिष्यते नैयायिकादिभिरित्याशङ्क्य निषेधति—न चेत्यादिना।

(२) नित्यस्याधिकरणस्येत्यर्थः।

ध्वंसस्याधिष्ठाने प्रतीयमानस्याधिष्ठानमात्रत्वात् । तदुक्तम्—

अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः । इति । एवं शुक्तिरूप्यविनाशोऽपीदमवच्छिन्नं चैतन्यमेव ।

यत्राधिकरणे यस्य कालत्रयेऽप्यभावः सोऽत्यन्ताभावः, यथा वायौ रूपात्यन्ताभावः । सोऽपि घटादिवद् ध्वंसप्रतियोग्येव । इदमिदं नेति प्रतीतिविषयोऽन्योन्याभावः । अयमेव विभागो भेदः पृथक्त्वं चेति व्यवह्रियते । भेदातिरिक्तविभागादौ प्रमाणाभावात् । अयं चान्योन्याभावोऽधिकरणस्य सादित्वे सादिः, यथा घटे पटभेदः । अधिकरणस्यानादित्वेऽनादिरेव, यथा जीवे ब्रह्मभेदः, ब्रह्मणि वा जीवभेदः । द्विविधोऽपि भेदो ध्वंसप्रतियोग्येव, अविद्याया निवृत्तौ तत्परतन्त्राणां निवृत्त्यवश्यम्भावात् ।

संसर्गमाह—तदुक्तमिति । उक्तन्यायं शुक्तिरूप्यनाशेऽतिदिशति—एवमिति । तथा चाधिष्ठानचैतन्यातिरिक्तध्वंसाभ्युपगमे प्रमाणाभावाद्गौरवाच्च तदसिद्धया सुतरां तन्नित्यत्वासिद्धिरिति भावः ।

तृतीयं लक्षयति—यत्रेति । असन्दिग्धमुदाहरणमाह—यथेति । तार्किकमतनिरासायाह—सोऽपीति । अत्रेदं नेति प्रत्ययविषय(१) इति शेष्यम् । चतुर्थं लक्षयति—इदमिति । तादात्म्यसंसर्गावच्छिन्नप्रतियोगिताक इत्यर्थः । विभागपृथक्त्वयोः पदार्थान्तरत्वनिरासायाह—अयमिति । एतस्य सादित्वमनादित्वं च व्यवस्थयाऽऽह—अयं चेति । ब्रह्मवन्नित्यत्वमात्रमाशङ्क्याह—द्विविधोऽपीति । अनादित्वेऽप्याविद्यकत्वादित्याह—अविद्येति ।

---

(१) अत्रेद नेति प्रत्ययविषयोऽत्यन्ताभावोऽपि ध्वंसप्रतियोगी यथेः । 'इति शेष्यम्' इति पाठो गपुस्तके प्रमादतो भ्रष्टः ।

पुनरपि भेदो द्विविधः—सोपाधिको निरुपाधिकश्चेति । तत्रोपाधिसत्ताव्याप्यसत्ताकत्वं सोपाधिकत्वं, तच्छून्यत्वं निरुपाधिकत्वम् । तत्राद्यो यथा—एकस्यैवाकाशस्य घटाद्युपाधिभेदेन भेदः । यथा वा एकस्यैव सूर्यस्य जलभाजनभेदेन भेदः । तथा च एकस्यैव ब्रह्मणोऽन्तःकरणभेदाद्भेदः । निरुपाधिकभेदो यथा घटे पटभेदः । न च ब्रह्मण्यपि प्रपञ्चभेदाभ्युपगमेऽद्वैतविरोधः । तात्त्विकभेदादेरनभ्युपगमेन वियदादिवदद्वैताव्याघातकत्वात् । प्रपञ्चस्याद्वैते ब्रह्मणि कल्पितत्वाङ्गीकारात् । यदुक्तं सुरेश्वराचार्यैः—

अस्मा भवतः केयं साधकत्वप्रकल्पने ।
किन्न पश्यसि संसारं तत्रैवाज्ञानकल्पितम् ॥

अत एव विवरणेऽविद्यानुमाने प्रागभावव्यतिरिक्त-

प्रकारान्तरेणान्योन्याभावं विभजते—पुनरिति । उपाधिसत्ताया व्याप्या सत्ता यस्य भेदस्य तस्य भावस्तत्त्वम् । यत्र यत्राकाशादिभेदसत्ता तत्र घटाद्युपाधिसत्तेति भेदोपाधिसत्तयोर्व्याप्यव्यापकभावः । ननु ब्रह्मणो जडत्वव्यावृत्तये तत्र प्रपञ्चप्रतियोगिको भेदोऽभ्युपेयस्तथा सति चाद्वैतविरोध इत्याशङ्क्याह—न चेति । यथा वियदादिष्वतात्त्विकत्वान्नाद्वैतविघातकं तद्वद्भेदोऽपीत्याह—तात्त्विकेति । ननु वियदादिप्रपञ्चस्यैव तात्त्विकत्वेन तथात्वं कथमित्यत आह—प्रपञ्चस्येति । प्रपञ्चस्य ब्रह्मणि कल्पितत्वाङ्गीकारे वार्तिककारसम्मतिमाह—तदुक्तमिति ।

नन्वभावस्य चातुर्विध्यवर्णनं सिद्धान्तानुरोधि, नृसिंहाश्रमैस्तत्त्वदीपिकायां तस्य निराकृतत्वादित्याशङ्क्य, प्राचीनैर्व्यवहृतत्वात्तत्प्रतिपादनं न सर्वथा सिद्धान्तविरुद्धमित्याशयेनाह—अत एवेति । वरो-

विशेषणम्, तत्त्वप्रदीपिकायामविद्यालक्षणे भावत्वविशेषणं च सङ्गच्छते । एवं चतुर्विधाभावानां योग्यानुपलब्ध्या

भावस्य चातुर्विध्यमत एवेत्यर्थः । तथा चानुमानं 'विवादगोचरापन्नं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकं भवितुमर्हति, अप्रकाशितार्थप्रकाशकत्वात्, अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावत्' इति । वस्तुपूर्वकमित्युक्तावात्मवस्तुपूर्वकतायाऽर्थान्तरत्वं तदर्थं वस्त्वन्तरेति । चक्षुरादिव्यावृत्त्यर्थं स्वदेशगतेति । अदृष्टादिकव्यावर्त्तनाय स्वनिवर्त्येति । उत्तरज्ञाननिवर्त्यपूर्वज्ञानव्यावृत्त्यर्थं स्वविषयावरणेति । प्रागभावव्यावृत्त्यर्थं स्वप्रागभावेति । तत्त्वप्रदीपिकायां—चित्सुखाचार्यकृतायाम् । अविद्यालक्षणे—अनादिभावरूपत्वे सति ज्ञाननिवर्त्यत्वमविद्यात्वमित्येवरूपे । उपसंहरति—एवमिति । ननु किमनुपलब्धेरभावप्रमायां करणान्तरानुपपत्त्या मानान्तरत्वमास्थीयते, अनुभवबलाद्वा ? । नाद्यः, क्लृप्तप्रमाणभावस्येन्द्रियस्यैव तत्करणत्वसम्भवात् । न चेन्द्रियाभावयोः सम्बन्धानिरूपणम्, संयुक्तविशेषणतासम्बन्धस्यैव सत्त्वात् । न चात्र प्रमाणाभावः । भूतले घटाभाव इत्याधाराधेयभावसम्बन्धप्रतीतेः (१) । घटाभावज्ञानं सम्बन्धविषयकं विशिष्टज्ञानत्वाद्दण्डीपुरुष इति ज्ञानवदित्यनुमानाच्च । अन्यथाऽभावस्य निरधिकरणत्वापत्तौ ध्वंसस्य स्वाधिकरणकपालनाशेनेत्यादिवर्णनम्, अधिकरणस्य सादित्व इत्यादिना भेदस्य द्वैविध्यनिरूपणं च विरुध्येत । स सम्बन्धः स्वरूपसम्बन्धोऽन्यो(२) वेत्यन्यदेतत् । न च (३) द्वितीयः, निर्घटभूतले

(१) प्रमाणत्वादिति शेषः । (२) संयुक्तविशेषणतासम्बन्धः ।

(३) अनुभवाद्वेति कल्पः विपरीतानुव्यवसायाच्च चेत्यर्थः । निर्घटभूतलेऽस्य घटाभावस्य भूतलविशेषणत्वेन प्रतीतेः प्रत्यक्षत्वेनैवानुव्यवसायो नानुपलब्धेरित्यर्थः ।

प्रतीतिः। तत्रानुपलब्धिर्मानान्तरम्।

पश्यामीति विपरीतानुव्यवसायात्। अन्यथा पर्वतं पश्यामि वह्नि
नुमिनोमीतिवद् भूतलाभावयोर्विलक्षणानुव्यवसायापत्तिः। किं च प्र
क्षप्रमायां प्रत्यक्षप्रमाणं करणमित्युत्सर्गः, स च बलवता बाधकेना
यते। प्रकृते चाभावज्ञानं प्रत्यक्षमेवेत्युभयसिद्धम्। तत्र प्रत्यक्षम्
मिन्द्रियमेव करणम्। बाधकाभावादिन्द्रियाभावयोः सम्बन्धस्य
साधितत्वात्। ततश्च कथमनुपलब्धिर्मानान्तरमिति चेत्, १५
न तावदिन्द्रियं तत्करणं सम्बन्धानिरूपणात्। न च संयोगादि, त
स्यासम्भवात्। न च संयुक्तविशेषणता, तत्र प्रमाणाभावात्। उक्त
प्रतीतेरनुभवस्य चाधाराधेयभावसम्बन्धसाधकतया इन्द्रियाभाव
म्बन्धासाधकत्वात्। न चोक्तमूलविरोधः, तादृशसम्बन्धाभावस्य
स्याधाराधेयभावसम्बन्धवचनपरेण ग्रन्थेन विरोधाभावात्। नन्वनु
व्यवसायविरोधः, फलीभूतं ज्ञानं प्रत्यक्षमित्युक्तत्वात्। यदपि कि
त्यादि, तदपि न। सन्निकर्षाभावस्य प्रबलतरबाधकस्य सत्त्वात्।
किं च किमभाववत्त्वं विशेषणता मात्रं सन्निकर्षः? इन्द्रियसम्बद्ध
करणविशेषणता वा? किं वा यत्राधिकरणे प्रतियोगिसत्त्वमनुपलब्धि
विरोधि स्यात्तद्विशेषणता?। नाद्यः, भित्त्यादिव्यवहितभूतलादौ
घटाद्यभावेऽपि विशेषणतामात्रस्य विद्यमानत्वेन प्रत्यक्षताऽऽपत्तेः।
न द्वितीयः, परमते कर्णशष्कुल्यवच्छिन्ननभस एव श्रोत्रेन्द्रियत्वात्
स्यैव स्वपरशब्दाभावाधिकरणतया तेन स्वस्यासन्निकर्षादधिकरणे
न्द्रियसन्निकर्षाभावेन शब्दाभावस्याप्रत्यक्षत्वप्रसङ्गात्। तृतीयेऽपि
प्रत्युपलब्धिविरोधित्वमुपलभ्यमानत्वम्। तस्य किं यदा कदाचित्
योऽपेक्षितः? उत नियमेन?। आद्ये अन्धकारेऽप्यभावाधिकरणे कदा
चिदुपलम्भसम्भवात्प्रतियोगिनस्तद्वत्प्रधानसमयेऽप्यभावः। प्रत्यक्ष

(१) एवमुक्तानां प्रमाणानां प्रामाण्यं स्वत एवोत्पद्यते ज्ञायते च। तथा हि स्मृत्यनुभवसाधारणं संवादिप्रवृत्त्य-

---

स्यात्। न द्वितीयः, श्रोत्रदेशे भूतलादौ वा शब्दस्य घटादेर्वा सत्त्वेऽपि सामान्याभावादिनाऽनुपलम्भसम्भवेन नियमेन तदुपलम्भायोगात्तत्र तदभावस्याप्रत्यक्षतापत्तेरित्यन्यत्र विस्तरः।

एवमुक्तानां प्रमाणानां कीदृशं प्रामाण्यमित्यपेक्षायामाह—**एवमिति**। ननु परतस्त्वप्रामाण्यवादिनि तार्किके जाग्रति कथमेवं वक्तुं शक्यमित्यत आह—**तथा हीति**। इच्छाद्युत्तिप्रामाण्यातिप्रसङ्गवा-

---

(१) वेदान्तनये प्रत्यक्षादीनि प्रमाणानि षट्, तैश्च षोढाः प्रमा जन्यन्ते, ज्ञानाश्च ताः प्रमा यथार्था अयथार्था वेति प्रामाण्यग्राहकेषु सन्ति विप्रतिपत्तयः। तथा हि—

प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः।

इति संशयानुपपत्तिहेतुना प्रामाण्यपरतस्त्ववादिनो नैयायिका अनुमानेन प्रामाण्यं प्रतिजानन्ति। यथा-इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वाद् व्यतिरेकेणाप्रमावद् इति। घटोऽयमिति ज्ञानानन्तरं घटमहं जानामीत्यनुव्यवसायस्य घटज्ञाननिष्ठप्रामाण्यविषयकतया स्वविषयकानुव्यवसायसामग्र्येवोक्तज्ञानस्य प्रामाण्यप्रख्यापिकेति केचित्। संविदः स्वप्रकाशत्वेन संविज्जनकसामग्र्येव संविन्निष्ठप्रामाण्यग्राहिकेति गुरवः। तत्तज्ज्ञानजन्यज्ञाततालिङ्गकानुमितिसामग्री तज्ज्ञाननिष्ठप्रामाण्यनिश्चायिका। घटो ज्ञात इति प्रतीतिसिद्धो घटसमवेत उक्तज्ञानजन्यः प्राकट्यापरपर्यायः पदार्थविशेषो ज्ञाततेति भाट्टाः। अनुमितिस्तु-इयं ज्ञातता, घटत्ववति घटत्वप्रकारकज्ञानजन्या, घटत्ववति घटत्वप्रकारकज्ञाततात्वाद् इत्येव प्रकारिकेति। सर्वेषां मतनिरासपूर्वकं स्वसिद्धान्तं दर्शयति-एवमित्यादिना। प्रमाणानामित्यस्य-प्रमीयते तत् प्रमाणमिति भावप्रत्ययान्तत्वात् प्रमाणमित्यर्थः। प्रमाणस्य भावः प्रामाण्यम्। तथा च मूलस्थस्य प्रमाणानामित्यस्य प्रमाणामिति; प्रामाण्यमित्यस्य प्रमात्वमित्यर्थौ ज्ञेयौ। प्रामाण्यस्य उत्पत्तौ स्वतस्त्वं यथा-दोषाभावसहकृतज्ञानसामान्यसामग्रीजन्यत्वम्। ज्ञप्तौ स्वतस्त्वं यथा-'दोषाभावे सति यावत्स्वाश्रयग्राहकसामग्रीग्राह्यत्वम्' इति मूल एव वक्ष्यते इति दिक्।

नुकूलं तद्वति तत्प्रकारकज्ञानत्वं प्रामाण्यम्। तच्च ज्ञानसामान्यसामग्रीप्रयोज्यं न त्वधिकं गुणमपेक्षते, प्रमामात्रेऽनुगतगुणाभावात्। नापि प्रत्यक्षप्रमायां भूयोऽवयवेन्द्रियसन्निकर्षः(१)। रूपादिप्रत्यक्षे आत्मप्रत्यक्षे च तदभावात्, सत्यपि तस्मिन् पीतः शङ्ख इति प्रत्ययस्य भ्रमत्वाच्च।

(२) अत एव न सल्लिङ्गपरामर्शादिकमप्यनुमित्यादि·

रणम्-ज्ञानत्वमिति। अग्रे तन्निरासाय-तद्वतीति। इत्थञ्चानुभवसाधारणं सत्यादिसद्भ्रमानुकूलं प्रामाण्यम्। तद्वति तत्प्रकारकज्ञानमित्यर्थः। नन्वेवम्भूते प्रामाण्ये किं स्वतस्त्वम्? न तावत्स्वोत्पत्तमानाभावादित्यत आह—तच्चेति। ज्ञानजनकसामान्यसामग्र्यतिरिक्तकारणप्रयोज्यत्वं परतस्त्वं नैयायिकाभिमतं निषेधति—न त्विति। प्रमामात्रेऽनुगतगुणसत्त्वे प्रमाणाभावादित्याह—प्रमामात्र इति। ननु प्रमामात्र इत्ययुक्तमुक्तं प्रत्यक्षप्रमायां गुणस्य सत्त्वादित्याशङ्कानिरासायाह—नापीति। तद्गुणस्यानुगमाभावादित्याह—रूपादीति। व्यतिरेकव्यभिचारमुक्त्वाऽन्वयव्यभिचारमाह—सत्यपीति।

अत एव—अन्वयव्यतिरेकव्यभिचारादेव। आदिपदं दोषव्यतिरेकसङ्ग्रहार्थम्। सत्यपि सल्लिङ्गपरामर्शे गन्धप्रागभावावच्छेदेन घटा

---

(१) गुण इति शेषः। भूयोभिरवयवैः सहेन्द्रियसन्निकर्षरूपो गुणः प्रत्यक्षत्वावच्छिन्नप्रमायां न सम्भवति। रूपस्यात्मनश्चावयवाभावेन तत्प्रत्यक्षज्ञानेऽव्याप्तेः, पीतः शङ्ख इत्यत्राऽतिव्याप्तेश्चेत्यर्थः।

(२) अन्वयव्यतिरेकव्यभिचारादेव। तत्पक्षिङ्गावच्छिन्नपक्षो गन्धप्रागभावावच्छिन्नपृथिवीत्ववानिति सल्लिङ्गपरामर्शे सत्यपि गन्धवानित्यनुमितेरभावादन्वयव्यभिचारः। वह्निमान् धूमवत्त्वादित्यादावसल्लिङ्गपरामर्शेऽपि विषयस्य सद्भावेन व्यतिरेकव्यभिचारश्चेत्यर्थः।

प्रमायां गुणः, असल्लिङ्गपरामर्शादिस्थलेऽपि विषयाबाधेन अनुमित्यादेः प्रमात्वात् । न चैवमप्रमाऽपि प्रमा स्यात्, ज्ञानसामान्यसामग्र्या अविशेषादिति वाच्यम् । दोषाभावस्यापि हेतुत्वाङ्गीकारात् । न चैवं परतस्त्वमिति वाच्यम् । आगन्तुकभावकारणापेक्षायामेव परतस्त्वात् ।

ज्ञायते च प्रामाण्यं स्वतः । स्वतोग्राह्यत्वं च दोषा-

नुमितेरप्रमात्वादन्वयव्यभिचारं मनसि निधाय व्यतिरेकव्यभिचारं दर्शयति–असल्लिङ्गेति । ननु भ्रमस्यापि तादृशसामग्रीप्रयोज्यत्वाविशेषाद् भ्रमप्रमाव्यवस्थापकं किमित्याशङ्कानिरासायाह—न चेति । प्रतिबन्धकताभावस्य कार्यमात्रं प्रति हेतुत्वेन क्लृप्ततया दोषाभावस्यापि तथात्वेनाङ्गीकारात् । न चायं गुणत्वेन हेतुः, प्रमाणाभावादित्यर्थः । अपसिद्धान्तापत्तिमाशङ्क्य निरासायाह—न चेति । अदृष्टादिसापेक्षत्वाद्-आगन्तुकेति । दोषाभावसापेक्षत्वादाह—भावेति । तथा चागन्तुकभावकारणानपेक्षज्ञानसामान्यसामग्रीप्रयोज्यत्वं स्वतस्त्वमित्यङ्गीकारेण तादृशकारणसहकृतज्ञान(१)सामान्यसामग्रीप्रयोज्यत्वरूपपरतस्त्वापातो नास्तीति भावः ।

एवं प्रामाण्यस्योत्पत्तौ स्वतस्त्वमभिधाय तस्य ज्ञप्तौ तदावेदयति–ज्ञायते चेति । तद्वति तत्प्रकारकज्ञानत्वलक्षणप्रामाण्यमुत्पन्नं सज्ज्ञायते च स्वत इत्यर्थः । ज्ञायत इत्यस्य गृह्यत इत्यर्थमभिप्रेत्याह—स्वतोग्राह्यत्वं चेति । परतस्त्ववादिनाऽनुमानादिकं तद्ग्राहकमङ्गीकृतमतस्तद्वारणाय यावदिति स्वाश्रयग्राहकविशेषणम् । यावत्स्वाश्रयग्राहकसामग्रीजन्यग्रहणगोचरत्वं तैर्नाङ्गीक्रियते इत्यर्थः । दोषवशाद-

---

(१) ज्ञानत्वप्रयोजकप्रयो० इति पाठः खपुस्तके ।

भावे सति यावत्स्वाश्रयग्राहकसामग्रीग्राह्यत्वम् । स्वाश्रयो वृत्तिज्ञानं तद्ग्राहकं (१) साक्षिज्ञानं तेनापि वृत्तिज्ञाने गृह्यमाणे तद्गतं प्रामाण्यं गृह्यते । न चैवं प्रामाण्यसंशयानुपपत्तिः, तत्र संशयानुरोधेन दोषस्यापि सत्त्वेन दोषाभावघटितस्वाश्रयग्राहकाभावेन तत्र प्रामाण्यस्यैवाग्रहात् ।

यद्वा—यावत्स्वाश्रयग्राहकग्राह्यत्वयोग्यत्वं स्वतस्त्वम् । संशयस्थले प्रामाण्यस्योक्तयोग्यतासत्त्वेऽपि दोषवशेनाग्रहाद् न संशयानुपपत्तिः । अप्रामाण्यं तु न ज्ञानसामान्यसामग्रीप्रयोज्यम्, प्रमायामप्यप्रामाण्यापत्तेः । किन्तु दोषप्रयोज्यम् (२) । नाप्यप्रामाण्यं यावत्स्वाश्रयग्राहकग्राह्यम् (३) । (४) अप्रामाण्यघटकतदभाववत्त्वादेर्वृत्ति-

---

प्रामाण्यनिश्चये संशये च सत्यव्याप्तिवारणाय-दोषाभावे सतीति । तथा च दोषवशात्तादृशसामग्र्या तद्ग्रहेऽपि न दोष इति भावः । स्वाश्रयेत्याद्युपपादयति—स्वाश्रय इति । तेनापि न त्वनुमानेनैव । सत्यन्तपदकृत्यमाशङ्क्य दर्शयति—न चेति ।

सत्यन्तमप्रदायापि दोषं परिहरति-यद्वेति । एवमुत्पत्तिज्ञप्त्योः प्रामाण्यस्य स्वतस्त्वमुपपाद्य तदप्रामाण्यस्य परतस्त्वं वर्णयति—अप्रा-

---

(१) साक्षिज्ञानमिति प्रमातृचैतन्यमित्यर्थः । तेनापि-प्रमातृचैतन्येनापीत्यर्थः । तेनापीत्यपिशब्दादनुमानेनापि गृह्यते इति सूचितम् ।

(२) इति उत्पत्तावप्रामाण्यस्य परतस्त्वमुक्तमिति बोध्यम् ।

(३) तथात्वे ज्ञप्तावप्रामाण्यस्य स्वतस्त्वं स्यादित्यर्थः ।

(४) अप्रामाण्येति । विसंवादिप्रवृत्त्यनुकूलं तदभाववति तत्प्रकारकज्ञानत्वमप्रामाण्यम् । तथा च अप्रामाण्येत्यादेरयमर्थः । साक्षिणा वृत्तिज्ञानोपनीतेनैव गृह्यते नानुपनीतम् । प्रातीतिकरजतादौ साक्षिणाऽविद्यावृत्त्या गृह्यमा-

ज्ञानाऽनुपनीतत्वेन साक्षिणा ग्रहीतुमशक्यत्वात्। किन्तु विसंवादिप्रवृत्त्यादिलिङ्गिकानुमित्यादिविषय इति परत एवाप्रामाण्यमुत्पद्यते ज्ञायते चेति।

इत्यनुपलब्धिपरिच्छेदः॥ ६॥

अथ विषयपरिच्छेदः ७

एवं निरूपितानां प्रमाणानां प्रामाण्यं द्विविधम्— व्यावहारिकतत्त्वावेदकत्वं पारमार्थिकतत्त्वावेदकत्वं चेति।

माण्यमिति। विसंवादीति। इयं शुक्तिरजतार्थिप्रवृत्तिः प्रामाण्यशून्या विसंवादिप्रवृत्तिजनकत्वादित्यादिविसंवादिप्रवृत्त्यादिलिङ्गिकानुमितिप्रायम्। आदिपदेनाप्तवचनजन्यत्वादिसङ्ग्रहः। द्वितीयम् आदिपदं शाब्दज्ञानादिसङ्ग्रहार्थम्।

इति श्रीपरमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुघनपतिसूरिसुतशिवदत्तकृतायांवे दान्तपरिभाषाऽर्थदीपिकायामनुपलब्धिपरिच्छेदः समाप्तः॥ ६॥

अथ प्रमेयं निरूपयितुमुपक्रमते—एवमिति। प्रामाण्यं-यथाभूतार्थज्ञानजनकत्वम्। तत्त्वं यथार्थत्वम्। तथा च तदेवात्र प्रतिपाद्यम्।

णेऽपि तस्याप्रामाण्यं नैव गृह्यते। कथम्? अप्रामाण्यलक्षणघटकस्य तदभाववत्त्वादेः तदानीं तथैव धृत्वा साक्षिणा गृहीतुमशक्यत्वात्। अन्यथा रजताभिमुखप्रवृत्तिर्न स्यात्। किं तर्हि। विसंवादिप्रवृत्तिलिङ्गकानुमित्यैव प्रामाण्यं गृह्यत इति।

तत्र ब्रह्मस्वरूपावगाहिप्रमाणव्यतिरिक्तानां सर्वप्रमाणानां तावित्प्रामाण्यम्, तद्विषयाणां व्यवहारदशायां बाधाभावात्। द्वितीयं तु जीवब्रह्मैक्यपराणां 'सदेव सोम्येदमग्र आसीत्' (छा० ६-२-१) इत्यादीनां 'तत्त्वमसि' (छा० ६-८-१) इत्यन्तानाम्। तद्विषयस्य जीवपरैक्यस्य कालत्रयाबाध्यत्वात्।

तच्चैक्यं तत्त्वंपदार्थज्ञानाधीनज्ञानमिति प्रथमं तत्पदार्थो लक्षणप्रमाणाभ्यां निरूप्यते। तत्र लक्षणं द्विविधम्—स्वरूपलक्षणं तटस्थलक्षणं चेति। तत्र स्वरूपमेव लक्षणं स्वरूपलक्षणम्, (१) यथा सत्यादिकं ब्रह्मस्वरूपलक्षणम्। 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै० २-१-१) 'आनन्दो ब्रह्मेति व्यजानात्' (तै० ३-६) इति श्रुतेः।

तत्प्रतिपादने पदार्थप्रतिपादनाधीनमतः पदार्थो निरूप्यत इत्याह—तच्चैक्यमिति। इति (२)इतिहेतोः। प्रथमोपात्तत्वात्प्रत्यक्षादगोचरत्वादभ्यर्हितत्वाच्चादौ तत्पदार्थो निरूप्यते इत्यर्थः। तत्र—लक्षणप्रमाणयोः। असाधारणधर्मो लक्षणम्। स्वरूपं तद्व्यावर्तकमिति मुख्यत्वात्स्वरूपलक्षणं लक्षयति—तत्रेति। तत्पदार्थलक्षणस्य प्रकृतत्वाल्लौकिकं प्रकृष्टप्रकाशश्चन्द्र इत्यनुदाहृत्य वैदिकमेवोदाहरति—यथेति। आदिपदेन ज्ञानानन्तसङ्ग्रहः। सच्चिदनन्तात्मकमेकमेव लक्षणमिति केचित्। सत्यादिकं प्रत्येकलक्षणमित्यन्ये।

(१) यथा सत्यं ज्ञानमनन्तं ब्रह्म इति। अत्र सत्यादिकं स्वरूपलक्षणम्। इति पाठः मुद्रितपुस्तके। हस्तलिखितपुस्तकेषु तु उपरिनिर्दिष्ट एव पाठः, स च समञ्जसः।

(२) इतीति। अत्र पुस्तकयोरेक इतिशब्दो दृश्यते; मुद्रितपुस्तके द्वाविति शब्दौ वर्तेते; तौ चेतरयोस्तयोरेकस्य प्रतीकार्थमपरस्य व्याख्यानार्थमिति।

ननु स्वस्य स्ववृत्तित्वाभावे कथं लक्षणत्वमिति चेत् । न । स्वस्यैव स्वापेक्षया धर्मिधर्मभावकल्पनया लक्ष्यलक्षणत्वसम्भवात् । तदुक्तम्—'आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः, अपृथक्त्वेऽपि चैतन्यात्पृथगिवावभासन्ते' इति ।

तटस्थलक्षणं तु(१) यावल्लक्ष्यकालमनवस्थितत्वे सति तद्व्यावर्तकं तदेव, यथा गन्धवत्त्वं पृथिवीलक्षणम् । महाप्रलये परमाणुषु उत्पत्तिकाले घटादिषु गन्धाभावात् । प्रकृते ब्रह्मणि(२)च जगज्जन्मादिकारणत्वम् । अत्र जगत्पदेन कार्यजातं विवक्षितम्, कारणत्वं च कर्तृत्वमतोऽविद्यादौ नातिव्याप्तिः ।

ननु असाधारणधर्मस्य लक्षणत्वात्स्वस्य च स्ववृत्तिधर्मत्वाभावात्कथं सत्यादिकं स्वरूपलक्षणमिति शङ्कते—नन्विति । धर्मे पारमार्थिकत्वविवक्षायां गौरवान्मैवमित्याह—नेति । स्वोक्ते पद्मपादाचार्यसंमतिमाह—तदुक्तमिति ।

द्वितीयं लक्षयति—तटस्थेति । स्वरूपलक्षणेऽतिप्रसङ्गनिरासाय सत्यन्तम् । लक्ष्यावृत्तितादृशधर्मेऽतिव्याप्तिनिराकरणाय-व्यावर्तकमिति । स्पष्टप्रतिपत्त्यर्थं लौकिकमप्युदाहरति-यथेति । परमतेनाह-महाप्रलय इति । उभयमतेनाह—उत्पत्तिकाल इति । प्रकृतब्रह्मणस्तत्किमित्यत आह—प्रकृते इति । मायादेरपि जगदन्तःपातित्वादाह—कार्येति । कुलालादावतिव्याप्तिवारणाय—जातमिति ।

---

(१) लक्षणं यावत्० इति पाठः खगपुस्तकयोः । लक्षणं नाम यावत्० इति पाठः घचपुस्तकयोः ।

(२) घचपुस्तकयोः 'ब्रह्मणि' इति पदं नास्ति । खगपुस्तकयोः ब्रह्मणि प्रकृते चेति पाठः ।

कर्तृत्वं च(१)तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम् । ईश्वरस्य तावदुपादानगोचरापरोक्षज्ञानसद्भावे च 'यः सर्वज्ञः-सर्वविद्यस्य ज्ञानमयं तपः । तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते' (मु० १-१-९) इत्यादिश्रुतिर्मानम् । तादृशचिकीर्षासद्भावे 'सोऽकामयत बहु स्यां प्रजायेय' (तै० २-६) इत्यादिश्रुतिर्मानम् । तादृशकृतौ च 'तन्मनोऽकुरुत' इत्यादिवाक्यम् ।

ज्ञानेच्छाकृतीनां मध्येऽन्यतमगर्भलक्षणत्रितयमिदं विव-

कार्यमात्रमित्यर्थः(२) । कारणत्वमपि प्रधानादिसाधारणमित्यत आह—कारणत्वं चेति ।

एवमपि कथं निरास इत्यत आह-कर्तृत्वं चेति । अत्र प्रमाणाकाङ्क्षायामाह-ईश्वरस्येति । सर्वज्ञः-सामान्यतः सर्वविद्विशेषतः । ब्रह्म कार्यं ब्रह्म हिरण्यगर्भः, नाम घट इत्यादि, रूपं शुक्लादि, अन्नं व्रीहियवादि । 'यः कालकालो गुणी सर्वविद्यः' इत्यादिषु विदादिपदार्थः। यस्मादाकाशादिः(३) । स आत्मा कामितवानिच्छां कृतवान् बहुधा भवेयम्' इति । कथमेकस्य बहुधा भवनमित्यत आह—प्रजायेयेति । उत्पद्येय । तदैक्षत इत्याद्या श्रुतिरादिनोपादेया । (४) तद् मनः । स प्राणमसृजत इत्याद्या श्रुतिरादिनोपादेया ।

त्रितयमिति । तत्र उपादानगोचरापरोक्षज्ञानवत्त्वं तादृशचिकी-

---

(१) तत्तदिति । तथा घटपटादिकार्याणामुपादानकारणानि कपालतन्त्वादीनि तद्गोचर-मपरोक्षज्ञानं-चिकीर्षा-कृति-श्चास्ति यस्य तस्य भावस्तत्त्वम् । कुलालादिषु लक्षणसमन्वयः । अस्ति कुलाले घटोपादानकपालविषयकमपरोक्षज्ञानम्, घटं करिष्यामीति चिकीर्षा कपालद्वयसंयोजिका कृतिश्चेति ।

(२) तथा च घटादिमात्रजनकेषु कुलालादिषु यावत्कार्यजनकत्वाभावेन नातिव्याप्तिरित्यर्थः ।　　(३) जायते इति शेषः ।

(४) 'तन्मनोऽकुरुत' इत्यस्य वाक्यस्य तत्पदस्यार्थमाह टीकाकारः-तद्मन ।

त्तत्वम्, अन्यथा व्यर्थविशेषणत्वापत्तेः। अत एव जन्मस्थितिध्वंसानामन्यतमस्यैव लक्षणे प्रवेशः। एवं च प्रकृते लक्षणानि नैव सम्पद्यन्ते। ब्रह्मणो जगज्जन्मादिकारणत्वे च—'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति' (तै० ३-१) इत्यादिश्रुतिर्मानम्।

यद्वा—निखिलजगदुपादानत्वं ब्रह्मणो लक्षणम्। उपा-

र्षावत्त्वं तादृशकृतिमत्त्वमित्येवमित्यर्थः। एकमेव लक्षणं कुतो नेत्यत आह-अन्यथेति। लक्षणत्रितयाऽविवक्षणे इत्यर्थः। यत एकलक्षणविवक्षणे विशेषणवैयर्थ्यमतो विशेषणवैयर्थ्यादेव जन्माद्यन्यतमस्यैव लक्षणे प्रवेश इत्याह—**अत एवेति**। फलितमाह-**एवं चेति**। कार्यजातजन्मगोचरापरोक्षज्ञानवत्त्वम्, तत्स्थितिविषयतद्वत्त्वम्, तल्लयगोचरतद्वत्त्वम्, समस्तकार्यगोचरचिकीर्षाऽऽश्रयत्वम्, तत्स्थितिविषयचिकीर्षावत्त्वम्, तल्लयगोचरचिकीर्षास्पदत्वम्, कार्यमानजन्मगोचरकृतिमत्त्वम्, तत्स्थितिविषयककृत्याश्रयत्वम्, तल्लयगोचरकृत्यास्पदत्वमित्येवंरूपाणीत्यर्थः। ब्रह्मणो जगज्जन्मादिहेतुत्वेऽपि प्रमाणाकाङ्क्षायामाह—**ब्रह्मण इति**। **प्रयन्ति**-प्रलयं गच्छन्ति सन्ति यत्प्रविशन्ति। 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यान्ति' (छा० १-९-१) इत्याद्या श्रुतिरादिनोपादेया।

ननु त्रिभिरस्योपादानत्वसूचनादेकैकस्य लक्षणप्रवेशे (१) तन्न सिद्धयतीत्यरुच्याऽऽह—**यद्वेति**। उपादानं च यदभिन्नं कार्यमुत्पद्यते तत् (२)। तदभेदश्च पृथक्सत्ताराहित्यं तच्चाविद्याब्रह्मणोः समानं ब्रह्मण्यस्यस्य पृथक्सत्ताराहित्यादित्याशयेनाह-**उपादानत्वं चेति**। तथा च कल्पितविकारसम्बन्धस्य वास्तवनिर्विकारत्वाविरोधादुपादान-

---

(१) तद् उपादानत्व न सिद्ध्यतीत्यर्थः। (२) तदितिपदं कखपुस्तकयोर्नास्ति।

दानत्वं च जगदध्यासाधिष्ठानत्वम्, जगदाकारेण विपरिणममानमायाऽधिष्ठानत्वं वा। एतादृशमेवोपादनत्वमभिप्रेत्य 'इदं सर्वं यदयमात्मा' 'सच्च त्यच्चाभवत्' (तै० २-६) 'बहुस्यां प्रजायेय' (तै० २-६) इत्यादिश्रुतिषु

त्वेऽपि विकारशून्यत्वं ब्रह्मण इति भावः। विपरिणममानमेवोपादानमिति यथाप्रहस्तर्हि तस्योपादानं माया, तथाऽपि स्वाधिष्ठानं ब्रह्म विना तस्यास्तथात्वाभावात्तदधिष्ठानस्याप्युच्यमानमुपादानत्वमविरुद्धमिति तथाभूतमायाऽधिष्ठानत्वमेव लक्षणमस्त्वित्याशयेनाह—जगदाकारेणेति। न च जगतो मायापरिणामत्वे मानाभावः। 'मायां तु प्रकृतिं विद्याद्' (श्वे० ४-१०) 'मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्' (भ० गी० ९-१०) जगन्मायापरिणामरूपं कार्यत्वाच्छुक्तिरूप्यवदिति प्रमाणत्स्यात्। न च बाध्यत्वमुपाधिः, साधनव्यापकत्वात्। यद्वा, जगज्जडोपादानकं कार्यत्वात्संमतवत्। तच्चैकं(१) लाघवात्। (२)तदपि श्रुतिस्मृतिप्रामाण्यात्परिशेषादज्ञानम्। माया अविद्या अज्ञानमित्यनर्थान्तरम्। ननु श्रुतिषु जगद्ब्रह्मणोस्तादात्म्यव्यपदेशाज्जगदाकारेण विपरिणममानत्वमुपादानत्वमित्येव तल्लक्षणं कुतो नाङ्गीक्रियत इत्यत आह—चेतनस्य जडाकारेण परिणामायोगात् कूटस्थनित्यत्वश्रुतिविरोधाच्चोपादानत्वाभिप्रायेणैव तासु तथा व्यपदेश इत्याह—एतादृशमेवेति। यदिदं सर्वं हिरण्यगर्भादिस्तम्बपर्यन्तं तदयमात्मेति यथौरः स स्थाणुरितिवत्तादात्म्यव्यपदेशः। सद्—मूर्तं पृथ्व्यादिभूतत्रयम्। त्यद्—अमूर्तं वाय्वाकाशौ। तद्रूपममवदिति(३)शुक्तिः रूप्यमभ-

---

(१) तच्च उपादानमेकमित्यर्थः। (२) तदपि उपादानमपीत्यर्थः।

(३) पुस्तके तद्रूपममवदित्यर्थं इत्येव पाठः। अत्र शुक्तिः रूप्यमभवदिति निदर्शनप्रदर्शनपरः पाठः क्लिष्टः।

ब्रह्मप्रपञ्चयोस्तादात्म्यव्यपदेशः । घटः सन् घटो भाति घट इष्ट इत्यादिलौकिकव्यपदेशोऽपि सच्चिदानन्दरूपब्रह्मैक्याध्यासात् ।

नन्वानन्दात्मकचिदध्यासाद् घटादेरिष्टत्वव्यवहारे दुःखेऽपि तत्राध्यासात्तत्रापि इष्टत्वव्यवहारापत्तिरिति चेत् । न । आरोपे सति निमित्तानुसरणं, न तु निमित्तमस्तीत्यारोप इत्यभ्युपगमेन दुःखादौ सच्चिदंशाध्यासेऽप्यानन्दांशाध्यासाभावात् । जगति नामरूपांशद्वयव्यवहारस्तु अविद्यापरिणामात्मकनामरूपसम्बन्धात् ।

दितिवत् । बहुस्यां (१)बहुतादात्म्यवान्भवेयम् , स्वप्नद्रष्टुः स्वाप्नपदार्थतादात्म्यवदिति विवेकः । आदिपदेन 'सर्वं खल्विदं ब्रह्म,(छा० ३-१४-१) 'ऐतदात्म्यमिदं सर्वम्' (छा० ६-८-७) इत्याद्याः श्रुतय उपादेयाः । एवं लौकिकोऽपि तादात्म्यव्यपदेशोऽध्यासकृत एवेत्याह—घटः सन्निति ।

अतिप्रसङ्गं शङ्कते—नन्विति । घटादिष्विष्टत्वव्यवहारदर्शनादानन्दाध्यासस्तत्र वर्ण्यते तददर्शनान्न दुःखे आनन्दांशाध्यास (२) इत्याह—नेति । आदिपदं दुःखसाधनपरम् । सच्चिदंशाध्यासेऽपि-(३) तत्तादात्म्याध्यासेऽपि । एवमग्रेऽपि । एवं प्रपञ्चे नामरूपव्यवहारः किंकृत इत्यत आह—जगतीति । स्वोक्तेऽभियुक्तवाक्य-

---

(१) अत्र कखपुस्तकयोः बहुस्यां बहुतादात्म्य स्वाप्न० इति पाठः । गपुस्तके-भवेय स्वाप्न० इति पाठश्च । तयोरनुपपन्नतामालोच्यैषोऽस्माभिः धरितः ।

(२) आनन्दाध्यास इति कखपुस्तकयोर्नास्ति ।

(३) सच्चिदंशाध्यासः तत्तादात्म्याध्यासः इति पाठः कपुस्तके । सच्चिदंशाध्यासेन तत्तादात्म्याध्यास इति पाठः खपुस्तके तयोः खपुस्तकीयः क्लिष्टः ।

तदुक्तम्—

अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्।

आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्॥ इति।

अथ जगतो जन्मक्रमो निरूप्यते—तत्र सर्गादिकाले परमेश्वरः सृज्यमानप्रपञ्चवैचित्र्यहेतुप्राणिकर्मसहकृतोऽपरिमितानिरूपितशक्तिविशेषविशिष्टमायासहितः सन्नामरूपात्मकनिखिलप्रपञ्चं प्रथमं बुद्धावाकलय्येदं करिष्यामीति सङ्कल्पयति 'तदैक्षत बहु स्यां प्रजायेय' (छा० ६-२-३) इति 'सोऽकामयत बहु स्यां प्रजायेय' (तै० २-६) इत्यादिश्रुतेः। तत आकाशादीनि पञ्चभूतानि अप-

संवादयति—तदुक्तमिति।

एवं स्वरूपतटस्थलक्षणाभ्यां तत्पदार्थं लक्षयित्वा जगदुत्पत्तिनिरूपणं प्रतिजानीते—अथेति। आकलय्येदम्—इत्यभिसन्धाय। परमेश्वरे वैषम्यनिरासार्थमुक्तं सृज्यमानेति। ननु तस्य कूटस्थस्य कथं तत्र सङ्कल्पादिकमित्याशङ्क्याह इत्यर्थमुक्तम्—अपरिमितेत्यादि। प्रमाणमाह—तदिति। 'तन्मनोऽकुरुत' इत्यादिश्रुतेरपि सङ्कल्पस्य। ततः—ईक्षणसङ्कल्पप्रयत्नानन्तरम्। (१)वियदधिकरणं मनसि निधायाह आकाशादीनीति। तथा च श्रुतिः 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः आकाशाद्वायुर्वायोरग्निरग्नेरापः अद्भ्यः पृथिवी' (तै० २-१) इति। अपञ्चीकृतभूतानामेव पुराणादिषु तन्मात्रपदप्रतिपाद-

(१) वियदिति। आकाशस्य नित्यत्वमभिमन्यन्ते, ततः कुतो जन्म व्यवस्थाप्यते स्वकपोलकल्पितं मन्यत इति शङ्कायां [illegible] वर्णितं ग्रन्थकार इत्याह वियदिति। 'न वियदश्रुतेः' (ब्र० सू० २-३-१) इत्यधिकरणमित्यर्थः।

श्चीकृतानि (१)तन्मात्रपदप्रतिपाद्यानि उत्पद्यन्ते। (२)तत्राकाशस्य शब्दो गुणः। वायोस्तु शब्दस्पर्शौ। तेजसस्तु शब्दस्पर्शरूपाणि। अपां तु शब्दस्पर्शरूपरसाः। पृथिव्यास्तु शब्दस्पर्शरूपरसगन्धाः।

न च शब्दस्याकाशमात्रगुणत्वम्, वाय्वादावपि तदुपलम्भात्। न चासौ भ्रमः, (३)बाधकाभावात्। इमानि भूतानि त्रिगुणमायाकार्याणि त्रिगुणानि। गुणास्सत्त्वर-

---

इत्याशयेनाह—तन्मात्रेति। पञ्चीकृतभूतेषु शब्दादिगुणोपलब्धेरपञ्चीकृतेष्वप्यनुमानसिद्धान् तानाह—तत्रेति। अपञ्चीकृताकाशादिभूतेषु।

नैयायिकमतं निरस्यति—न चेति। पञ्चीकृतवाय्वादौ तदुपलम्भादपञ्चीकृतवाय्वादावपि तदुपलम्भ इति भावः। ननु जलादावपि गन्धोपलम्भात्कथं तस्य पृथिवीमात्रगुणत्वमिति चेन्न। तस्य पञ्चीकृतपृथिव्यंशसम्बन्धकृतत्वेन जलादेः पृथिव्यवयवत्वेन बाधकसद्भावेन च भ्रमत्वात्। एतेषां त्रिगुणात्मकत्वेऽपि सत्त्वगुणप्रधानेभ्य एभ्यो यद्‌-

---

(१) तन्मात्रेति। शब्दतन्मात्र-स्पर्शतन्मात्र-रूपतन्मात्र-रसतन्मात्र-गन्धतन्मात्राणीत्यर्थः। इमानि सूक्ष्मभूतानि-अपञ्चीकृतपञ्चभूतानि-तन्मात्राणीत्यादिशब्दैर्व्यपदिश्यन्ते। तज्जानां श्रोत्रादीनामिन्द्रियाणां प्राणादीनां वायूनाञ्चातीन्द्रियत्वात्तत्कारणानामपि भूतानां सूक्ष्मत्वं युक्तमेव। अत एव लिङ्गशरीरस्य नाध्यक्षमिति।

(२) तत्रेति। तेष्वपञ्चीकृतेष्वित्यर्थः। आकाशस्य शब्दो गुण इत्यादि। ननु तन्मात्राणां सूक्ष्मत्वेनानुपलभ्यमानत्वे किमर्थं तत्र गुणा अङ्गीक्रियन्त इति चेन्न। तज्जेषु स्थूलभूतेषु गुणोपलब्धेरकारणकत्वप्रसङ्गात् तत्कारणेष्ववश्य गुणानामङ्गीकार्यत्वादिति।

(३) लौकिकभ्रमस्य संसारदशायां बाधावश्यम्भावेन वाय्वादिशब्दस्य बाधाभावान्न भ्रमत्वमिति।

जलमांसि । एतैश्च सत्त्वगुणोपेतैः पञ्चभूतैर्व्यस्तैः पृथक् क्रमेण श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानि पञ्चज्ञानेन्द्रियाणि जायन्ते । एतेभ्यः पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्यो मनोबुद्ध्यहङ्कारचित्तानि जायन्ते । श्रोत्रादीनां पञ्चानां क्रमेण दिग्वातार्कवरुणाश्विनोऽधिष्ठातृदेवताः । मन आदीनां चतुर्णां क्रमेण चन्द्रचतुर्मुखशङ्कराच्युता अधिष्ठातृदेवताः ।

एतैरेव रजोगुणोपेतैः पञ्चभूतैर्व्यस्तैर्यथाक्रमं वाक्पाणिपादपायूपस्थाख्यानि कर्मेन्द्रियाणि जायन्ते । तेषु च क्रमेण वह्नीन्द्रोपेन्द्रमृत्युप्रजापतयोऽधिष्ठातृदेवताः रजोगुणोपेतपञ्चभूतैरेव मिलितैः पञ्च वायवः प्राणापानव्यानोदानसमानाख्या जायन्ते । तत्र प्राग्गमनवान् वायुः प्राणः नासादिस्थानवर्ती । अर्वाग्गमनवानपानः, पाय्वा-

---

स्यपते तदाह—एतेश्चेति । एतैः—अपञ्चीकृतैः । मनसः स्थानं गलान्तरं बुद्धेर्वदनम् अहङ्कारस्य हृदयं चित्तस्य नाभिरिति शारीरकेऽपि यदि मनआदिगोलकान्युक्तानि । दिग्वातार्कप्रचेतोश्वीति भागवतमनुसृत्याह—श्रोत्रादीनामिति । यद्यपि सुबालोपनिषदि घ्राणस्य पृथिवी देवतोक्ता, तथाऽपि पृथिव्यभिमानिन्या देवताया अश्विनस्तदधिष्ठातृत्वादविरोधः ।

रजःप्रधानानामेषां कार्यमाह—एतैरेवेति । तेषु पञ्चवायुषु प्राणं लक्षयति—प्रागिति । सर्वदोर्ध्वगतिमानित्यर्थः । तेनेश्वरान्तिकमेव उदानस्योर्ध्वगतिमत्त्वेऽपि नातिप्रसङ्गः । 'वायुः प्राणो भूत्वा नासिके प्राविशत्' (ऐ० २—४) इत्यैतरेयश्रुतिमनुसृत्याह—नासादि-ति । नास्यादिनासिकापर्यन्तानि स्थानान्यादिपदार्थः । अपानं लक्षयति—अर्वागिति । अपागमनवान् । नाभ्यादिपायुपर्यन्तस्थाना

दिस्थानवर्ती । विष्वग्गतिमान् व्यानः, अखिलशरीरवर्ती । ऊर्ध्वगमनवानुत्क्रमणवायुरुदानः, कण्ठस्थानवर्ती । अशितपीतान्नादिसमीकरणकरः समानः, नाभिस्थानवर्ती । तैरेव तमोगुणोपेतैरपञ्चीकृतभूतैः पञ्चीकृतानि जायन्ते । 'तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' (छा० ६-३-३) इति श्रुतेः (१)पञ्चीकरणोपलक्षणार्थत्वात् ।

ण्यादिशब्दार्थः । तथा चैतरेयश्रुतिः 'मृत्युरपानो भूत्वा नाभिं प्राविशत्' (ऐ० २-४) इति । व्यानं लक्षयति—विष्वगिति । विष्वग्गमनवान्सर्वतो गमनवान् । उदानलक्षणमाह—ऊर्ध्वमिति । शरीरेऽतिप्रसङ्गमाशङ्क्याह—उत्क्रमणेति । लोकान्तरयानकाल ऊर्ध्वगमनवानित्यर्थः । 'अथैकयोर्ध्व उदानः पुण्येन पुण्यं लोकं नयति' (प्र० ३-७) इत्यादिप्रश्नोपनिषद्वाक्यमत्र प्रमाणम् । यद्वा, यत् पीताशितपानीयान्नाद्युद्गारक्रियोत्क्रमणं तद्धेतुस्तदर्थमूर्ध्वगमनवानित्यर्थः । समानं लक्षयति—अशितेति । अस्य सकलशरीरवर्तित्वेऽपि मुख्यस्थानमाह—नाभीति । प्राणादीनां लक्षणान्युक्तानि मैत्रेयोपनिषदि—'अथ योऽयमूर्ध्वमुत्क्रामति एष वाव स प्राणः योऽयमवाचं संक्रामति येनैताः शिरा अनुव्याप्ता योऽयं पीतमशितमुद्गिरति योऽयं स्वशितमन्नं धातुमपाने स्थापयति अणिष्ठं चाङ्गे समानयति' इति । तमोगुणप्रधानानामेषां कार्यमाह—तैरेवेति । ननु त्रिवृत्करणस्य श्रुतिमूलकत्वात्त्रिवृत्कृतभूतानीति वक्तव्ये पञ्चीकृतभूतानीति श्रुतिविरुद्धमित्यत आह—तासामिति । तेजोऽबन्नरूपाणां मध्ये एकं तेजोभूतं द्विधा विभज्य तयोरेकं पुनर्द्विधा विभज्य तयोरंशयोरबन्नयोः संयोजनम् । तथा जलं द्विधा विभज्य तयोरेकं भागं पुनर्द्विधा विभज्य तयोरंशयोस्तेजःपृथिव्योः संयोजनम् । एवं पृथिवीं द्विधा विभज्य तयो-

---

(१) ख०पुस्तकयोः पञ्चीकृतोपलक्षणेति पाठः ।

पञ्चीकरणप्रकारश्चेत्थम्—आकाशमादौ द्विधा विभज्य तयोरेकं भागं पुनश्चतुर्धा विभज्य तेषां चतुर्णामंशानां वाय्वादिषु चतुर्षु भूतेषु(१) संयोजनम् । एवं वायुं द्विधा विभज्य तयोरेकं भागं पुनः (२)चतुर्धा विभज्य तेषां चतुर्णामंशानामाकाशादिषु संयोजनम् । एवं तेज आदीनामपि । तदेवमेकैकभूतस्यार्द्धं स्वांशात्मकमर्द्धान्तरं चतुर्विधभूतमयमिति पृथिव्यादिषु स्वांशाधिक्यात्पृथिव्यादिव्यवहारः । तदुक्तम्—

'वैशेष्यात्तु तद्वादस्तद्वादः' (ब्र० सू० २-४-२३) इति ।

रेकं भागं पुनर्द्विधा विभज्य तयोरंशयोर्जलनभसोः संयोजनमिति 'त्रिवृतं त्रिवृतमेकैकां करवाणि' इति श्रुतेरिति । यद्यपि छान्दोग्ये त्रिवृत्करणमुक्तम्, तथाऽपि तद्वाक्यस्योक्तभूतपञ्चोत्पत्त्यनुसारित्वात्तस्याश्च पञ्चभूतोत्पत्तिपरत्वेन सूत्रकारैः सिद्धान्तितत्वात्त्रिवृत्करणस्यापि पञ्चीकरणोपलक्षणार्थत्वं न्याय्यमिति भावः ।

ननु पञ्चानामपि पञ्चात्मकत्वे कथं पृथिवीदमिदं जलमित्यादिव्यपदेश इत्याशङ्क्याह—पृथिव्यादिष्विति । अत्र द्वितीयाध्यायान्तर्गतं भगवतो व्यासस्य सूत्रं प्रमाणमित्याह—तदुक्तमिति ।

---

(१) चतुर्षु भूतेष्विति । द्विधा विभक्तेषु भूतेषु एकस्मिन्नविभक्तभागे अन्यांशस्य संयोजनं न तु विभक्ते इत्यूहनीयम् । तथा चैव पञ्चीकरणप्रकारः आकाशादीनि पञ्चभूतानि द्विधा विभजेत्, तेषामेकैकं भागं तदवस्थं स्थित्वा अपरपञ्चभागान् प्रत्येकं चतुर्धा विभजेत्, विभक्तस्याकाशार्धस्य चतुरोंऽशान् आकाशान्यनिरिक्तभूतानामविभक्तार्धभागे योजयेत् । एवं वाय्वादिषु । तथा च चत्वारो वाय्वादीनामंशा यावन्मिलन्त्यावन्मिन एक आकाशांशः, तेषु मिलितेषु सत्सु पञ्चीकृत आकाश इति । एवं वाय्वादिष्वपि देयमिति ।

(२) रामपुस्तकयोः पुनः शब्दो नास्ति ।

पूर्वोक्तैरपञ्चीकृतैर्लिङ्गशरीरं परलोकयात्रानिर्वाहकं मोक्षपर्यन्त स्थायि मनोबुद्धिभ्यामुपेतं ज्ञानेन्द्रियपञ्चकर्मेन्द्रियपञ्चकप्राणादिपञ्चकसंयुक्तं जायते ।

तदुक्तम्—

पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् ।

अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम् ॥ १ ॥ इति ।

तच्च द्विविधं—परमपरं च । तत्र परं हिरण्यगर्भलिङ्गशरीरम्, अपरमस्मदादिलिङ्गशरीरम् । तत्र हिरण्यगर्भे-

---

तुशब्दः शङ्कानिरासार्थः । विशेषस्य भावो वैशेष्यम्, तस्मात्स्वभागस्य भूयस्त्वात्तद्वादः पृथिवीयमिदं जलमित्यादिव्यपदेशः । तद्वादपदाभ्यासोऽध्यायसमाप्तिसूचनार्थः । एतेन पञ्चीकरणं सम्प्रदायाप्रसिद्धमपि नादरणीयं तन्मूलभूतश्रुतिसूत्रयोरभावात्, अन्यथा गगनपवनयोश्चाक्षुषत्वापत्तेरिति प्रत्युक्तम् । श्रुतिसूत्रयोरुपलक्षणार्थत्वादन्यथा पुराणवाक्यानां निरालम्बनाभावातादपञ्चीकृतेतरभूतगुणानामितरस्मिन्पञ्चीकृतेऽप्यनुपलब्धेः । तथा च यथा पञ्चीकृततेज आदावपञ्चीकृतस्वगुणानामेव भानं न त्वपञ्चीकृतस्वेतरगुणानां तथाऽऽकाशवाय्वोरपीति सर्वथा सम्प्रदायसिद्धं पञ्चीकरणमादरणीयमिति भावः ।

तेषामेव गुणत्रयोपेतानां मन आदिसमुदायात्मकं लिङ्गशरीरं कार्यमित्याह—पूर्वोक्तैरिति । ननूपलभ्यमानस्थूलशरीरेणैव समस्तकार्यनिर्वाहात्किमर्थकमेतदित्यत आह—परलोकेति । तस्य मोक्षेऽप्यभावाभावमाशङ्क्याह—मोक्षेति । 'आत्यन्तिकप्रलयपर्यन्तं स्थायीत्यर्थः । तेषां समुदायः शरीरमित्यादिमैत्रेयश्रुतिमूलकमभियुक्तवाक्यमत्र प्रमाणमित्याह—तदुक्तमिति । सूक्ष्माङ्गं—सूक्ष्मशरीरम् । तत्र महाप्रलयपर्यन्तस्थायित्वादाद्यं परं, देहमात्रव्यापित्वाद् द्वितीयमपरमित्याशयेनाह—तच्चेति ।

लिङ्गशरीरं महत्तत्त्वम्, अस्मदादिलिङ्गशरीरमहङ्कार इत्याख्यायते।

एवं तमोगुणयुक्तेभ्यः पञ्चीकृतभूतेभ्यो भूम्यन्तरिक्षस्वर्महर्जनस्तपः सत्यात्मकस्योर्ध्वलोकसप्तकस्य अतलवितलसुतलतलातलरसातलमहातलपातालाख्याधोलोकसप्तकस्य ब्रह्माण्डस्य जरायुजाण्डजस्वेदजोद्भिज्जाख्यचतुर्विधस्थूलशरीराणामुत्पत्तिः। तत्र जरायुजानि जरायुभ्यो जातानि, मनुष्यपश्वादिशरीराणि। अण्डजानि अण्डेभ्यो जातानि, पक्षिपन्नगादि शरीराणि। स्वेदजानि स्वेदाज्जातानि, यूकामशकादीनि। उद्भिज्जानि भूमिमुद्भिद्य जातानि, वृक्षादीनि। वृक्षादीनामपि पापफलभोगायतनत्वेन शरीरत्वम्।

तत्र परमेश्वरस्य पञ्चतन्मात्राद्युत्पत्तौ सप्तदशावयवोपेतलिङ्गशरीरोत्पत्तौ हिरण्यगर्भस्थूलशरीरोत्पत्तौ च

सुबालश्रुतौ संन्यासविधावप्यारण्यकश्रुतौ च चतुर्दशभुवनात्मकब्रह्माण्डोत्पत्तिरभिहिता तदनुसृत्याह—एवमिति। 'शरीरजैः कर्मदोषैर्याति स्थावरतां नरः' इत्यादिवचनमनुसृत्याह—वृक्षादीनामिति।

नन्वशरीरस्य परमात्मनः शरीरसाम्यब्राह्मणादिकार्यं प्रति कथं हेतुत्वमित्याशङ्क्य तत्र परम्परयेति दर्शयति—तत्रेति। (१)कार्यकल्पे। लिङ्गशरीरस्य द्विविधस्य 'यो ब्रह्माणं विदधाति पूर्वम्' (श्वे० ६-१८) इत्यादिश्रुतिर्हिरण्यगर्भस्य च (२)साक्षात् ब्रह्मकार्यत्वे

(१) कार्यैकदेशलिङ्गशरीरेतिपाठः गपुस्तके।

(२) चकारश्चो नास्त्यन्येषु पुस्तकेषु। श्रुतिः लिङ्गशरीरस्य हिरण्यगर्भस्य च साक्षाद् ब्रह्मकार्यत्वे प्रमाणमित्यन्वयः।

साक्षात्कर्तृत्वम् । इतरनिखिलप्रपञ्चोत्पत्तौ हिरण्यगर्भादिद्वारा,—'हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' (छा० ६-३-२) इति श्रुतेः। हिरण्यगर्भो नाम मूर्तित्रयादन्यः प्रथमो जीवः।

स वै शरीरी प्रथमः स वै पुरुष उच्यते ।
आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्तत ॥ १ ॥

'हिरण्यगर्भः समवर्त्ततागे भूतस्य' (यजु० १३-४ ऋ० स० १०-१२०-१) इत्यादिश्रुतेः। एवं भूतभौतिकसृष्टिर्निरूपिता। इदानीं प्रलयो निरूप्यते ।

प्रलयो नाम त्रैलोक्यनाशः, स च चतुर्विधः—नित्यः प्राकृतो नैमित्तिक आत्यन्तिकश्चेति। तत्र नित्यः—प्रलयः

प्रमाणम्। आदिपदं मरीच्यादिसङ्ग्राहकम् । हिरण्यगर्भादिद्वारा परेशस्य कर्तृत्वे श्रुतिं प्रमाणयति–हन्तेति। देवताः–तेजोऽबन्नरूपाः। ननु हिरण्यगर्भस्य परेशमूर्तित्रयान्तर्गतत्वेन कथं जीवत्वमित्याशङ्क्याह—हिरण्यगर्भ इति। अत्र प्रमाणमाह—स इति। शरीरीति श्रुत्या तस्य जीवत्वावधारणान्मूर्तित्रयान्यत्वे श्रुतिः प्रमाणमिति भावः। 'ब्रह्मा देवानां प्रथमं सम्बभूव' (मु० १-१) इत्याद्या श्रुतिरादिपदादादेया। सृष्टिप्रतिपादनोपसंहारपूर्वकं प्रलयनिरूपणं प्रतिजानीते—एवमिति।

भूलोकेऽधोलोकानामन्तर्भावः स्वर्लोके तदुपरिष्ठानामिति त्रिलोकीपक्षे स प्रलयः नित्यादिभेदेन त्रिविधः। चतुर्दशलोकीपक्षे स नैमित्तिक इत्येव । तस्य चातुर्विध्यमभिप्रेत्याह—स चेति । प्रलयो नाम विनाश इति पाठः स्पष्टः । तन्नाशं लक्षयति—तत्रेति। नित्यः

---

* * एतच्चिह्नमध्यगतस्य पाठस्य मूलेन सङ्गतिर्न दृश्यते। यथा कथञ्चिदस्यायमर्थः—त्रिलोकीपक्षे नैमित्तिकप्राकृतयोरेकीकरणेन प्रलयः त्रिविधः। चतुर्दशभुवनानीतिपक्षे त्रिलोकीव्यतिरिक्तानां कार्यब्रह्मदिवसावसाननिमित्तो लयो भवतीति नैमित्तिकस्यातिरिक्तत्वमिति ।

सुषुप्तिः, तस्याः सकलकार्यप्रलयरूपत्वात्। धर्माधर्मपूर्वसंस्काराणां च तदा कारणात्मनाऽवस्थानम्। तेन सुषुप्तोत्थितस्य न सुखदुःखाद्यनुभवानुपपत्तिः। न वा स्मरणानुपपत्तिः। न च सुषुप्तावन्तःकरणस्य विनाशे तदधीनप्राणादिक्रियाऽनुपपत्तिः। (१)वस्तुतः श्वासाद्यभावेऽपि तदुपलब्धेः पुरुषान्तरविभ्रममात्रत्वात् सुप्तशरीरोपलम्भवत्।

न चैवं सुप्तस्य परेतादविशेषः। सुप्तस्य हि लिङ्गशरीरं संस्कारात्मनाऽत्रैव वर्तते, परेतस्य तु लोकान्तरे

प्रलयः प्रतिदिनं प्रविलयः। 'सुषुप्तिकाले सकले विलीने' (कै० १-१३) इति कैवल्यश्रुतिमनुसृत्याह—तस्या इति। नन्वेवं तर्हि सुखादिहेतोः धर्मादेः स्मृतिहेतोः संस्कारस्य च तदानीं प्रविलयादुत्थितस्य कथं सुखादिभेदभोगः पूर्वपदार्थस्मरणं चेत्याशङ्क्याह—धर्माधर्मेति। कारणात्मना—अविद्यात्मना' स्वस्वार्थकारणात्मना वा। नन्वन्तःकरणस्यापि तदानीं कारणात्मनाऽवस्थानात् कथं तदधीनप्राणादिवियैत्याशङ्क्य देहहेतुधर्मादेर्विनाशेऽपि देहस्थितिवत्तत्स्थितिरपि नानुपपन्नेत्याह—न चेति। ननु कारणाभावे द्वयमपि विरुद्धमित्यपरितोषादाह—वस्तुत इति।

सुप्तस्य मृतादविशेषमाशङ्क्य परिहरति—न चेति। जाग्रदवस्थायां परेतस्य लिङ्गशरीरं जन्मान्तरीयतत्तत्पदार्थसंस्कारजन्यतत्तत्पदार्थाकारात्मना लोकान्तरे स्थितं सुप्तस्य तु तादृशसंस्कारात्मनाऽ-

(१) वस्तुत इति। इदं दृष्टिसृष्टिवादाभिप्रायेण। सुषुप्तिकाले मनेदं शरीरमिति शरीरादिसंबन्धाध्यासाभावेन सुषुप्तदशायां शरीराद्यभावेन सुप्तशरीरे अन्यस्योपलम्भो भ्रमरूपः, तथैव सुषुप्तस्य वस्तुतः श्वासादिक्रियाया अभावेऽपि श्वासाद्युपलब्धेः पुरुषान्तरभ्रमरूपत्वादिति।

इति वैलक्षण्यात्। यद्वा, अन्तःकरणस्य द्वे शक्ती—ज्ञानशक्तिः क्रियाशक्तिश्चेति। तत्र ज्ञानशक्तिविशिष्टान्तःकरणस्य सुषुप्तौ विनाशः, न क्रियाशक्तिविशिष्टस्येति प्राणाद्यवस्थानमविरुद्धम्। 'यदा सुप्तः स्वप्नं न कञ्चन पश्यति, अथास्मिन् प्राण एवैकधा भवति, अथैनं वाक् सर्वैर्नामभिः सहाप्येति', (कौ० ३-२) 'सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति' (छा० ६-८-१) इत्यादिश्रुतिरुक्तसुषुप्तौ मानम्।

प्राकृतप्रलयस्तु कार्यब्रह्मविनाशनिमित्तकः सकलकार्यनाशः। यदा तु प्रागेवोत्पन्नब्रह्मसाक्षात्कारस्य कार्यब्रह्मणो

ण्वेत्यर्थः। ननु पुरुषान्तरस्य देहः प्राणक्रिया च प्रमात्रा प्रतीयते न कर्मेन्द्रियव्यापारादिकमिति वैषम्ये नियामकाभावमालक्ष्याह—यद्वेति। आदिपदमपानादिसंग्राहकम्। देहावस्थानं तु मृतशरीरावस्थानवद् विरुद्धमिति भावः। अत्र प्रमाणमाह—यदेति। अथ—तदानीम्, अस्मिन्—सुप्ते सति, एकधा—एकः, एनं—प्राणम्, अप्येति—प्रविशति। कौषीतकिश्रुतिमुदाहृत्य छान्दोग्यश्रुतिमुदाहरति—सतेति। हे सौम्य! तदा—सुषुप्तौ, सता—सद्रूपेण ब्रह्मणा जीवः, सम्पन्नः—अभेदं गतो भवति, स्वमपीतः—विलीनः, तिरोहितोपाधिर्भवतीत्यर्थः। 'सति सम्पद्य न विदुः' इत्याद्या श्रुतिरादिपदेन ग्राह्या।

एवं नित्यप्रलयमभिधाय प्राकृतं निरूपयति—प्राकृतेति। सकलकार्यविनाशः प्रकृतौ लयः। सुषुप्तेस्तु कार्यब्रह्मविनाशनिमित्तकसकलकार्यविनाशरूपत्वाभावान्न तत्रातिव्याप्तिः। प्रागेवोत्पन्नपरब्रह्मसाक्षात्कारस्य हिरण्यगर्भस्य ब्रह्माण्डाधिकारनिर्वाहकप्रारब्धकर्मपरिसमाप्तौ सत्यां यदा विदेहकैवल्यात्मिका परममुक्तिस्तदा तल्लोकवासिनामप्युत्पन्नब्रह्मसाक्षात्काराणां ब्रह्मणा सह तथाभूतमुक्तिरित्यर्थः।

ब्रह्माण्डाधिकारलक्षणप्रारब्धकर्मसमाप्तौ विदेहकैवल्याभिख्या परा मुक्तिः, यदा तल्लोकवासिनामप्युत्पन्नब्रह्मसाक्षात्काराणां ब्रह्मणा सह विदेहकैवल्यम्।

ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्॥ इति श्रुतेः।

एवं स्वलोकवासिभिः सह कार्ये ब्रह्मणि मुच्यमाने तदधिष्ठितब्रह्माण्डतदन्तर्वर्तिनिखिललोकतदन्तर्वर्तिस्थावरादीनां भौतिकानां भूतानां च प्रकृतौ मायायां च लयः, न तु ब्रह्मणि, बाधरूपविनाशस्यैव ब्रह्मनिष्ठत्वात्। अतः प्राकृत इत्युच्यते।

कार्यब्रह्मणो दिवसावसाननिमित्तकस्त्रैलोक्यमात्रप्रलयः नैमित्तिकप्रलयः। ब्रह्मणो दिवसश्चतुर्युगसहस्रपरिमितकालः, 'चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते' इति वचनात्। प्रलयकालो दिवसकालपरिमितः, रात्रिकालस्य दिवस-

---

उक्तार्थे श्रुतिं प्रमाणयति—ब्रह्मणेति। प्रतिसञ्चरे—प्राकृते प्रलये, सम्प्राप्ते सति, परस्य—हिरण्यगर्भस्य, अन्ते-मुक्तिसमये, ते—तत्स्वलोकवासिनः, कृतात्मनः—प्राप्ततत्त्वसाक्षात्काराः, सर्वे ब्रह्मणा सह परं पदं-विदेहकैवल्यं प्रविशन्तीत्यर्थः।

नन्वेवं तर्हि ब्राह्मोऽयं प्रलयो न प्राकृत इत्याशङ्क्य तत्त्वविदां ब्रह्मप्रवेशेऽप्यतत्त्वविदां प्रकृतौ प्रवेशात्प्राकृत इत्याह—एवमिति। मायायां लयो निवृत्तिः। तत्र हेतुमाह—बाधेति। ब्रह्मनिष्ठत्वात् ब्रह्मधर्मत्वाद् ब्रह्मणि तदात्मना स्थितत्वादिति वा। नैमित्तिकं तं दर्शयति—कार्येति। त्रैलोक्यं भूर्भुवः स्वरिति लोकत्रयम्। ब्रह्मदिवसस्य किं प्रमाणमित्यपेक्षायामाह—ब्रह्मण इति। नैमित्तिकप्रलयकालोऽप्येतावानेवेत्याह—प्रलयेति।

कालतुल्यत्वात् प्राकृतप्रलये नैमित्तिकप्रलये च पुराणवचनानि ।

द्विपरार्द्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः ।
तदा प्रकृतयः सप्त कल्प्यन्ते प्रलयाय हि ॥
एष प्राकृतिको राजन् प्रलयो यत्र लीयते ।

इति वचनं प्राकृतप्रलये मानम् ।

एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक् ।
शेतेऽनन्तासने नित्यमात्मसात्कृत्य चाखिलम् ॥

इति वचनं नैमित्तिकप्रलये मानम् ।

तुरीयप्रलयस्तु ब्रह्मसाक्षात्कारनिमित्तकः सर्वमोक्षः । स चैकजीववादे युगपदेव, नानाजीववादे तु क्रमेण । 'सर्व एकीभवन्ति' इत्यादिश्रुतेः । तत्राद्यास्त्रयोऽपि लयाः कर्मोपरतिनिमित्ताः, तुरीयस्तु ज्ञानोदयनिमित्तो लयो ज्ञानेन सहैवेति विशेषः । एवं चतुर्विधप्रलयो निरूपितः । तस्येदानीं क्रमो निरूप्यते—

भूतानां भौतिकानां च न कारणलयक्रमेण लयः । कारणलयसमये कार्याणामाश्रयान्तराभावेनावस्थानानुपपत्तेः ।

आत्यन्तिकं चतुर्थप्रलयं निरूपयति—तुरीयेति । सर्वमोक्षः-अज्ञानेन सह कार्यविनाशः । तुरीयप्रलये श्रुतिं प्रमाणयति—सर्व इति । 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' (बृ० २-४-१४) इत्याद्या श्रुतिरादिपदेनादेया । लयत्वाविशेषेऽपि विशेषमाह-तत्रेति । तत्र-चतुर्षु प्रलयेषु । प्रलयनिरूपणमुपसंहरंस्तत्क्रमे विप्रतिपत्तेस्तन्निरूपणं प्रतिजानीते—एवमिति ।

स्वसिद्धान्तं वक्तुमादौ न्यायमतं दूषयति—भूतानामिति ।

किन्तु सृष्टिक्रमविपरीतक्रमेण (१)। तत्तत्कार्यनाशे तत्तज्जनकादृष्टनाशस्यैव प्रयोजकतया उपादाननाशस्याप्रयोजकत्वात्। अन्यथा न्यायमते महाप्रलये पृथिवीपरमाणुगतरूपरसादेरविनाशापत्तेः।

तथा च पृथिव्या अप्सु, अपां तेजसि, तेजसो वायौ, वायोराकाशे, आकाशस्य जीवाहङ्कारे, तस्य हिरण्यगर्भाहङ्कारे, तस्य चाविद्यायामित्येवं रूपाः प्रलयाः। तदुक्तं विष्णुपुराणे—

जगत्प्रतिष्ठा देवर्षे। पृथिव्यप्सु प्रलीयते।
तेजस्यापः प्रलीयन्ते तेजो वायौ प्रलीयते ॥ १ ॥
वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते।
अव्यक्तं पुरुषे ब्रह्मन्! निष्कले संप्रलीयते ॥२॥ इति।

तर्हि केन क्रमेण लय इति पृच्छति-किं त्विति। उत्तरमाह-सृष्टेति। सृष्टिक्रमविपरीतक्रमेण लय इत्यनुपपद्यते। तत्र हेतुमाह—तत्तत्कार्यनाश इति। अनुगतं हि प्रयोजकमस्य त्वननुगतत्वादप्रयोजकत्वमित्याशयः। विपक्षे दोषमाह—अन्यथेति।

(२)उपादाननाशस्य प्रयोजकत्वे सृष्टिक्रमविपरीतक्रमं दर्शयति—तथा चेति। कार्यविध्वंसनानुपपत्तेरननुगमाच्चोपादाननाशस्याप्रयोजकतयाऽदृष्टनाशस्य प्रयोजकत्वे सति। हिरण्यगर्भाहङ्कारे-महत्तत्वे। अत्र प्रमाणमाह—तदुक्तमिति। अत्रेन्द्रियादिद्वाराऽव्यक्ते

(१) सोपानारोहणक्रमविपरीतक्रमेणैव यथाऽवरोहणं भवति तद्वदिति भावः। कारणलयक्रममते तु अणुकमारभ्यान्त्यावयविपर्यन्तमनेककार्यरूपावयवाः स्वीकृताः। तथा च अणुरूपस्य त्रसरेणुकारणस्य नाशेन त्रसरेणुनाशप्रक्रियायाम् अणुकनाशानन्तरमनेकक्षणपर्यन्तं घटस्थित्यापत्तिः।

(२) उपादान (समवायिकारण) नाशात्कार्यनाश इति तार्किकाः।

एवंविधप्रलयकारणत्वं तत्पदार्थस्य ब्रह्मणस्तटस्थलक्षणम्। ननु वेदान्तैर्ब्रह्मणि जगत्कारणत्वेन प्रतिपाद्यमाने सति सप्रपञ्चं ब्रह्म स्यादन्यथा सृष्टिवाक्यानामप्रामाण्यापत्तेरिति चेत्। न। न हि सृष्टिवाक्यानां सृष्टौ तात्पर्यं

यो द्रष्टव्यः। आकाशमिन्द्रियेषु इन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ विलीयन्त इति सुबालोपनिषद्वचनानुसारात्। न चेदप्रासङ्गिकं तत्पदार्थलक्षणस्य प्रलयपदार्थनिरूपणं विना तद्बोधादित्याशयेनाह—एवंविधेति।

ननूक्तमिदं तत्पदार्थलक्षणं यथार्थं किं वाऽयथार्थम्। आद्ये, ब्रह्मणः सप्रपञ्चतापत्तिः। न द्वितीयः, तत्प्रतिपादकश्रुत्यादिवाक्यानामप्रामाण्यापत्तेरिति शङ्कते—नन्विति। यथा शाखाग्रासंबन्धस्यापि चन्द्रस्य तदवच्छेदकतां प्रकल्प्य शाखाग्रे चन्द्र इति तटस्थलक्षणम्, तथा मिथ्याभूतस्य प्रपञ्चस्य ब्रह्मासम्बन्धेऽपि श्रुतिषु तद्बोधनाय जगत्कर्तृत्वं प्रकल्प्य तल्लक्षणाभिधानमेवमित्याशयेनाह—नेति। 'नेह नानास्ति किंचन' (क० २-४-१०)। न निरोधो न चोत्पत्तिः (मा० का-२-३२) इत्यादिश्रुतिविबाधितेऽर्थे नास्ति सृष्टिश्रुतिवाक्यानां तात्पर्यं येन तेषामप्रामाण्यं भवेदित्याह—न हीति। ननु प्रतीयमानेऽर्थे तात्पर्याभावे क तर्हि तात्पर्यमिति पृच्छति—किं त्विति। 'विषं भुङ्क्ष्व' इति वाक्यस्याप्तवाक्यत्वाद्बाधिते प्रतीयमानेऽर्थे तात्पर्याभावेन शत्रुगृहभोजननिषेधपरत्वं यथा, तथोक्तवाक्यानामपि श्रुतिबाधितप्रतीयमानार्थे तात्पर्यायोगेनाद्वितीयब्रह्मपरत्वेन तस्यैव प्रतिपादकत्वम्, 'यत्परः शब्दः स शब्दार्थः' इत्यभियुक्तोक्तेरित्युत्तर-

---

तथात्वे महाप्रलये पृथिव्यादिपरमाणूनां तन्मते नित्यत्वात्तद्गतगुणानामविनाशः स्यात्। अस्मन्मते तु तत्कार्यजनकादृष्टनाशस्यैवानुपगमस्य प्रयोजकत्वेन न कापि क्षतिः।

किन्तु अद्वितीये ब्रह्मण्येव ।

तत्प्रतिपत्तौ कथं सृष्टेरुपयोगः ? । इत्थम्—यदि सृष्टिमनुपन्यस्य निषेधो ब्रह्मणि प्रपञ्चस्य प्रतिपाद्येत, तदा ब्रह्मणि निषिद्धस्य प्रपञ्चस्य वायौ प्रतिषिद्धस्य रूपस्येव ब्रह्मणोऽन्यत्रावस्थानशङ्कायां न निर्विचिकित्समद्वितीयत्वं प्रतिपादितं स्यात् । ततः सृष्टिवाक्याद्ब्रह्मोपादेयत्वज्ञाने सत्युपादानं विना कार्यस्यान्यत्र सद्भावशङ्कायां निरस्तायां नेति नेतीत्यादीनां ब्रह्मण्यपि तस्यासत्त्वोपपादने प्रपञ्चस्य तुच्छत्वावगमे(१) निरस्ताखिलद्वैतविभ्रममखण्डं सच्चिदानन्दैकरसं ब्रह्म सिद्ध्यतीति परम्परया सृष्टिवाक्यानामप्यद्वितीये ब्रह्मण्येव तात्पर्यम् ।

उपासनाप्रकरणपठितसगुणब्रह्मवाक्यानां चोपासना

माह—अद्वितीय इति ।

ननु शत्रुगृहभोजनाद्वरं विषभक्षणमिति प्रतीयमानार्थस्य यत् तादृशभोजननिषेधप्रतिपत्तौ विनियोगस्तथाऽत्र कथं सृष्टेरद्वितीयब्रह्मबोधने विनियोगः प्रपञ्चनिषेधपरैरेव तत्प्रतिपत्तेः, स्पष्टतया प्रतीयमानान्यार्थकैर्वाक्यैस्तद्बोधनस्य व्यर्थत्वादित्याशयेन शङ्कते-तदिति यस्मिन्ब्रह्मणि प्रपञ्चप्रतिषेधः तद्ब्रह्मैव जगदुपादानमतस्तस्यान्यत्रावस्थानाशङ्काभावेन निःसंशयतया मिथ्यात्वसिद्धेरद्वितीयं ब्रह्म सिध्यतीत्येवं तत्प्रतिपत्तौ प्रतीयमानार्थविनियोग इति समाधत्ते-इत्थमिति । निर्विचिकित्सं—संशयरहितम् ।

नन्वेवं सृष्टिवाक्यानामद्वितीयब्रह्मबोधकत्वेऽपि निर्विचिकित्समद्वितीयत्वं न सिध्यति 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषः' (छा० १ ७। इत्यादिवाक्यैः सगुणब्रह्मप्रतिपादनादित्याशङ्क्याह—उपासनेति

---

(१) तुच्छत्वावगमे-अभिन्नः स्वाश्रयेत्याद्युक्तमिथ्यात्वावगमे इत्यर्थ

विध्यपेक्षितगुणारोपमात्रपरत्वं, न गुणपरत्वम्। निर्गुणप्रकरणपठितानां सगुणवाक्यानां तु निषेधवाक्यापेक्षितनिषेध्यसम्पादकत्वेन विनियोग इति न किञ्चिदपि वाक्यमद्वितीयब्रह्मप्रतिपादनेन विरुध्यते।

तदेवं स्वरूपतटस्थलक्षणलक्षितं तत्पदवाच्यमीश्वरचैतन्यं मायाप्रतिबिम्बितमिति केचित्। तेषामयमाशयः—जीवपरमेश्वरसाधारणं चैतन्यमात्रं बिम्बम्, तस्यैव बिम्बस्याविद्यात्मिकायां मायायां प्रतिबिम्बमीश्वरचैतन्यमन्तःकरणेषु प्रतिबिम्बं जीवचैतन्यम्। 'कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः' इति श्रुतेः। एतन्मते जलाशयगतशरावगतसूर्यप्रतिबिम्बयोरिव जीवपरमेश्वर-

---

'योषिद्वाव गौतमाग्निः' (छा० ५-७८-१) इत्यादिवदारोपितगुणेनाप्युपासनासम्भवेन केवलो निर्गुणश्चेत्यादिश्रुतिविरुद्धार्थपरत्वमुक्तवाक्यादामयुक्तं, तथा च सगुणब्रह्मवाक्यानि चित्तैकाग्र्यद्वाराऽद्वितीयब्रह्मबोधकानीति भावः। 'मूर्तं चामूर्तं च मर्त्यं चामृतं च' इत्यादिवाक्यानां विनियोगमाह—निर्गुणेति। 'अथात आदेशो नेति नेति' (बृ० २-३-६) इत्यादीनि निषेधवाक्यानि। कर्मकाण्डवाक्यानामपि व्यावहारिकप्रामाण्यवतां संयोगपृथक्त्वन्यायेनाद्वितीयब्रह्मप्रतिपत्तौ विनियोगमभिप्रेत्याह—न किञ्चिदपीति।

ननु किं तल्लक्ष्यं यस्येदं लक्षणद्वयमुच्यत इत्याकाङ्क्षायामाह—तदेवमिति। नन्वविद्यातो मायाया भेदाभावात्तत्प्रतिबिम्बितस्य च जीवत्वात्कथं मायायां प्रतिबिम्बितं चैतन्यमीश्वर इत्याशङ्क्याह—तेषामिति। तन्मते जीवेश्वरविभागमाह—एतदिति। एवंविधानेकजीववादे दूषणाभिधानपूर्वकं मतान्तरमवतारयति—एतन्मत

योर्भेदः । अविद्यात्मकोपाधेर्व्यापकतया तदुपाधिकेश्वरस्यापि व्यापकत्वम् । अन्तःकरणस्य परिच्छिन्नतया तदुपाधिकजीवस्यापि परिच्छिन्नत्वम् । एतन्मतेऽविद्याकृतदोषा जीव इव परमेश्वरेऽपि स्युरुपाधेः प्रतिबिम्बपक्षपातित्वादित्यस्वरसाद् बिम्बात्मकमीश्वरचैतन्यमित्यपरे । तेषामयमाशयः—एकमेव चैतन्यं बिम्बत्वाक्रान्तमीश्वरचैतन्यं प्रतिबिम्बत्वाक्रान्तं जीवचैतन्यम् । बिम्बप्रतिबिम्बकल्पनोपाधिश्चैकजीववादे अविद्या, अनेकजीववादे तु अन्तःकरणान्येव । अविद्यान्तःकरणरूपोपाधिप्रयुक्तो जीवपरभेदः । उपाधिकृतदोषाश्च प्रतिबिम्बे जीव एव वर्तन्ते, न तु बिम्बे परमेश्वरे । उपाधेः प्रतिबिम्बपक्षपातित्वात् । एतन्मते च गगनसूर्यस्य जलादौ भासमानप्रतिबिम्बसूर्यस्येव जीवपरयोर्भेदः ।

ननु ग्रीवास्थमुखस्य दर्पणप्रदेश इव बिम्बचैतन्यस्य परमेश्वरस्य जीवप्रदेशेऽभावात्तस्य सर्वान्तर्यामित्वं न स्यादिति चेत् । न । साभ्रनक्षत्रस्य आकाशस्य जलादौ प्रतिबिम्बितत्वे बिम्बभूतमहाकाशस्यापि जलादिप्रदेशसम्ब-

इति । अस्मिन्पक्षे मतद्वयमाह—बिम्बप्रतिबिम्बेति ।

अन्यस्मिन्मते पूर्वोक्तदोषाभावेऽपि दोषान्तरमस्तीति शङ्कते-नन्विति । बिम्बस्य प्रतिबिम्बदेशावर्तित्वनियमादिति भावः । उक्तनियमस्याकाशे व्यभिचारात्परिच्छिन्नबिम्बस्य तथा त्वेऽप्यपरिच्छिन्नबिम्बस्य तथा स्वाभावान्नैवमित्याह-नेति । जलादिस्थ आकाश एव भातीति शङ्कानिरासार्थमुक्तम्—साभ्रेति ।

नन्वभ्रादिकमेव तत्र प्रतिबिम्बते नाकाशम्, तस्य रूपस्पर्शरहित

न्यदर्शनेन परिच्छिन्नबिम्बस्य प्रतिबिम्बदेशासम्बन्धित्वेऽप्यपरिच्छिन्नब्रह्मबिम्बस्य प्रतिबिम्बदेशासम्बन्धाविरोधात् ।

न च रूपहीनस्य ब्रह्मणो न प्रतिबिम्बसम्भवः, रूपवत एव तथात्वदर्शनादिति वाच्यम् । नीरूपस्यापि रूपस्य प्रतिबिम्बदर्शनात् । न च नीरूपस्य द्रव्यस्य प्रतिबिम्बाभावनियमः आत्मनो द्रव्यत्वाभावस्योक्तत्वात् ।

'एकधा बहुधा चैव दृश्यते जलचन्द्रवत्' (ब्र० वि० १२) 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन्' इत्यादिवाक्येन ब्रह्मप्रतिबिम्बाभावानुमा-

---

त्वाद्रूपवत एव प्रतिबिम्बितत्वदर्शनात्, तथा च नीरूपस्य ब्रह्मणो न प्रतिबिम्बसम्भव इत्याशङ्क्य परिहरति—**न चेति** । किं रूपवत एव प्रतिबिम्बम् ? उत रूपवतो द्रव्यस्य ? इति विकल्प्याद्यं प्रत्याह–**नीरूपस्यापीति** । द्वितीयमनूद्य दूषयति—**न चेति** । यतः समवायिकारणं गुणाश्रयो वा द्रव्यमतः । आत्मनस्तु निर्गुणत्वात्समवायासिद्धेश्च द्रव्यत्वाभावस्योक्तत्वादित्यर्थः । तथा च नीरूपस्य द्रव्यस्याकाशादेः प्रतिबिम्बानभ्युपगमेऽपि नीरूपस्याद्रव्यस्य ब्रह्मणो रूपवत्प्रतिबिम्बं सम्भवत्येवेति भावः ।

द्रव्यत्वाभ्युपगमेऽपि दोषाभाव इत्यभिप्रेत्य हेत्वन्तरमाह—**एकधेति** । एकधा–ईश्वररूपेण एकः । बहुधा–जीवात्मना नानारूपः । आदिपदेन 'उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा' इति वाक्यशेषो ग्राह्यः । **ब्रह्मप्रतिबिम्बाभावानुमानस्य**—ब्रह्म न प्रतिबिम्बवत् अचाक्षुषत्वाद्गन्धादिवदित्येवंरूपस्यानुमानस्य । तथा च बादरायणस्य सूत्रे 'आभास एव च' (ब्र० सू० २-३-५०) 'अत एव चोपमा सूर्यकादिवत्' (ब्र० सू० ३-२-१८) इति । अत्र विस्त-

नस्य बाधितत्वाच्च । तदेवं तत्पदार्थो निरूपितः । इदानीं त्वं पदार्थो निरूप्यते ।

भयाद् मूलकृता स्वकोऽवच्छेदवादोऽपि द्रष्टव्यः । तथा हि घटाकाशवदन्तःकरणावच्छिन्नं चैतन्यं जीवस्तदवच्छिन्नं तदीश्वरः । आकाशे प्रतिबिम्बे गगनप्रतिबिम्बत्वव्यवहारस्य भ्रममात्रमूलकतया बिम्बस्य प्रतिबिम्बस्थानावस्थानाभावनियमस्य भङ्गाभावाद् ब्रह्मप्रतिबिम्बो न युक्तः । ननु ब्रह्माण्डान्तरवर्तितत्तदन्तःकरणोपाधिभिस्तदन्तर्वर्तिचैतन्यस्य सर्वात्मना जीवभावेनावच्छेदात्तदवच्छेदरहितचैतन्यात्मकस्येश्वरस्य ब्रह्माण्डान्तरवृत्त्यापत्तिरत्रापि समानेति चेन्न । अविद्याविषयत्वान्तःकरणसंवलितत्वाद्युपाधिकजीवाद्भिन्नस्याविद्याविषयत्वान्तःकरणासंवलितत्वाद्युपाधिकस्यान्तर्यामिण ईश्वरस्य ब्रह्माण्डान्तरस्थानसम्भवात् । न च कार्योपाधिरयं जीवः कारणोपाधिरीश्वर इति वाक्यविरोधः । तस्य पक्षद्वयेऽपि तुल्यत्वात् । कारणावच्छिन्नस्य सर्वानवच्छिन्नत्वे बाधकाभावात् । न चास्मिन्पक्षे श्रुतिसूत्रविरोधः भाष्यकारैरेवात एव चेति सूत्रं व्याख्याय सूर्यादिवदात्मनः प्रतिबिम्बो न युज्यत इति तदाक्षेपकत्वेन 'अम्बुवदग्रहणात्तु न तथात्वम्' (ब्र॰ सू॰ ३-२-१९) इति सूत्रं व्याख्याय 'वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्' (ब्र॰ सू॰ ३-२-२०) इति सूत्रे तदनुपपत्तिमङ्गीकृत्यैव धृतदृष्टान्तस्य सोपाधिकस्यात्मनो वृद्धिह्रासादिमात्रं न निरुपाधिकस्येति प्रदर्शनार्थं न चात्मा प्रतिबिम्बत इत्यभिहितत्वात् । बृहदारण्यकभाष्यादौ प्रतिबिम्बरूपेण प्रवेशो न सम्भवतीत्युक्तत्वाच्चेति सङ्क्षेपः । विस्तरस्त्वन्यत्र द्रष्टव्यः । मूलकृतोऽप्ययमेव पक्षोऽभिप्रेतः । प्रत्यक्षपरिच्छेदे ईश्वरसाक्षित्वादिप्रकरणे एतत्पक्षस्य स्वसम्मतत्वेन सूचितत्वात् । तत्पदार्थनिरूपणमुपसंहरंस्त्वम्पदार्थनिरूपणं प्रतिजानीते—तदेवमिति ।

एकजीववादेऽविद्याप्रतिबिम्बो जीवः, अनेकजीववादे अन्तःकरणप्रतिबिम्बः। स च जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयवान्। तत्र जाग्रद्दशा नामेन्द्रियजन्यज्ञानावस्था। अवस्थान्तरे इन्द्रियाभावाज्ज्ञानेऽव्याप्तिः।

तत्रैकजीववादे तत्स्वरूपमाह—एकेति। अविद्याया एकत्वेन तत्प्रतिबिम्बस्य जीवस्याप्येकत्वौचित्यादिति भावः। 'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम्' (बृ० १-४-१०) 'यथाग्नेः क्षुद्राविस्फुलिङ्गा व्युच्चरन्ति एवमेवैतस्मादात्मनः सर्वे [..]त आत्मानः' (बृ० २-१-२०) इत्यादिश्रुतेः 'मामेव ये प्रपद्यन्ते [म]ायामेतां तरन्ति ते' (भ० गी० ७-१४) इत्यादिस्मृतेः 'भोगेन [..]त्वितरे क्षपयित्वा सम्पद्यन्ते' (ब्र० सू० ४-१-१९) इत्यादिसूत्राच्च। [..] च स्वात्मभूतानिव घटाकाशस्थानीयविद्योपस्थापितनामरूपकृतका[र्य]कारणसङ्घातानुरोधिनो जीवाख्यान् विज्ञानात्मनः प्रतीष्ट इत्यादिमा[ध्य]ादनन्तजीवनिर्भासास्पदमेकरसं ब्रह्मेति पद्मपादाचार्योक्तेश्चैकजीववा[द]ोऽयुक्त इत्यभिप्रेत्याह—अनेकेति। इदमुपलक्षणमविद्यावच्छिन्नो [ज]ीव इति मतस्यापि, मायाभिरिति बहुवचनादविद्यायास्तच्छक्तेर्वा नानात्वाज्जीवनानात्वम्। अजामित्येकवचनं तु जात्यभिप्रायकम्। न च कार्योपाधिरयं जीव इति वाक्यविरोधः। समाहितत्वात्। 'स्वमपीतो भवति' (छा० ६-४-१) इति श्रुतिस्तु तदानीमन्तःकरणलये कर्तृत्वाद्यभावादुपपन्ना। गत्यादिकमप्यातिवाहिकशरीरगमनादिप्रयुक्तमित्यविरोधः। तस्योपाधिगतावस्थावत्त्वमाह—स चेति। तुरीयावस्थातूपाधितादात्म्याध्यासनिवृत्तिरूपालीना। तदुपहितचैतन्यस्य जीवस्य जाग्रदाद्यवस्थात्रयवत्त्वं लक्षणमुक्तम्, तत्र जाग्रदवस्थां लक्षयति—जाग्रदिति। इन्द्रियजन्यज्ञानयोग्यसमय इत्यर्थः। इन्द्रियजन्येति पदकृत्यमाह—अवस्थान्तर इति। स्वप्नसुषुप्त्यवस्थयो-

इन्द्रियजन्यज्ञानं चान्तःकरणवृत्तिः । स्वरूपज्ञानस्यना-
दित्वात् ।

सा चान्तःकरणवृत्तिरावरणाभिभवार्थेत्येके मवन् ।
तथा हि—अविद्योपहितचैतन्यस्य जीवत्वपक्षे घटाद्यवि
न्नचैतन्यस्य जीवरूपतया जीवस्य सर्वदा घटादिभान
सक्तौ घटाद्यवच्छिन्नचैतन्यावरकज्ञानं मूलाविद्यापरतन्त्र
मवस्थापदवाच्यमभ्युपगन्तव्यम् । एवं सति घटादे
सर्वदा भानप्रसङ्गः, अनावृतचैतन्यसम्बन्धस्यैव भानप्र
जकत्वात् । तस्य चावरणस्य सदातनत्वे कदाचिदपि घ
भानं न स्यादिति तद्भङ्गे वक्तव्ये, तद्भङ्गजनकं न चैतन्य
मात्रम् । तद्भासकस्य तदनिवर्तकत्वात् । नापि वृत्युपहि
तचैतन्यम्, परोक्षस्थलेऽपि तन्निवृत्त्यापत्तेरिति परोक्ष

रेत्यर्थः । इन्द्रियजन्यज्ञानस्वरूपं किमित्याकाङ्क्षायामाह—इन्द्रियज
न्येति । चैतन्यरूपं ज्ञानं कुतो नेत्यत आह—स्वरूपेति ।

ननु स्वरूपज्ञानेनैव सर्वदा सिद्धेन विषयप्रकाशसिद्धौ वृत्ति
वृत्तिः किमर्थेत्यत आह—सा चेति । नन्वावरणभङ्गोऽपि चैतन्ये
नैव भविष्यतीत्याशङ्कयाह—तथा हीति । अविद्योपहितस्य चैत
न्यस्य तदवच्छिन्नस्य वा सर्वदा भानप्रसक्तिवारणायावरणस्यानुभव
शक्तिविशेषस्यावश्यकत्वे तद्भङ्गं विना कदाऽपि भानं न स्यात्तद्भङ्ग
आवश्यक इत्यर्थः । आवरणभङ्गोऽपि चैतन्येनेत्यत्र किं चैतन्यमात्रेण
किं वोपहितेनेति विकल्प्याद्यं प्रत्याह—नेति । तद्भासकस्य—
तत्साक्षात्स्फूर्तिप्रदस्य । तन्निवर्तकत्वे कदाऽप्यावरणस्यासत्त्वं
स्याद् । एतेन तृणादिप्रकाशकस्याप्यग्नेस्तन्नाशकत्वदर्शनात् प्रका
शकत्वनिवर्तकत्वयोर्विरोध इति प्रत्युक्तम् । यद्वेस्तृणादेः भासकत्व
दत्वरूपभासकत्वाभावात् । द्वितीयं निरस्यति—नापीति ।

वृत्तवृत्तिविशेषस्य, तदुपहितचैतन्यस्य वाऽऽवरणभङ्ग-जनकत्वमित्यावरणाभिभवार्था वृत्तिरित्युच्यते।

सम्बन्धार्था वृत्तिरित्यपरं मतम्। तत्राप्यविद्योपाधिकोऽपरिच्छिन्नो जीवः। स च घटादिप्रदेशे विद्यमानोऽपि घटाद्याकारापरोक्षवृत्तिविरहदशायां न घटादिकमवभासयति, घटादिना तस्य सम्बन्धाभावात्। तदाकारवृत्तिदशायां तु भासयति, तदा सम्बन्धसत्त्वात्।

नन्वविद्योपाधिकस्यापरिच्छिन्नस्य जीवस्य स्वत एव समस्तवस्तुसम्बद्धस्य वृत्तिविरहदशायां सम्बन्धाभावाभिधानमसङ्गतम्। असङ्गत्वदृष्ट्या सम्बन्धाभावाभिधाने वृत्त्यनन्तरमपि सम्बन्धो न स्यादिति चेत्। उच्यते। न हि वृत्तिविरहदशायां जीवस्य घटादिना सह सम्बन्धसामान्यं निषेधामः; किं तर्हि, घटादिभानप्रयोजकं सम्बन्ध-

---

वृत्तिविशेषस्य—घटाद्याकारायास्तत्तद्वृत्तेः। वृत्तेर्जडत्वात्कथं तयाऽऽवरणनिवृत्तिरिति चेत्तत्राह—**तदुपहितेति**। तादृशवृत्तेरभिव्यञ्जिकाया अवश्यकत्वेन वृत्तिरेव तथेत्याह—**इतीति**।

इत्येकं मतमित्युक्तिसूचितं द्वितीयं मतं दर्शयति—**सम्बन्धार्थेति**। **तत्र**—तस्मिन्मते। अविद्योपाधिकोऽपरिच्छिन्नो जीव इति मत इत्यर्थः।

ननु सम्बन्धाभावः सम्बन्धप्रयोजकाभावादुच्यते? किं वाऽऽत्मनोऽसङ्गत्वात्?। नाद्य, परिच्छेदशून्यस्य घटादिसम्बन्धे प्रयोजकाकाङ्क्षाभावात्। न द्वितीयः, वृत्त्यनन्तरमपि तस्य दुर्घटत्वादिति शङ्कते—**नन्विति**। **असङ्गत्वेति**। 'असङ्गो न हि सज्जते' इति श्रुत्युक्तपारमार्थिकासङ्गत्वदृष्ट्येत्यर्थः। त्वदापादितसम्बन्धसामान्यं नास्माकं निषेध्यमतो नास्मदुक्तिरसङ्गतेत्याह—**न हीति**। पृच्छति—**किं तर्हीति**। उत्तरमाह—**घटादीति**। निषेधाम इत्यनुषज्यते।

विशेषम् । स च सम्बन्धविशेषो विषयस्य जीवचैतन्यस्य च (१) व्यङ्ग्यव्यञ्जकतालक्षणः कादाचित्कः तत्तदाकारवृत्तिनिबन्धनः ।

तथा हि तैजसमन्तःकरणं स्वच्छद्रव्यत्वात् स्वत एव जीवचैतन्याभिव्यञ्जनसमर्थम्, घटादिकं तु न तथा, अस्वच्छद्रव्यत्वात् । स्वाकारवृत्तिसंयोगदशायां तु वृत्त्यभिभूतजाड्यधर्मकतया वृत्त्युत्पादितचैतन्याभिव्यञ्जनयोग्यताश्रयतया च (२)वृत्त्युत्थानानन्तरं चैतन्यमभिव्यनक्ति ।

तदुक्तं विवरणे—अन्तःकरणं हि स्वस्मिन्निव स्वसंस-

ननु स च सम्बन्धः संयोगः समवायो वा ? । नाद्य, व्यापिचिद्रूपे जीवे घटादेः सर्वदा संयुक्तत्वेन सर्वदा भानप्रसङ्गात् । न द्वितीयः, अनङ्गीकारात् । अङ्गीकारे च तस्य नित्यत्वेन सर्वदा भानं स्यादित्याशङ्कयाह—स चेति । घटाद्याकारवृत्तिसमये तदुपहितजीवचैतन्यस्य व्यङ्ग्यत्वं तद्विषयस्य घटादेर्व्यञ्जकत्वमिति तादृशवृत्तिरेव तत्र कारणमित्यर्थः ।

ननु घटादेरस्वच्छस्य स्वाकारवृत्तिदशायामपि कथमभिव्यञ्जकत्वमित्यपेक्षायामाह—तथा हीति । न तथा—स्वतः जीवचैतन्याभिव्यञ्जनसमर्थं न भवति । कथं तर्हि स समर्थमित्यत्राह—स्वाकारेति । वृत्त्या अभिभूतस्तिरस्कृतो जाड्यधर्मो यस्य तत्तथा । वृत्त्या उत्पादिता या चैतन्याभिव्यञ्जनयोग्यता तदाश्रयतया चेत्यर्थः । अभिव्यनक्ति—घटादिकमिति कर्तृपदमनुषज्यते ।

तत्र सम्मतिमाह—तदुक्तमिति । नन्वस्वच्छद्रव्यस्य प्रतिबिं-

---

(१) खण्डपुस्तकयोः चशब्दो नास्ति, आवश्यकश्च सः ।
(२) - - - ।

विषयमपि घटादौ चैतन्याभिव्यक्तियोग्यतामापादयतीति। दृष्टं चास्वच्छद्रव्यस्यापि स्वच्छद्रव्यसम्बन्धदशायां प्रतिबिम्बग्राहित्वम्। यथा कुड्यादेर्जलादिसंयोगदशायां मुखादिप्रतिबिम्बग्राहिता। घटादेरभिव्यञ्जकत्वं च तत्प्रतिबिम्बग्राहित्वम्, चैतन्याभिव्यक्तत्वं च तत्र प्रतिबिम्बितत्वम्।

एवं विषयाभिव्यञ्जकत्वसिद्ध्यर्थमेव वृत्तेरपरोक्षस्थले बहिर्निर्गमनाङ्गीकारः। परोक्षस्थले तु वह्न्यादेर्वृत्तिसंसर्गाभावेन चैतन्यानभिव्यञ्जकतया न वह्न्यादेरपरोक्षत्वम्। एतन्मते च विषयाणामपरोक्षत्वं चैतन्याभिव्यञ्जकत्वमिति द्रष्टव्यम्। एवं जीवस्यापरिच्छिन्नत्वेऽपि वृत्तेः सम्बन्धार्थत्वं निरूपितम्। इदानीं परिच्छिन्नत्वपक्षे सम्बन्धार्थकत्वं निरूप्यते।

तथा हि—अन्तःकरणोपाधिको जीवः। तस्य न घटाद्युपादानता, घटादिदेशासम्बन्धात्। किन्तु ब्रह्मैव घटा-

---

म्बग्राहित्वं न दृष्टचरमित्याशङ्क्याह—दृष्टं चेति। ननु घटादेरस्वच्छद्रव्यस्य चैतन्याभिव्यञ्जकत्वे दृष्टान्तस्य वक्तव्यत्वे प्रतिबिम्बग्राहिकुड्यादिनिदर्शनप्रदानमसङ्गतमित्याशङ्क्याह—घटादेरिति।

इदं च वृत्तिं विना न सिद्ध्यतीति तादृशसम्बन्धप्रयोजकता तस्या इत्याह—एवमिति। ननु वृत्तेरेवविषयसम्बन्धार्थत्वाभ्युपगमे कथं घटादेरपरोक्षत्वम्? विषयस्य प्रमातृचैतन्याभिन्नत्वमपरोक्षत्वमित्युक्त्वादित्याशङ्क्याह—एतन्मत इति। इदमुपसंहरन्मतान्तरे सम्बन्धार्थत्वोपपादनं प्रतिजानीते—एवमिति।

अन्तःकरणोपाधिकः—तत्प्रतिबिम्बस्तदवच्छिन्नो वा। सर्वस्मिन्मते घटाद्युपादानं किमिति पृच्छति—किं त्विति। उत्तरमाह—ब्रह्मैवेति। ननु तस्य व्यापकत्वेऽपि केवलस्यासङ्गतया कथं

शुपादानम् । तस्य मायोपहितस्य सकलघटाद्यन्वयित्वात् । अत एव ब्रह्मणः सर्वज्ञता । तथा च जीवस्य घटाद्यधिष्ठानब्रह्मचैतन्याभेदमन्तरेण घटाद्यवभासासम्भवे प्राप्ते, तदवभासाय घटाद्यधिष्ठानब्रह्मचैतन्याभेदसिद्ध्यर्थं घटाद्याकारा वृत्तिरिष्यते ।

ननु वृत्त्यापि कथं प्रमातृचैतन्यविषयचैतन्ययोरभेदः सम्पाद्यते, घटान्तःकरणरूपोपाधिभेदेन तदवच्छिन्नचैतन्ययोरभेदासम्भवादिति चेत् । न । वृत्तेर्बहिर्निर्देशगमनाङ्गीकारेण वृत्त्यन्तःकरणविषयाणामेकदेशस्थत्वेन तदुपधेयभेदाभावस्योक्तत्वात् । एवमपरोक्षस्थले वृत्तेर्मतभेदेन विनियोग उपपादितः ।

इन्द्रियाजन्यविषयगोचरापरोक्षान्तःकरणवृत्त्यवस्थास्वप्नावस्था । जाग्रदवस्थाव्यावृत्त्यर्थम् इन्द्रियाजन्येति । अविद्यावृत्तिमत्या सुषुप्तौ अतिव्याप्तिवारणायान्तःकरणेति । सुषुप्तिर्नामाविद्यागोचराविद्यावृत्त्यवस्था । जाग्रत्स-

---

घटादिदेशसम्बन्ध इत्याशङ्क्य केवलस्य तदसम्भवेऽपि मायोपधिकस्य मायाद्वारकसम्बन्धसम्भवादित्याह—तस्यैति । मायोपहितस्य-तदवच्छिन्नस्य तत्प्रतिबिम्बस्य तद्बिम्बस्य वा । एतेन प्रकृते किमायातमित्यत आह—तथा चेति । अन्तःकरणोपाधिकचैतन्यस्य घटादिदेशानवस्थितस्य तदधिष्ठानचैतन्याभिन्नत्वाभावे ।

उक्तं विरुद्धत्वं शङ्कते ननु इति । प्रोक्तं स्मारयति-वृत्तेरिति । वृत्तिविनियोगोपपादनमुपसंहरति—एवमिति ।

अथ स्वप्नावस्थां लक्षयति—इन्द्रियेति । इन्द्रियाजन्या विषयगोचरा अन्तःकरणवृत्तिर्यस्मिन्समये सा तथाभूतान्यवस्था । सुषुप्तिं लक्षयति-सुषुप्तिरिति । अविद्या-अज्ञानं सा गोचरो विषयो

प्रयोरविद्याकारवृत्तेरन्तःकरणवृत्तित्वान्न तत्रातिव्याप्तिः। अत्र केचिन्मरणमूर्च्छयोरवस्थान्तरत्वमाहुः। अपरे तु सुषुप्तावेव तयोरन्तर्भावमाहुः।

तत्र तयोरवस्थात्रयान्तर्भावबहिर्भावयोस्त्वं पदार्थनिरूपणे उपयोगाभावान्न तत्र प्रयत्यते। तस्य च मायोपाध्यपेक्षयैकत्वम्, अन्तःकरणोपाध्यपेक्षया च नानात्वं व्यवह्रियते। एतेन जीवस्याणुत्वं प्रत्युक्तम्। 'बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोपि दृष्टः' (श्वे० ५-८) इत्यादौ जीवस्य बुद्धिशब्दवाच्यान्तःकरणपरिमाणोपाधिकपरमाणुत्वश्रवणात्।

यस्याः साक्षादविद्यावृत्तेस्तदवस्था। अविद्यापदं नित्यसुखस्याप्युपलक्षणम्। ननु मरणमूर्च्छयोरपि निरूपणीयत्वात्किमित्यवस्थात्रयमेव निरूपितमित्याशङ्क्याह—अत्रेति।

अवस्थानिरूपणप्रसङ्गे भवत्सम्मतं किमित्यपेक्षायामाह—तत्रेति। तयोर्मतयोरित्यर्थः। अवस्थात्रयवाञ्जीव इत्युक्तं तत्रावस्थास्वरूपमभिधाय तद्वान् जीव एक उत अनेक इत्यपेक्षायामाह—तस्येति। तस्य—उक्तावस्थावतो जीवस्य। तथा च विभुर्मध्यमपरिमाणो वा जीव इत्यर्थः। एतेन—जीवस्य विभुत्वादिप्रदर्शनेन। अणुत्वं रामानुजाद्युक्तम्। ननु 'बालाग्रशतभागस्य शतधा कल्पितस्य च। जीवो भागः स विज्ञेयः स चानन्त्याय कल्पते' (श्वे० ५-९) इत्यादिश्रुतिविरोधस्स्यादित्याशङ्क्य 'महतो महीयान्' (क० १-२-२०) इत्यादिश्रुत्या सर्वाङ्गीणसुखाद्युपलब्ध्या च शुद्धस्य दुर्लक्ष्यत्वाभिप्रायमेवाणुत्वम्, सोपाधिकस्य त्वन्तःकरणाद्युपाधिकृतमित्यविरोध इत्याशयेनाह—बुद्धेरिति।

स च जीवः स्वयंप्रकाशः । स्वप्नावस्थामधिकृत्य 'अत्राय पुरुष स्वयज्योति' (बृ० ४-३-८) इति श्रुतेः॥ अनुभवरूपश्च 'प्रज्ञानघनः' (मा० ५) इत्यादिश्रुतेः। अनुभवामीति व्यवहारस्तु वृत्तिप्रतिबि(१)म्बितचैतन्यमादायोपपद्यते ।

एव त्वंपदार्थो निरूपितः। अधुना तत्त्वंपदार्थयोरैक्यं महावाक्यप्रतिपाद्यमभिधीयते ।

ननु नाहमीश्वर इत्यादिप्रत्यक्षेण, किंचिज्ज्ञत्वसर्वज्ञ-

नैयायिकादिमतनिरासायाह—स चेति । तत्र बृहदारण्यकश्रुतिं प्रमाणयति—स्वप्नावस्थामिति । अयं पुरुष इत्यनेन परमात्माऽभिहित इति भ्रमस्य व्यवच्छेदार्थमुक्तं स्वप्नेति । वृत्त्यादिवज्जडत्वमाशङ्क्याह—अनुभवरूपश्चेति । अत्रापि प्रमाणमाह—प्रज्ञेति । विज्ञानमूर्तिरित्यर्थः । 'योऽयं विज्ञानघनः' इत्यादिश्रुतिरादिपदादेया। आत्मन स्वप्रकाशत्व च साधितमायपद्यविवरणे। ननु तस्यानुभवरूपत्वेऽनुभवामीत्यनुभवाश्रयत्वव्यपदेशानुपपत्तिरित्याशङ्क्याह—अनुभवामीति ।

एवं पदार्थनिरूपणमुपसंहरन्वाक्यार्थप्रतिपादनं प्रतिजानीते—एवमिति । 'प्रज्ञानं ब्रह्म' 'अहं ब्रह्मास्मि' (बृ० १-४-१०) 'तत्त्वमसि' (छा० ६-८-७) 'अयमात्मा ब्रह्म' (बृ० ४-४-५) इत्येवंरूपैर्ऋग्वेदादिमहावाक्यै(१)प्रतिपाद्य—तात्पर्यविषयत्वेन बोधनीयम् ।

तत्प्रतिपादनार्थमादौ शङ्कामुद्भावयति—नन्विति । आदिशब्देन इदं संसार्यहमित्यादिप्रत्यक्षं ग्राह्यम् । तत्त्वंपदार्थौ परस्परभिन्नौ

---

(१)—बिम्बचैतन्येति पाठः रामपुस्तकयो. ।

(२)—वाक्यैरित्यस्य तु 'सत्य ज्ञानमनन्त ब्रह्म' इत्यादिवाक्यरवाक्यार्थेऽप्रतिपाद्यम्—इत्यधिकः पाठो दृश्यते रामपुस्तकयोः, तस्य प्रयोजनं न पश्यामः।

त्वविरुद्धधर्माश्रयत्वादिलिङ्गेन, द्वा सुपर्णेत्यादिश्रुत्या, द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ (भ० १५–१६)

इत्यादिस्मृत्या च जीवपरभेदस्यावगतत्वेन तत्त्वमस्यादिवाक्यमादित्यो यूपो यजमानः प्रस्तर इत्यादिवाक्यवद् उपचरितार्थमेवेति चेत्। न। भेदप्रत्यक्षस्य

विरुद्धधर्माश्रयत्वाद्विरुद्धस्वभावत्वाच्च, तेजस्तिमिरवत्। 'द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' (मु० ३-१) 'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे। छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः' 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः' (भ० गी० १५-१७) (२)। सत्यभेदं विनाऽनुपपद्यमानमुपलभ्यमानं जीवस्य संसारित्वं श्रूयमाणं चेश्वरस्यासंसारित्वम् सत्यं भेदं कल्पयति। यदि जीवस्य परमात्मनाऽभेदः स्यात् तर्ह्युपलभ्येत नोपलभ्यतेऽतो नास्तीति निश्चीयते इति प्रत्यक्षादिप्रमाणैर्जीवेश्वरभेदस्यावगतत्वात्तत्त्वमस्यादिवाक्यमुपचरितार्थं गौणार्थमेव, 'आदित्यो यूपः' 'यजमानः प्रस्तरः' इत्यादिवाक्यवत्। यथाऽनादित्ये यूपे आदित्यत्वस्य, अयजमानभूतायां मुष्टौ च यजमानत्वस्योपचारस्तद्वदित्यर्थः। व्यावहारिकभेदावेदकप्रत्यक्षादिप्रमाणैस्तात्त्विकाभेदावेदकश्रुतिविरोधायोगान्मैवमित्याह—नेति। स्याद्विरोधस्तथाऽपि श्रुत्या प्रत्यक्षादेर्बाध इत्याशयेनाह प्रत्यक्षस्य बाध्यत्वयोग्यतामाह—भेदेति। सम्भाविताः करणनामिन्द्रियाणामपाटवत्वादयो दोषा यस्मिन् तत्तथा तस्येत्यर्थः। ननु ज्येष्ठेन प्रत्यक्षेणैव तद्बाध उचित इत्याशङ्क्य ज्येष्ठत्वं हि बाध्यत्वे

---

(१) इत्यादिश्रुतिस्मृत्य आदिपदग्राह्या इति शेषः।

सम्भावितकरणदोषस्यासम्भावितदोषवेदनन्यज्ञानेन बाध्यमानत्वात्। अन्यथा चन्द्रगताधिकपरिमाणग्राहिज्योतिःशास्त्रस्य चन्द्रप्रादेशग्राहिप्रत्यक्षेण बाधापत्तेः। पाकरक्ते घटे रक्तोऽयं न श्याम इति वत्सविशेषणे हीति न्यायेन(१) जीवपरभेदग्राहिप्रत्यक्षस्य विशेषणीभूतधर्मभेदविषयत्वाच्च।

अत एव नानुमानमपि(२) प्रमाणम्, आगमबाधात्, मेरुपाषाणमयत्वानुमानवत्। नाप्यागमान्तरविरोधः।

हेतुर्न तु बाधकतायां कनीयसा शुक्तिज्ञानेन ज्येष्ठस्य रजतज्ञानस्य बाधदर्शनात्, अन्यथा तदुक्तस्यसम्भवाच्च प्रादेशपरिमाणग्राहिणस्तद्बाधापत्तेस्त्वित्याशयेनाह—अन्यथेति। न चोपजीव्यविरोधः, धर्मभेदबोधकप्रत्यक्षस्य धर्म्यभेदज्ञानं प्रत्युपजीव्यत्वादित्याशयेनाह—पाकेति। तथा चैवंभूतज्ञाने सत्यपि धर्म्यभेदमादाय सोऽयं घट इतिवत् यथाऽविरुद्धं तद्वदहमीश्वर इति ज्ञानानन्तरमहं ब्रह्मेति ज्ञानमित्यर्थः।

अत सर्वप्रमाणोपजीव्यस्य ज्येष्ठस्य प्रत्यक्षस्य बाध्यत्वाद्भेदेऽप्रमाणता चेत् एवानुमानस्यापीत्याह—अत एवेति। आगमेन तत्त्वमस्यादिना बाधात्। मेरुः पाषाणमयः पर्वतत्वाद्विन्ध्यादिवदित्यनुमानं यथा सततं सौवर्णं कुलगिरिराजो मेरुरित्याद्यागमेन बाधितं तद्वदित्यर्थः। आगमविरोधोऽपि नास्तीत्याह—नापीति। भेदस्य प्रत्यक्षादिप्रमाणसिद्धत्वात्तद्बोधस्य बाऽज्ञातज्ञापकत्वादभेदबोधागमस्य

---

(१) सति सम्भवे हि विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्ये बाधे। यथा रक्तघटे विद्यमाने श्यामघटो नास्तीति घटरूपे विशेष्ये निषेधस्य बाधे विशेषणीभूतश्यामगुणमात्रपरत्वं निषेधस्य तद्वदित्यर्थः।

(२) त्रिविधभेदत्वादिलिङ्गकं सूत्रोक्तमनुमानमपीति।

तत्परातत्परवाक्ययोः तत्परवाक्यस्य बलवत्त्वेन लोकसिद्धभेदानुवादिद्वासुपर्णादिवाक्यापेक्षया उपक्रमोपसंहाराद्यवगताद्वैततात्पर्यविशिष्टस्य तत्त्वमस्यादिवाक्यस्य प्रबलत्वात् ।

न च जीवपरैक्ये विरुद्धधर्माश्रयत्वानुपपत्तिः । शीतस्यैव जलस्यौपाधिकौष्ण्याश्रयत्ववत् स्वभावतो निर्गुणस्यैव जीवस्यान्तःकरणाद्युपाधिककर्तृत्वाद्याश्रयत्वप्रतिभासोपपत्तेः । यदि च जलादौ औष्ण्यमारोपितं तदा प्रकृतेऽपि तुल्यम् । न च सिद्धान्ते कर्तृत्वस्य क्वचिदप्यभावादारोप्यप्रमाहितसंस्काराभावे कथमारोप इति वाच्यम् । लाघवेनारोप्यविषयसंस्कारत्वेनैव तस्य हेतुत्वात् ।

तत्र तात्पर्याभावेनातत्परत्वात्तत्पराभेदवाक्यागमाद्दौर्बल्यादित्याह—तत्परेति ।

न चार्थान्तरविरोध इत्याह—न चेति । औपाधिकविरुद्धधर्माश्रयत्वेनान्यथा सिद्धत्वादित्याह—शीतस्यैवेति । नन्वग्निधर्मस्यौष्ण्यस्य जलादावारोपात् प्रतीतिरत्र कस्य धर्मस्येत्याशङ्क्याह यदीति । अन्तःकरणधर्मस्य कर्तृत्वादेर्मानसम्भवात्प्रकृतेऽप्येतत्तुल्यमित्यर्थः । नन्वात्मतादात्म्यापन्नस्यैवान्तःकरणस्यापि कर्तृत्वादिधर्मकत्वात् तद्व्यतिरिक्तेऽप्यात्मनि क्वापि कर्तृत्वादेरप्रमितत्वात्कथमारोप इत्याशङ्क्य परिहरति—न चेति । यथा सूर्यादिकिरणसम्पर्कात्प्रतीयमानमपि(१) जलादिकं धर्मादिनिष्ठं न तु सूर्यादिनिष्ठं, तथाऽऽत्मसम्बन्धात्प्रतीयमानमपि कर्तृत्वादिकमन्तःकरणनिष्ठमेव, न त्वात्मनिष्ठम् । तस्य कूटस्थत्वात् । अतः पृथक् क्वाप्यप्रमितस्य कर्तृत्वादेरात्मन्यारोपे नास्ति बाधकम् । आरोप्यगोचरसंस्कारमात्रस्यैवेह प्रयुक्तत्वादित्याह—लाघवेनेति ।

---

(१) अपि नीलादिक०—ततः पृथक्कार्यप्रमितस्य० इत्यादिः पाठः कपुस्तके । ततः पृथक्क्वाप्यप्रमित० इत्यादिः पाठो गपुस्तके ।

न च प्राथमिकारोपे का गतिः, कर्तृत्वाद्यध्यासप्रवाहस्याना दित्वात्। तत्त्वंपदवाच्ययोर्विशिष्टयोरैक्यायोगेऽपि लक्ष्यस्वरूपयोरैक्यमुपपादितमेव। अत एव तत्प्रतिपादकतत्त्वमस्यादिवाक्यानामखण्डार्थत्वम्, सोऽयमित्यादिवाक्यवत्। न च कार्यपराणामेव

नन्वस्त्वस्मिन्कर्तृत्वारोपे पूर्वप्रतीतकर्तृत्वादिसंस्कारो हेतुस्तत्रापि तथाभूतस्तत्रापि तथाभूतः, तथाऽपि प्राथमिकारोपो दुर्घट इत्याशङ्कय परिहरति—न चेति। प्राथमिकारोपे काऽपि गतिर्नास्तीति न चेत्यर्थः। कर्तृत्वाद्यध्यासप्रवाहस्यानादित्वेन कस्याप्यारोपस्य प्राथम्यासिद्धया तत्पृथग्गतेरवक्तव्यत्वादित्याह—कर्तृत्वेति। नन्वस्त्वेवं तथाऽपि विरुद्धधर्माक्रान्तयोर्जीवेश्वरयोरैक्यमित्याशङ्कयाह—तत्त्वमिति। लक्ष्यस्वरूपैक्यम् अत एव सोऽयं देवदत्तः प्रकृष्टप्रकाशश्चन्द्र इत्यादिवाक्यवत् 'तत्त्वमसि' 'सत्यं ज्ञानमनन्तम्' (तै० २-१-१) इत्यादिवाक्यानामखण्डार्थत्वमिति। न चास्त्यनुपलब्धिविरोधस्तमसाऽऽवृतस्य घटस्यानुपलब्धेस्तदभावानिश्चायकत्ववदज्ञानवृतेऽनुपलम्भस्य(१) तदभावानिर्णायकत्वादित्यपि द्रष्टव्यम्। ननु किं प्रयोजकप्रवृत्त्यादेरभावात्सङ्गतिमहायोगात् क्रियाऽन्वितस्वार्थपराणां प्रामाण्याच्च सिद्धं ब्रह्म वेदान्तप्रमेयमिति प्राभाकरमतमाशङ्कय परिहरति—न चेति। पुत्रपदाङ्कितवसनं चैत्रपुरतो निधाय दे वंत्र

(१) अज्ञानावृताऽभेदस्यानुपलम्भस्येति पाठः कपुस्तके। अज्ञानरूपाभेदस्यानुपलम्भस्य तदभावानिर्णा० इति पाठः खपुस्तके। अज्ञानवृताभेदस्य अनुपलम्भस्य तदभावा इति पाठो गपुस्तके। तेषामसङ्गतत्वमालोच्य उपरितनः पाठः स्थापितोऽस्माभिः। तस्यायमर्थः. तत्त्वमस्यादिवाक्यानामखण्डार्थत्वेऽपि तत्पदार्थत्वंपदार्थयोर्जीवपरमात्मनोः अभेदानुपलब्धिरूपबाधमाशङ्कयाह .तत्त्वमस्यादिवाक्यानामौत्सर्गिकप्रामाण्यं न निराकर्तुं टीकाकारैर्न

(१) प्रामाण्यम्, चैत्रपुत्रस्ते जात इत्यादौ सिद्धेऽपि सङ्गति-ग्रहात्। एवं सर्वप्रमाणाविरुद्धश्रुतिस्मृतीतिहासपुराणप्रतिपाद्य जीवपरैक्यं वेदान्तशास्त्रस्य विषय इति सिद्धम्।

इति श्रीवेदान्तपरिभाषायां विषयपरिच्छेदः ॥ ७ ॥

पुत्रस्ते जात इत्युक्ते विकसितवदनकमलं चैत्रमवलोक्यास्य पुनः पदस्य सुतरूपेऽर्थे सङ्गतिं तटस्थो गृह्णातीति पुत्रस्ते जातः कन्या ते गर्भिणी इत्यादौ सङ्गतिग्रहादित्यर्थः। उपसंहरति—**एवमिति**। उक्तप्रकारेण। सर्वैः प्रत्यक्षादिप्रमाणैरविरुद्धम्। 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' (ई० ७) इत्यादिश्रुतिभिः, 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत' (भ० गी० १३-२) इत्यादिस्मृतिभिः, 'सर्वभूतान्तरस्थाय नित्यशुद्धचिदात्मने। प्रत्यक्चैतन्यरूपाय मह्यमेव नमोनमः॥' इत्यादीतिहासैः, 'विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते। आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति॥' इत्यादिपुराणैश्च तात्पर्येण तया प्रतिपाद्यम्।

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तव-शास्तमरामकुमारसूनुधनपतिसूरिसुतशिवदत्तकृताया वेदान्त-परिभाषार्थदीपिकाया विषयपरिच्छेदः समाप्तः ॥ ७ ॥

चास्तीति। अज्ञानवत प्रमातुः ज्ञानस्याभेदानुपलम्भस्य (कर्तृकर्मणोः कृति, इत्यनेन कर्तरि षष्ठी) तदभावस्य तस्य अभेदस्य अभावस्तदभावस्तस्य-अर्थात् भेदस्य अनिर्वाच्यत्वात्। प्रमाणेनापि यथार्थज्ञानं तत्त्वविद एव जायते, यथा मणिकारस्यैव रत्नतत्त्वसाक्षात्कारश्चक्षुषा न गोपालानामिति ध्येयम्।

(१) पदानां वाक्यानां वा इति शेषः। प्राभाकरा हि लिङ्लोट्तव्यादि-बोध्यकार्यान्वितानामेव पदादीनां प्रामाण्यं, तथा हि-'वत्सम्भान' इत्युत्तमवृ-

अथ प्रयोजनपरिच्छेदः ८

इदानीं प्रयोजनं निरूप्यते। यदवगतं सत्स्ववृत्तितयेष्यते तत्प्रयोजनम्। तच्च द्विविधम्—मुख्यं गौणं चेति। तत्र सुखदुःखाभावौ मुख्यं प्रयोजनम्। तदन्यतरसाधनं गौणं प्रयोजनम्। सुखं च द्विविधम्—सातिशयं निरतिशयं चेति। तत्र सातिशयं सुखं विषयानुषङ्गजनितान्तःकरणवृत्तितारतम्यकृतानन्दलेशाविर्भावविशेषः।

अथ प्रयोजननिरूपणं प्रतिजानीते—इदानीमिति। यज्ज्ञातं सन्ममेदं स्यादिति स्वसम्बन्धितयेष्यते तत्प्रयोजनम्, तद्विभजति—तच्चेति। तत्र—तयोर्द्वयोर्मध्ये। तदन्यतरसाधनं—तयोः सुखदुःखाभावयोरन्यतरस्य सुखस्य दुःखाभावस्य वा साधनं सुखादिरूपप्रयोजनगुणत्वाद्गौणम्। सुखस्यापि द्वैविध्यमाह—सुखं चेति। उपलक्षणमेतत्। दुःखाभावोऽपि द्विविधः—परिच्छिन्नदुःखाभावो यावद्दुःखाभावश्चेति। तत्र संसारदशायामाद्यो मोक्षावस्थायां द्वितीय इत्यपि बोध्यम्। विषयेति। विषयतारतम्याद्विषयेन्द्रियसन्निकर्षजनितान्तःकरणवृत्तितारतम्यं तत्कृतानन्दलेशाविर्भावविशेषः। तथा भूतस्य

द्धवाक्यमुपश्रुत्य प्रवृत्तं मध्यमवृद्धं दृष्ट्वा व्युत्पित्सुर्बालः इदं वाक्यमेतत्क्रियाबोधकमित्यनुमिनोति। पश्चाद्गामानयेति श्रुत्वा प्रवृत्तं मध्यमवृद्धं दृष्ट्वा तद्वाक्यस्य तत्क्रियाबोधकत्वमनुमिनोति। अयं च बधानपदोद्वापादपनयपदावापाच्च वत्सपदस्य पशुविशेषे शक्तिमपि जानाति। एवं बधानादिपदस्यावापोद्वापाभ्यां शक्तिज्ञानं भवति। तथा च सिद्धार्थानां पशुरस्तीत्यादीनामपि 'इदं पदम्' इत्यध्याहृतकार्यबोधकत्वमेवेति मन्यते। तानुत्तरयति—न चेत्यादिना। सं पश्येत्यनध्याहारस्यापि सङ्गतिग्रहस्य टीकाप्रदर्शितप्रकारेणोपपत्तेः। कार्यान्वितार्थबोधने गौरवाच्चेति भावः।

'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' (बृ० ४-३-३२) इत्यादिश्रुतेः । निरतिशय सुख च ब्रह्मैव । 'आनन्दो ब्रह्मेति व्यजानात्' (तै० ३-६) 'विज्ञानमानन्दं ब्रह्म' (बृ० ३-१८) इतिश्रुतेः ।

आनन्दात्मकब्रह्मावाप्तिश्च मोक्षः शोकनिवृत्तिश्च । 'ब्रह्म वेद ब्रह्मैव भवति' (मु० ३-२-६) 'तरति शोकमात्मवित्' (छा० ७-१-३) इत्यादिश्रुतेः । न तु लोकान्तरावाप्तिः, तज्जन्यवैषयिकानन्दो वा मोक्षः । तस्य कृतकत्वेनानित्यत्वे मुक्तस्य पुनरावृत्त्यापत्तेः ।

विषयावच्छिन्नाज्ञाननिवृत्तौ तदवच्छिन्नानन्दस्यैव प्रतिबिम्बनादानन्दसमुद्रस्य ब्रह्मण आनन्दलेशाविर्भावविशेष इत्यर्थः । अत्र श्रुतिं प्रमाणयति—**एतस्यैवेति** । आदिपदेन 'एष ह्येवानन्दयति' (तै० २-७) इत्याद्या श्रुतिरुपादेया । द्वितीयं सुखं लक्षयति—**निरतिशयसुखमिति** । चकारात्सातिशयसुखमप्यानन्दात्मब्रह्मलेशात्मकत्वात् । ब्रह्मैवेत्यर्थः । अत्रापि श्रुतिं प्रमाणयति—**आनन्द इति** ।

भवत्वानन्दात्मकं ब्रह्म प्रकृते किमायातमित्याशङ्क्याऽऽनन्दरूपब्रह्मावाप्तिः समूलसर्वानर्थनिवृत्तिश्च मोक्ष इत्यवगतो मोक्षः स मम भूयादिति स्ववृत्तितयेष्यते इति तस्य प्रयोजनत्वमित्याह—**आनन्देति** । शोकशब्दः सकारणबन्धपरः । उभयत्र प्रमाणमाह—**ब्रह्म वेदेति** । तरति—अपनयति । आदिपदेन 'ब्रह्मविदाप्नोति परम्, (तै० २-१-१) 'तरत्यविद्याम्'—मित्याद्याश्रुतिरादेया । तान्त्रिकमतनिरासायाह—**न त्विति** । तस्याः स्वतः पुरुषार्थत्वाभावादाह—**तज्जन्येति** । तया लोकान्तरावाप्त्या जन्येत्यर्थः । उभयोर्मोक्षत्वाभावे हेतुमाह—**तस्येति** । उभयविधमोक्षस्य ।

ननु त्वन्मतेऽप्यानन्दावाप्तेरनर्थनिवृत्तेश्च सादित्वे तुल्यो दोषः, अनादित्वे मोक्षमुद्दिश्य श्रवणादौ प्रवृत्त्यनुपपत्तिरिति चेत्। न। सिद्धस्यैव ब्रह्मस्वरूपस्य मोक्षस्यासिद्धत्वभ्रमेण तत्साधने प्रवृत्त्युपपत्तेः। अनर्थनिवृत्तिरप्यधिष्ठानभूतब्रह्मस्वरूपतया सिद्धैव। लोकेऽपि प्राप्तप्राप्तिपरिहृतपरिहारयोः प्रयोजनत्वं दृष्टमेव। यथा हस्तगतविस्मृतसुवर्णादौ 'तव हस्ते सुवर्णम्' इत्याप्तोपदेशादप्राप्तमिव प्राप्नोति। यथा वा वलयितचरणायां रज्जौ सर्पत्वभ्रमवतो 'नायं सर्प' इत्याप्तवाक्यात् परिहृतस्यैव सर्पस्य परिहारः। एवं प्राप्तस्याप्यानन्दस्य प्राप्तिः, परिहृतस्याप्यनर्थस्य निवृत्तिः मोक्षः प्रयोजनम्।

स च ज्ञानैकसाध्यः 'तमेव विदित्वाऽतिमृत्युमेति

ननु त्वदभिमतो मोक्षः सादिरनादिर्वा? आद्ये, कृतकत्वेनानित्यं मुक्तस्य पुनरावृत्तिलक्षणो दोषस्तुल्य। द्वितीये, श्रवणादिवैयर्थ्यमिति तान्त्रिक शङ्कते—नन्विति। द्वितीयपक्षमवलम्ब्य परिहरति—नेति। नन्वानन्दरूपस्य ब्रह्मण सिद्धत्वेन तत्प्राप्तेस्तथात्वेऽप्यनर्थनिवृत्तेरभावरूपाया कथं सिद्धत्वमित्याशङ्क्याह—अनर्थनिवृत्तिरपीति। ननु सिद्धस्य पुरुषार्थत्वादर्शनादेवंविधस्य मोक्षस्य पुरुषार्थत्वं न भविष्यतीत्याशङ्क्याह—लोकेऽपीति। क्वेत्यपेक्षायामुदाहरति—यथेति। दृष्टान्तोक्तं प्रकृते योजयति—एवमिति।

स च मोक्षः किं कर्मसाध्यः किं वोपासनासाध्य, आहोस्विदेत-त्समुच्चयसाध्य, उत कर्मज्ञानसमुच्चयसाध्यः, किं वोपासनाज्ञानसमुच्चयसाध्यः? किं वा केवलज्ञानलभ्यः? इति जिज्ञासायां स च मोक्षो ज्ञानादिति प्रतिज्ञातमुपपादयति—स चेति। तमेव—आत्मानमेव,

नान्यः पन्था विद्यतेऽयनाय' (श्वे० ३-८) इति श्रुतेः, अज्ञाननिवृत्तेर्ज्ञानैकसाध्यत्वनियमाच्च । तच्च ज्ञानं ब्रह्मात्मैक्यगोचरम् । 'अभयं वै जनक प्राप्तोऽसि' (बृ० ४-२-४) 'तदात्मानमेव वेदाहं ब्रह्मास्मि' (बृ० १-४-१०) इति श्रुतेः । 'तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनम्' इति नारदीयवचनाच्च ।

तच्च ज्ञानमपरोक्षरूपम् । परोक्षत्वेऽपरोक्षभ्रमनिवर्तकत्वानुपपत्तेः । तच्चापरोक्षज्ञानं तत्त्वमस्यादिवाक्यादिति केचित् । मनननिदिध्यासनसंस्कृतान्तःकरणादेवेत्यपरे।

तत्र पूर्वाचार्याणामयमाशयः—संविदपरोक्षत्वं न करण-

विदित्वा—तं विदित्वैवेति वा, मृत्युं जन्म मरणलक्षणां संसृतिम्, अत्येति—अतिक्रामति । अन्यः-कर्मादिरूपः, अयनाय-मोक्षाय, पन्थाः-मार्गो न विद्यते । 'हिरण्यदा अमृतत्वं भजन्ते' इत्यादिश्रुतेः कर्मसाध्यस्वर्गफलस्य प्रलयपर्यन्तस्थायित्वाभिप्रायत्वादितरवाक्यानामपि परम्परया कर्मादेर्मोक्षसाधनत्वाभिप्रायत्वाच्चेति भावः । (१)युक्तिमप्याह-अज्ञाननिवृत्तेरिति । ननु तज्ज्ञानमेदविषयं तत्साधनं किं वाऽभेदगोचरमिति विचिकित्सायामाह-तच्चेति । तत्र श्रुतिं प्रमाणयति—अभयमिति । स्मृतिं प्रमाणयति—तत्त्वमस्यादीति ।

ब्रह्मात्मैक्यगोचरमपि तज्ज्ञानं परोक्षमपरोक्षं वेति विचिकित्सायामाह—तच्चेति । तज्ज्ञानं किं वाक्यादुत्पद्यते उतान्तःकरणादिति संशये पद्मपादाचार्यमतमाह—तच्चेति । वाचस्पतिमिश्रमतमाह—मननेति ।

ननु कथं वाक्यादपरोक्षज्ञानमित्याशङ्कयाह—तत्रेति । उपरा-

(१) युक्तिमप्याहेति पुस्तके पाठः सोऽशुद्ध एव ।

विशेषोत्पत्तिनिबन्धनम्, किन्तु प्रमेयविशेषनिबन्धनमित्युपपादितम्। तथा च ब्रह्मणः प्रमातृजीवाभिन्नतया तद्गोचरं शब्दजन्यज्ञानमप्यपरोक्षम्। अत एव प्रतर्दनाधिकारे प्रतर्दनं प्रति 'प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमुपास्व' (कौ० ३-२) इतीन्द्रप्रोक्तवाक्ये प्राणशब्दस्य ब्रह्मपरत्वे निश्चिते सति मामुपास्वेत्यस्मच्छब्दानुपपत्तिमाशङ्क्य तदुत्तरत्वेन प्रवृत्ते 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' (ब्र० सू० १-१-३१) इत्यत्र सूत्रे शास्त्रीया दृष्टिः शास्त्रदृष्टिरिति

दितं प्रत्यक्षपरिच्छेदेऽस्माभिरिति शेषः। तथाच—ज्ञानापरोक्षत्वस्य प्रमेयविशेषनिबन्धनत्वे सति। सन्निकृष्टविषयं शब्दजन्यमपि ज्ञानमपरोक्षमेवेत्युक्तम्। जीवगोचरज्ञानवत्तदभिन्नब्रह्मविषयमपि तदपरोक्षमेव, अत्र प्रमाणाकाङ्क्षायां 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्'(ब्र० सू० १-१-३०) इति सूत्रस्थं भाष्यं प्रमाणमित्यभिप्रायेणाह—अत एवेति। शब्दजन्यज्ञानस्यापरोक्षत्वादेव। प्रतर्दनाधिकरणे—'प्राणस्तथानुगमात्' (ब्र० सू० १-१-२८) इत्यस्मिन्प्राणोऽस्मीत्यादिवाक्यविषयकं तस्मिन्। तत्र विषयसंशयपूर्वपक्षसमाधानरूपाणां पञ्चानामधिकरणेति संज्ञा। 'प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण च' (कौ० ३-१) इत्यस्यां कौषीतकिब्राह्मणोपनिषदाम्नाताख्यायिकायां प्राणोऽस्मीत्यादिश्रूयमाणं वाक्यं विषयः। प्राणशब्देन किं वायुरभिप्रेतः किं वा इन्द्र उत जीव आहोस्वित्परमात्मेति संशयः। वाय्वादिरभिप्रेत इति पूर्वपक्षः। परमात्मेति सिद्धान्तः। वाय्वाद्युपासनं पूर्वपक्षे फलं परमात्मोपासनमुत्तरपक्षे। प्राणः-परमात्मा। तथाऽनुगमात्पौर्वापर्यालोचनया वाक्यस्य तत्परत्वावगमादिति प्राणशब्दस्य ब्रह्मपरत्वे निश्चिते सति मामित्यस्मच्छब्दानुपपत्तिमाशङ्क्य

तत्त्वमस्यादिवाक्यजन्यमहं ब्रह्मेति ज्ञानं दृष्टिशब्देनोक्तमिति।

अन्येषां त्वयमाशयः—करणविशेषनिबन्धनमेव ज्ञानानां प्रत्यक्षत्वम्, न विषयविशेषनिबन्धनम्। एकस्मिन्नेव सूक्ष्मवस्तुनि पटुकरणापटुकरणयोः प्रत्यक्षत्वाप्रत्यक्षत्वव्यवहारदर्शनात्। तथा च सविकल्पकत्वे इन्द्रियजन्यत्वस्यैव प्रयोजकतया न शब्दजन्यज्ञानस्यापरोक्षत्वम्।

ब्रह्मसाक्षात्कारेऽपि मनननिदिध्यासनसंस्कृतं मन एव करणम् 'मनसैवानुद्रष्टव्य' इत्यादिश्रुतेः। मनोऽगम्य-

---

दुत्तरत्वेन प्रवृत्ते यथा शास्त्रदृष्ट्याऽहं सूर्योऽभवमहं मनुरिति वामदेवस्य गर्भस्थस्य मुनेरुक्तिस्तथा शास्त्रदृष्ट्या मामितीन्द्रोपदेशोऽपीत्यर्थः। कमूने इत्यर्थः।

अथाचार्यवाचस्पतिमिश्राणामाशयमाविष्करोति-**अन्येषामिति**। **सूक्ष्मवस्तुनि**-वर्णादौ। **इन्द्रियजन्यत्वस्य**-इन्द्रियत्वेनेन्द्रियजन्यत्वस्य। अनुमितिज्ञानस्य मनस्त्वेन तज्जन्यत्वाच्च तत्रातिव्याप्तिः। अस्मिन्पक्षे 'इन्द्रियेभ्य परा ह्यर्था' (क० १-१०) इति श्रुताविन्द्रियेभ्य इत्यस्य बाह्येन्द्रियेभ्य इत्यर्थः। 'मनः सर्वेन्द्रियाणि च इति श्रुतावपि सर्वाणि बाह्येन्द्रियाणीत्यर्थः।

साक्षात्कारस्येन्द्रियजन्यत्वे ब्रह्मसाक्षात्कारेऽपि मन एव करणमित्याह—**ब्रह्मेति**। सर्वदा तदापत्तिमाशङ्क्याह—**मननेति**। तत्र प्रमाणमाह—**मनसैवेति**। 'दृश्यते त्वग्र्या बुद्ध्या' (क० १-३-१२) इत्याद्युश्रुतिरादिपदार्थः। ननु 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' (तै० २-४-१) इत्यादिश्रुतेः का गतिरित्याशङ्क्याह-**मन इति**। ननु 'तं त्वौपनिषदं पुरुषं पृच्छामि' (बृ० ३-९-२६) इति श्रुतिबोधितमुपनिषन्मात्रगम्यत्वं विरुद्धमित्याशङ्क्य परिहरति—

त्वश्रुतिश्चासंस्कृतमनोविषया। न चैवं ब्रह्मण औपनिषदत्वानुपपत्तिः, अस्मदुक्तमनसो वेदजन्यज्ञानानन्तरमेव प्रवृत्ततया वेदोपजीवित्वात्। वेदानुपजीविमानान्तरगम्यत्वस्यैव वेदगम्यत्वविरोधित्वात्।

शास्त्रदृष्टिसूत्रमपि ब्रह्मविषयमानसप्रत्यक्षस्य शास्त्रप्रयोजकत्वादुपपद्यते। तदुक्तम्—

अपि संराधने सूत्राच्छास्त्रार्थध्यानजा प्रमा।
शास्त्रदृष्टिर्मता तां तु वेत्ति वाचस्पतिः परः॥ इति।

नचेति। किं तदनुपजीव्यमानान्तरगम्यत्वे तदनुपपत्तिरुत तदुपजीव्यमानान्तरगम्यत्वे? नाद्यः, इष्टापत्तेः। न द्वितीयः, अपूर्वस्य तदुपजीव्यानुमानार्थापत्तिगम्यत्वेऽपि वेदगम्यत्वाभ्युपगमादित्याशयेनाह—अस्मदिति। मननिदिध्यासनसहकृतस्य मनसः।

अस्मिन्पक्षे शास्त्रदृष्टिसूत्रविरोधं परिहरति-शास्त्रेति। तथा च तत्र शास्त्रदृष्टिपदेन मानसं प्रत्यक्षमेव तत्प्रयोज्यत्वादुच्यत इत्यर्थः। वाचस्पतिमिश्राणामिदं मतमित्यत्र कल्पतरुकारसम्मतिमाह-तदुक्तमिति। शास्त्रार्थध्यानजा प्रमा शास्त्रदृष्ट्या तूपदेशो वामदेववदिति सूत्रे शास्त्रदृष्टिशब्देनाभिमता तां तथाभूतां शास्त्रदृष्टिं वाचस्पतिर्जानाति यतः परः-सर्वोत्कृष्टः। तथाभूता प्रमैव शास्त्रदृष्टिरित्यत्र को हेतुरित्याशङ्क्योक्तम्-अपीति। 'अपि संराधने प्रत्यक्षानुमानाभ्याम्' (ब्र० सू० ३-२-२४) इति सूत्रात्। अपि चैनमात्मानं निरस्तसमस्तप्रपञ्चमव्यक्तं संराधनस्य भक्तिध्यानप्रणिधानाद्यनुष्ठानस्य काले योगिनः पश्यन्ति। तत्र हेतुः प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्याम्। तथा च श्रुतिः-'ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं

तच्च ज्ञानं पापक्षयात्। स च कर्मानुष्ठानादिति परम्परया कर्मणां विनियोगः। अत एव 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' (बृ० ४-४-२२) इत्यादिश्रुतिः, 'कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते' इत्यादिस्मृतिश्च सङ्गच्छते।

एवं श्रवणमनननिदिध्यासनान्यपि ज्ञानसाधनानि। मैत्रेयीब्राह्मणे 'आत्मा वा अरे द्रष्टव्यः' (बृ० २-४-४) इति दर्शनमनूद्य तत्साधनत्वेन 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ० २-४-४) इति श्रवणमनननिदिध्यासनानां विधानात्।

ध्यायमानः' (मु० ३-१-८) इत्याद्या। स्मृतिश्च—

यं विनिद्रा जितश्वासाः सन्तुष्टाः संयतेन्द्रियाः।

ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः॥ इत्याद्या।

तादृशज्ञानस्य किं साधनमित्यपेक्षायामाह—तच्चेति। स च-पापक्षयः। इत्येवं परम्परया तत्त्वज्ञाने कर्मणां विनियोगः। अत एव परम्परया विनियोगादेव। तं पूर्वोक्तम्, एतम्-अनन्तरोक्तं परमात्मानं, ब्राह्मणाः वेदानुवचनादिभिर्वेदितुमिच्छन्ति। वेदानुवचनं-वेदाध्ययनम्। अनाशकम् अनशनं हितमितमेध्याशनम्। तत्र प्रत्ययार्थतया प्रधानभूतायामिच्छायां वेदानुवचनादीनां साधनतेति वाचस्पतिमिश्राः। अस्तन्न जिज्ञासीत्यादाविव धात्वर्थस्य वेदनस्यैव प्राधान्यमाश्रित्य ज्ञाने तेषां साधनत्वमिति विवरणाचार्याः। 'यस्यैते चत्वारिंशत्संस्काराः' इत्यादिश्रुतिः, 'तपसा कल्मषं हन्ति' इत्याद्या स्मृतिश्चादिपदग्राह्या।

यथा कर्मणां तत्त्वज्ञाने विनियोगस्तथा श्रवणादीनामपीत्याह—एवमिति। तत्र बृहदारण्यकश्रुतिं प्रमाणयति—मैत्रेयीब्राह्मण इति। याज्ञवल्क्यस्य स्वभार्यया मैत्रेय्या संवादस्य प्रकरणे।

तत्र श्रवणं नाम वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूला मानसी क्रिया। मननं नाम शब्दावधारितेऽर्थे मानान्तरविरोधशङ्कायां तन्निराकरणानुकूलतर्कात्मज्ञानजनको मानसो व्यापारः। निदिध्यासनं नाम अनादिदुर्वासनया विषयेष्वाकृष्यमाणचित्तस्य विषयेभ्योऽपकृष्यात्मविषयकस्थैर्यानुकूलो मानसो व्यापारः।

तत्र निदिध्यासनं ब्रह्मसाक्षात्कारे साक्षात्कारम्। 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्' (श्वे० १-३) इत्यादिश्रुतेः। निदिध्यासने च मननं हेतुः, अकृतमननस्यार्थदार्ढ्याभावेन तद्विषये निदिध्यासनायोगात्। मनने च श्रवणं हेतुः, श्रवणाभावे तात्पर्यानिश्चयेन शाब्दज्ञानाभावेन श्रुतार्थविषयकयुक्तत्वायुक्तत्वनिश्चयानुकूलमननायोगात्। एतानि त्रीण्यपि ज्ञानोत्पत्तौ कारणानीति केचिदाचार्या ऊचिरे।

अपरे तु श्रवणं प्रधानम्, मनननिदिध्यासनयोस्तु

तत्र श्रवणादिकं लक्षयति—तत्रेति।

तत्र किं त्रयाणामपि साक्षात्कारसाधनत्वम्, उतान्यतमस्य? तत्रापि कस्येत्याशङ्कायामाह—तत्रेति। 'ततस्तु तं पश्यति निष्कलं ध्यायमानः' (मु०-३-१-८) इत्याद्या श्रुतिरत्रादिपदेनोपादेया। निदिध्यासनस्य मननायत्तत्वात्तस्य च श्रवणाधीनत्वात् त्रीण्यपि साक्षात्परम्परया च ज्ञानोत्पत्तिसाधनानीत्याचार्यैकदेशस्य मतमुपदर्शयति—एतानीति।

अपरे—विवरणाचार्यास्तु। पराचीनयोः-अनन्तरभाविनोः।

श्रवणात्पराचीनयोरपि श्रवणफलब्रह्मदर्शननिर्वर्तकतया आराद्ुपकारकाङ्गत्वमित्याहुः । तदप्यङ्गत्वं न (१)तार्तीयशेषत्वरूपम् । यस्य श्रुत्याद्यन्यतमप्रमाणगम्यस्य प्रकृते श्रुत्याद्यन्यतमाभावेऽसम्भवात् ।

तथा हि, 'व्रीहिभिर्यजेत' 'दध्ना जुहोति' इत्यादाविव मननिदिध्यासनयोरङ्गत्वे न काचित्तृतीया(२)श्रुतिरस्ति । नापि 'बर्हिर्देवसदनं दामि' इत्यादिमन्त्राणां बर्हिः खण्डनप्रकाशनसामर्थ्यवत् किञ्चि(३)ल्लिङ्गमस्ति । नापि प्रदे-

आरात्—सामीप्यात् । नन्वङ्गत्वमपि किं तार्तीयशेषत्वरूपमुत मृत्पिण्डादकार्ये घटादौ चक्रादीनामिव सहकारिकारणत्वरूपमित्याशङ्क्य द्वितीयमाश्रयितुमाद्यं निराकरोति—तदप्यङ्गत्वमिति । तार्तीयं—तृतीयाध्यायस्थम् ।

श्रुत्याद्यभावं स्फुटयति—तथा हीति ।

(१) तार्तीयशेषत्वरूपमिति । तृतीयाध्यायतृतीयपादप्रतिपाद्यमित्यर्थः । तत्र व्रीह्यादीनां यागाङ्गत्वं तृतीयादिश्रुत्यादिप्रमाणषट्केन प्रतिपादितं धर्ममीमांसाशास्त्रे 'श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां पारदौर्बल्यमर्थविप्रकर्षात्' इति सूत्रेण । श्रुत्यादीनि तु—

श्रुतिर्द्वितीया क्षमता च लिङ्गं वाक्यं पदान्येव तु संहतानि ।
सा प्रक्रिया या कथमित्यपेक्षा स्थानं क्रमो योगबलं समाख्या ॥

इत्यादीनि मूलेऽनुपदं वक्ष्यमाणान्यनुसर्तव्यानि । अग्रेऽस्माभिः स्फुटीकरिष्यन्ते ।

(२) तृतीयाश्रुतिरिति निरपेक्षो रवः श्रुतिरिति श्रुतेर्लक्षणम् । सर्वासामेव कारकविभक्तीनां प्रकृत्यर्थान्वितस्वार्थबोधने इतरानपेक्षत्वात् । तृतीयेत्युपलक्षणं सर्वासां कारकविभक्तीनाम् । तथा च 'व्रीहिभिर्यजेत' इत्यादौ व्रीह्यादीनां यागाङ्गत्वं तृतीयाश्रुत्या, 'व्रीहीनवहन्ति' इत्यादौ द्वितीयाश्रुत्या व्रीहीणामवहननाङ्गत्वमिति ज्ञेयम् ।

(३) लिङ्गमिति । 'अर्थप्रकाशनसामर्थ्यं लिङ्गम्' 'बर्हिर्देवसदनं दामि' इत्या

शान्तरपठितप्रवर्ग्ययोरग्निष्टोमे प्रवृत्तवत्तीति (१)वाक्यवच्छ्र वणानुवादेन मनननिदिध्यासनयोर्विनियोजकं किञ्चिद्वाक्य- मस्ति। नापि 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति वाक्यावगतफलसाधनताकदर्शपूर्णमासप्रकरणे प्रयाजादीना मिव फलसाधनत्वेनावगतस्य श्रवणस्य (२)प्रकरणे मनन निदिध्यासनयोराम्नानम्।

ननु द्रष्टव्य इति दर्शनानुवादेन श्रवणे विहिते सति फलवत्तया श्रवणप्रकरणे तत्सन्निधावाम्नातयोर्मनननिदि- ध्यासनयोः प्रयाजन्यायेन प्रकरणादेवाङ्गतेति चेत्। न।

प्रकरणाभावो नास्तीति शङ्कते—नन्विति। अविशेषेण सार नतया श्रूयमाणेषु श्रवणादिषु किं प्रधानं साधनमित्याकाङ्क्षायां श्रुत्य न्तरबलान्निदिध्यासनस्यैव प्रधानत्वापत्त्या श्रवणस्य प्रकरणित्वासिद्धि- रित्याह—नेति।

नन्वस्या श्रुतावात्मदर्शनान्तरं विधीयमानं श्रवणमेव प्रकरि

सीदन्त्यस्मिन्निति देवसदनं देवानामासनाधः ह यदि स्वा दामिन्धिर्नद स्यर्थस्य मन्त्रस्य दैन्नस्य शोधनसामर्थ्याद् बर्हिर्लवनरूपकर्माङ्गत्वम्।

(१)वाक्यवदिति। परस्पराकाङ्क्षितस्वार्थप्रतिपादकपदानां संहतिर्वाक्यम्। 'वाक्यं पदान्येव तु संहतानि' इत्युक्तः। यथा 'अरुणया पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणाति' इत्यत्र परस्पराकाङ्क्षितस्वार्थप्रतिपादकानामरुणादिपदानां वाक्यप्रमाणात् सोमक्रयणाङ्गत्वमिति। यथा वा अग्निष्टोमे प्रवृत्तिके दीर्घ वाक्यस्य प्रदेशान्तरपठितप्रवर्ग्ययोरग्निष्टोमे प्रवृत्तिबोधकत्वमिति।

(२)प्रकरण इति। 'सा प्रक्रिया या कथंभावाकाङ्क्षा'। यथा 'दर्शपूर्ण मासाभ्यां यजेत' इति प्रधानविधिबोधिते कर्मणि कथं कुर्यादित्याकाङ्क्षायां सत्यां तत्सन्निधौ 'समिधो यजति' 'तनूनपातं यजति' 'इडो यजति' 'बर्हिर्यजति' 'स्वाहाकारं यजति' इति सन्निधानेनाम्नातत्वात् तेषां प्रकरणेनाङ्गत्वमिति।

'ते ध्यानयोगानुगता अपश्यन्' इत्यादिश्रुत्यन्तरे ध्यानस्य (१)दर्शनसाधनत्वेनावगतस्याङ्गाकाङ्क्षायां प्रयाजन्यायेन श्रवणमननयोरेवाङ्गतापत्तेः। (२)क्रमसमाख्ये च दूरनिरस्ते(३)।

किञ्च प्रयाजादावङ्गत्वविचारः सप्रयोजनः। पूर्वपक्षे विकृतिषु न प्रयाजाद्यनुष्ठानम्, सिद्धान्ते तु तत्रापि तदनुष्ठानमिति। प्रकृते तु श्रवणं न कस्यचित्प्रकृतिः, येन मनननिदिध्यासनयोस्तत्राप्यनुष्ठानमङ्गत्वविचारफलं भवेत्। तस्मान्न तार्तीयशेषत्वं मनननिदिध्यासनयोः। किन्तु यथा घटादिकार्ये मृत्पिण्डादीनां प्रधानकारणता, चक्रादीनां सहकारिकारणतेति प्राधान्याप्राधान्यव्यपदेशः, तथा श्रवणमनननिदिध्यासनानामपीति मन्तव्यम्।

श्रुत्यन्तरस्यैतदनुसारिव्याख्यानसम्भवादित्याशङ्क्याह—किञ्चेति।
विकृतिषु—सौर्यादिषु।

---

(१) दर्शनसाधनत्वेनावगतस्य ध्यानस्य-निदिध्यासनस्य प्रयाजन्यायेन प्रकरणादित्यर्थः, श्रवणमननयोरङ्गत्वापत्तेः, अर्थात् श्रवणाङ्गत्वं मनननिदिध्यासनयोर्व्यवस्थापयति भवति मननाङ्गत्वं श्रवणस्यायात भवेदित्यापत्तिः।

(२) क्रमसमाख्ये इति। 'स्थान क्रमः' समानदेशतेत्यर्थः। यथा आध्वर्यवकाण्डे आग्नेयोपांशुयाजाग्नीषोमीयाख्यकर्माणि क्रमेणाम्नातानि, याजमाने काण्डे तद्विषयाणियो मन्त्राः क्रमेणोक्ताः। तत्र स्थानबलेन क्रमशः आग्नेयस्य प्रथममन्त्रः, उपांशुयाजस्य मध्यममन्त्रः, अग्निषोमीयस्यान्तिममन्त्रोऽङ्गमिति। 'यौगिक समाख्या' परस्परान्वितावयवार्थप्रतिपादकेति तत्त्वम्। यथा आध्वर्यवम्, हौत्रम्, औद्गात्रम्, इत्यादीनाम्-अध्वर्युणा कर्तव्यमाध्वर्यवमिति प्रकृतिप्रत्ययोगबलादध्वर्युकर्तृत्वं यत्र प्रतीयते इति दिक्।

(३) दूरनिरस्ते इति। श्रवणाङ्गत्वं मनननिदिध्यासनयोर्न क्रमेण न वा समाख्ययाऽऽशङ्कितुमपि क्षमम्, समानदेशतारूपक्रमस्याभावात्, योगरूढसमाख्यायाश्चाभावादिति भावः।

सूचितं चैतद्विवरणाचार्यैः—'शक्तितात्पर्यविशिष्टशब्दावधारणं प्रमेयावगमं प्रत्यव्यवधानेन कारणं भवति, प्रमाणस्य प्रमेयावगमं प्रत्यव्यवधानात्। मनननिदिध्यासने तु चित्तस्य प्रत्यगात्मप्रवणतासंस्कारपरिनिष्पन्नतदेकाग्रवृत्तिकार्यद्वारेण ब्रह्मानुभवहेतुतां प्रतिपद्यते इति फलं प्रत्यव्यवहितकरणस्य विशिष्टशब्दावधारणस्य व्यवहिते मनननिदिध्यासने तदङ्गेऽङ्गीक्रियते' इति।

श्रवणादिषु च मुमुक्षूणामधिकारः, काम्ये कर्मणि फलकामस्याधिकारित्वात्। मुमुक्षायां च नित्यानित्यवस्तुविवेकस्येहामुत्रार्थफलभोगविरागस्य शमदमोपरतितितिक्षासमाधानश्रद्धानां च विनियोगः।

अन्तरिन्द्रियनिग्रहः शमः। बहिरिन्द्रियनिग्रहो दमः। विक्षेपाभाव उपरतिः। शीतोष्णादिद्वन्द्वसहनं तितिक्षा।

ननु मनननिदिध्यासनयोस्तादर्थ्यरोपत्वं न, किं तु श्रवणस्यैव रित्वमितीदमेव विवरणाचार्याभिमतमिति कथं ज्ञातमित्यत आह—सूचितं चेति। कवेत्यपेक्षायामाचवर्णकस्थं तद्वाक्यं पठति शक्तेत्यङ्गीक्रियते इत्यन्तम्।

श्रवणादौ कस्याधिकार इत्यपेक्षायामाह—श्रवणादिष्विति। मोक्षरूपफलकामनया क्रियमाणश्रवणादिकमपि काम्यमिति भावः। नित्यानित्ययोरात्मानात्मवस्तुनोर्विवेकस्य, नित्यानित्ययोर्वस्तीति नित्यानित्यवस्तु तयोर्नित्यत्वानित्यत्वधर्मयोर्वा विवेकस्य।

शमादीन्लक्षयति—अन्तरिति। श्रवणादिव्यतिरिक्ताधिकारानुपयुक्तविषयेभ्यो मनसो निग्रहः शमस्तादृशविषयेभ्यो बहिरिन्द्रियाणां श्रोत्रादीनां निग्रहो दमः। गृहस्थादीनां श्रवणादावनधिकारं

चित्तैकाग्र्यं समाधानम् । गुरुवेदान्तवाक्ये विश्वासः श्रद्धा अत्रोपरमशब्देन सन्यासोऽभिधीयते, तथा च सन्यासिनामेव श्रवणाधिकार इति केचित् । अपरे तु उपरमशब्दस्य सन्यासवाचकत्वाभावाद्विक्षेपाभावमात्रस्य गृहस्थेष्वपि सम्भवात्, जनकादेरपि ब्रह्मविचारस्य श्रूयमाणत्वात्सर्वाश्रमसाधारणं श्रवणादिविधानमित्याहुः ।

सगुणोपासनमपि चित्तैकाग्र्यद्वारा निर्विशेषब्रह्मसाक्षात्कारे हेतुः । तदुक्तम्—

निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ।
ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः ॥ १ ॥
वशीकृते मनस्येषां सगुणब्रह्मशीलनात् ।
तदेवाविर्भवेत्साक्षादपेतोपाधिकल्पनम् ॥ २ ॥ इति ।

सगुणोपासकानां चार्चिरादिमार्गेण ब्रह्मलोकगतानां तत्रैव श्रवणादुत्पन्नतत्त्वसाक्षात्काराणां ब्रह्मणा सह मोक्षः ।

मन्यमानानां केषाञ्चित्सन्यासिनां मतमाह—अत्रेति । शमादिष्विस्थर्यं । वाचस्पतिमिश्रमतमाह—अपरे त्विति ।

ननु सगुणोपासनाया अपि मुक्तिफलदातृत्वश्रवणाच्छ्रवणादिसमासादिततत्त्वज्ञानमेव मोक्षसाधनमिति कथमित्याशङ्क्याह—सगुणेति । निदिध्यासनात्मकचित्तैकाग्र्यद्वारा, तत्र 'अन्तस्तद्धर्मोपदेशात्' (ब्र० सू० १-१-२०) इति सूत्रस्थकल्पतरुवचनमुदाहरति—तदुक्तमिति । ये मन्दाः—अकृतसगुणोपासनत्वादवशीकृतचित्ताः ।

ननु येषां सगुणोपासकानामत्र श्रवणाद्यभावात्साक्षात्कारो न जातस्तेषां का गतिरित्याशङ्क्याह—सगुणेति । आदिपदमहरादिसंग्रहार्थम् । अर्चिरादभिमानिदेवतोपर्यादृशा येन मार्गेण गम्यते तेनैवमग्ने-

कर्मिणां तु धूमादिमार्गेण पितृलोकगतानामुपभोगेन कर्मक्षये सति पूर्वकृतसुकृतदुष्कृतानुसारेण ब्रह्मादिस्थावरान्तेषु पुनरुत्पत्तिः । तथा च श्रुतिः 'रमणीयचरणा रमणीयां योनिमापद्यन्ते, कपूयचरणाः कपूयां योनिमापद्यन्ते' (छा० ५-१०-१) इति । प्रतिषिद्धानुष्ठायिनां तु रौरवादिनरकविशेषेषु तत्तत्पापोपचिततीव्रदुःखमनुभूय श्वशूकरादितिर्यग्योनिषु स्थावरादिषु चोत्पत्तिरित्यलं प्रसङ्गादागतप्रपञ्चेनेति ।

निर्गुणब्रह्मसाक्षात्कारवतस्तु न लोकान्तरगमनम्, 'न तस्य प्राणा उत्क्रामन्ति' इति श्रुतेः । किन्तु यावत्प्रारब्धकर्मक्षयं सुखदुःखे अनुभूय पश्चादपवृज्यते ।

ननु 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' (मु० २-८) इत्यादिश्रुत्या । 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा' (भ० गी० ४-३७) इत्यादिस्मृत्या च ज्ञान

ऽपीत्यर्थः । कर्मिणां तु नैवमित्याह—कर्मिणामिति । आदिपदेन रात्र्यादिग्रहः । ब्रह्मादीति । ब्राह्मणादि । रमणीयं चरणमाचरणं येषां ते तथा, सुकृतकर्माणो रमणीयां योनिमापद्यन्ते ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा । कपूयं कुत्सितं चरणं येषां ते तथा दुष्कृतकर्माणः कपूयां योनिमापद्यन्ते श्वयोनिं वा चाण्डालयोनिं वा शूद्रयोनिं वेति ।

तर्हि ज्ञानप्राप्त्युत्तरक्षणे तस्य विदेहकैवल्यं स्यादित्याशङ्कते—किन्त्विति । अपवृज्यते—मुच्यते ।

प्रारब्धकर्मावस्थानं श्रुतिस्मृतिविरुद्धमिति शङ्कते—नन्विति । आदिपदं 'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते' (छा० ५-२४-३) इत्यादिश्रुतिग्रहणार्थम् । इतश्श्रुति

स्य सकलकर्मक्षयहेतुत्वनिश्चये सति प्रारब्धकर्मावस्थानमनुपपन्नमिति चेत् । न । 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये' (छा० ६-१४-२) इत्यादिश्रुत्या 'नाभुक्तं क्षीयते कर्म' इत्यादिस्मृत्या चोत्पादितकार्यकर्मव्यतिरिक्तानां सञ्चितकर्मणामेव ज्ञानविनाश्यत्वावगमात् ।

सञ्चितं द्विविधम्—सुकृतं दुष्कृतं चेति । तथा च श्रुतिः—'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्' इति । ननु ब्रह्मज्ञानान्मूलाज्ञाननिवृत्तौ तत्कार्यप्रारब्धकर्मणोऽपि निवृत्तिः, कथं ज्ञानिनो देहधारणमुपपद्यते ? इति चेत् । न । अप्रतिबद्धज्ञानस्यैवाज्ञाननिवर्तकतया प्रारब्धकर्मरूपप्रतिबन्धकदशायामज्ञाननिवृत्तेरनङ्गीकारात् ।

नन्वेवमपि तत्त्वज्ञानादेकस्य मुक्तौ सर्वमुक्तिः स्यात्, अविद्याया एकत्वेन तन्निवृत्तौ क्वचिदपि संसारायोगादिति

स्मृत्यनुरोधात्प्रारब्धातिरिक्तकर्मणां नाश इत्याह—तस्येति । यावत् विमोक्ष्ये प्रारब्धकर्मणो न विमोक्ष्यते । अथ—प्रारब्धकर्मविमुक्त्यनन्तरम् । सम्पत्स्ये—सम्पत्स्यते । 'विमुक्तश्च विमुच्यते' 'अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्' इत्याद्याः श्रुतिस्मृतय आदिपदार्थाः ।

ननु 'एवं हास्य सर्वे पाप्मानः प्रदूयन्ते' इत्यादिश्रुत्यनुसारेण सञ्चितानामपि पापकर्मणामेव नाश इति भ्रमव्युदासायाह—सञ्चितमिति । दाय—धनादिविभागम् । साधुकृत्यां—सुकृतम् । ननु श्रुत्यादायुक्तमपि प्रारब्धकर्मावस्थानं युक्तियुक्तं न भवतीति शङ्कते—नन्विति ।
* ···· * '*

प्रतिबन्धकापगमे ज्ञानेनाज्ञाननिवृत्त्या सर्वमुक्तिप्रसङ्ग इति शङ्कते—नन्विति । अविद्यायाः—(१)तदुपादानभूताया अज्ञानशक्तेः ।

---

(१) पुस्तकेषु सर्वेषु 'अज्ञानस्य तदुपादानभूताया अज्ञानशक्तेः' इति

चेन् । न । इष्टापत्तेरित्येके । अपरे त्वेतद्दोषपरिहाराय 'इन्द्रो मायाभिः' इति बहुवचनश्रुत्यनुगृहीतमविद्यानानात्वमङ्गीकर्तव्यमित्याहुः ।

अन्ये त्वेकैवाविद्या, तया एवाविद्याया जीवभेदेन ब्रह्मस्वरूपावरणशक्तयो नाना । तथा च यस्य ब्रह्मज्ञानं तस्य ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाशः, न त्वन्यं प्रति ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाश इत्यभ्युपगमाद् नैकमुक्तौ सर्वमुक्तिः ।

अत एव 'यावदधिकारमवस्थितिरधिकारिकाणाम्' (ब्र० सू० ३-३-३२) इत्यस्मिन्नधिकरणेऽधिकारिपुरुषाणामुत्पन्नतत्त्वज्ञानानामिन्द्रादीनां देहधारणानुपपत्तिमाशङ्क्याधिकारापादकप्रारब्धकर्मसमाप्त्यनन्तरं विदेहकैवल्यमिति सिद्धान्तितम् ।

तदुक्तमाचार्यवाचस्पतिमिश्रैः—

उपासनादिसंसिद्धितोषितेश्वरचोदितम् ।
अधिकारं समाप्यैते प्रविशन्ति परं पदम् ॥ इति ।

एतच्चैकमुक्तौ सर्वमुक्तिरिति पक्षे नोपपद्यते । तस्मा-

इन्द्रः-परमात्मा, मायाभिः-अविद्याभिः पुरुरूप इयते बहुरूपः प्रतीयते ।

अस्मिन्पक्षे गौरवमभिप्रेत्य मतान्तरमाह—अन्ये त्विति ।
अस्मिन्पक्षे मायाभिरित्यस्य मायाशक्तिभिरित्यर्थः ।

कैः सिद्धान्तितमित्यपेक्षायामाह—तदुक्तमिति । इत्थेव मतं न्याय्यमिति द्योतनायाह-एतच्चेति । तस्मादेवं तस्मात् ।

च •·····• एतच्चिह्नमध्यगतो वर्णो तथाऽपि स्पष्ट तदर्थ सांसं प्रकल्प्यात्र निवेशितोऽस्माभिः शोधितश्च ।

देकाविद्यापत्तेऽपि प्रतिजीवमावरणभेदोपगमेन व्यवस्थोपपादनीया । तदेवं ब्रह्मज्ञानान्मोक्षः, स चानर्थनिवृत्तिर्निर-

---

व्यवस्था—बद्धमुक्तव्यवस्था । परिच्छेदार्थं निगमयति—तदेवमिति ।

(१)मूलकृन्मृतुनाऽत्यक्तमपरित्यक्तं च विस्फुटम् ।
व्याख्यात दूषितं तेन मयेदं च विभूषितम् ॥ १ ॥

(२)गोचारेड्नगेडिरेडभिनुतो गोत्रात्मजेडाखिलेड्,
व्याडेड्वाप्ततनुः कवीड्नगतद्विट् चण्डभेरुण्डहा ।
गोराट्शुद्धधियाविकल्पितविमलश्रीरोत्थविभ्राडज',
स स्यादभ्ररुडभ्रवाडभिदुरं देवो दृढो मे मृडः ॥ २ ॥

(३) स्वजनवदनचारी पापसंघापहारी
स्वजनवदनकारी प्रोल्लसद्गानधारी ।
विकचरदनसारी ज्योत्स्निकाऽऽनन्दकारी,

---

(१) एते श्लोकाः कपुस्तके न सन्ति ।

(२) गोचारेति । गां पृथ्वीं चरन्तीति गोचारा. (कर्मण्यण्) तेषामीड् स्वामिनः (ईड ऐश्वर्ये इत्यस्य. कर्तरि क्विप् एवमग्रेऽपि) कं सुखम्, न कमकं दुःखम्, न अकमस्मिन्नित्यनक स्वर्गः (अपाणिनीयमेतत्) तस्य ईडः पालकः । इरा पाताल तस्या ईडः स्वामिनश्च तैरभिनुतोऽभिष्टुत , अर्थात् स्वर्गमृत्युपातालाधिपैः स्तुत इत्यर्थः । गोत्रात्मजा पार्वती तस्या ईट् । आखिलेट् जगदीशः । व्यालाः सर्पास्तेषामीड्वासुकिस्तेनाप्ता तनुर्यस्य (अनुप्रासानुरोधेन डल्योरभेदः) कवीनामीट् शुक्रस्तमनुगता दैत्यास्तान्द्वेष्टीति दैत्यारिरित्यर्थः । चण्डो यो भेरुण्डो दैत्यविशेषस्तं हन्तीति । गवा नन्दिकेन राजतेऽसौ गोराट् । शुद्धधिया अविकल्पित अलौकिककान्तिः । अमलो निष्कलङ्कः क्षीरोत्थश्चन्द्रः तेन विभ्राजते इति । अजः अजन्मा । अभ्रे स्वर्गे रोहन्ति जायन्ते इत्यभ्ररुहो देवास्तेषामभ्रवाडिन्द्रः महादेव इत्यर्थः । सः लोकवेदप्रसिद्धो मृडं देवः अभिदुर सन्तत यथा तथा मे दृढः स्याद इत्यर्थः ।


(३) स्वजनेति । विकचानां विकसितानां रदनानां दन्तानां सार

तिशयमहानन्दावाप्तिश्चेति सिद्धं प्रयोजनम् ।

इति श्रीधर्मराजदीक्षितविरचितायां वेदान्तपरिभाषायामष्टमः परिच्छेदः समाप्तः ॥ ८ ॥

मदनसुषमकारी सोऽस्तु मे हृद्विहारी ॥ ३ ॥
गोत्राङ्कवसुतारेशमिते (१८६७) संवत्सरे शुभे ।
फाल्गुने सितसप्तम्यां पूर्णे सिद्धा गुरावियम् ॥ ४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तांशावतंसरामकुमारसूनुधनपतिसूरिसुतशिवदत्तकृतायां वेदान्तपरिभाषाऽर्थदीपिकायामष्टमः



परिच्छेदः ॥ ८ ॥

॥ समाप्तोऽयं ग्रन्थः ॥

मदन सुषमकारीति । मदन सुषम सुन्दर करोति मदनात् सुषमकारीति वा । अन्यत्स्पष्टम् ।

इति श्रीराजस्थानान्तर्गतभरतपुरराजधानीस्थमुख्योपाध्याय-
पण्डितरामशास्त्रिवेदान्ताचार्यकृता
टिप्पणी समाप्ता ।